
BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1044.



तत्त्वार्थाधिगमसूत्रम् ।

TATTVÂRTHÂDHIGAMA.

BY

UMÂSVÂTI

BEING

IN THE ORIGINAL SANSKRIT

WITH THE

BHÂSHYA BY THE AUTHOR HIMSELF.

EDITED BY

MODY KESHAVLAL PREMCHAND, B.A., LL.B.

TEXT AND BHÂSHYA.

VOL. I. FASCICULUS I.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1903.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWI, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 ; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5 ; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–4		1	8
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1–2		0	12
Catadusani, Fasc. 1		0	6
Ca[illegible]e of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çata[illegible] Brāhmaṇa, Fasc. 1–6		2	10
Çatasa[illegible]ka Prajnaparamita, (Text) Fasc. 1–5 @ /6/ each ...		1	14
*Caturv[illegible] Chintāmaṇi (Text) Vols. II, 1–25 ; III. Part I, Fasc. 1–18. Part II, [illegible]asc. 1–10 @ /6/ each		19	14
Catadusani, Fasc. 1		0	6
Catasāhasrika-prajna-parimita Part I, Fasc. 1–5 @ /6/		1	14
Çlokavartika, (English) Fasc. 1–3		2	4
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–17 @ /6/ each ...		5	4
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–4 ; Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Dan Kriya Kaumudi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1–5...		1	14
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–5		1	14
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–7 @ /6/ each		6	0
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–5 @ /6		1	14
*Nirukta, (Text) Vol. III, Fasc. 1–6 ; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. 1–7 (Text) @ /6/		2	10
Nyayabinduṭikā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–5 ; Vol. II, Fasc. 1–3 @ /6/ each		3	6

तत्त्वार्थाधिगमसूत्रम् ।



अर्हद्वचनैकदेशस्य संग्रहम् ।

श्रीमदुमास्वातिना रचितम् ।

स्वकृतभाष्यसहितम् ।

श्रीलश्री

बङ्गाल—एशियाटिक—सोसाइटी—नामकसमाजानुज्ञया

प्रेमचन्द्रतनुजेन केशवलालेन

परिशोधितम् ।

प्रथमो भागः

मूलं भाष्यं च



कलकत्ताराजधान्याम्

बाप्तिस्टमिशनयन्त्रे मुद्रितम् ।

संवत् १९५९ ।

Preface.

The following materials have been utilized in the edition of this work.

A :—Manuscript belonging to Yati Nânachandji, of Bombay. This manuscript is without date and is written on paper, 47 leaves with 15 lines of about 56 aksharas each. In appearance, it is rather a new manuscript and seems to be about 200 years old. It and Manuscript C are very similar. Both these manuscripts mark the number of Sûtras. These manuscripts contain only the Bhâshya with original text intermixed therewith.

B :—Manuscript belonging to Mâharâja Dayâvimalji, of Devashâ's Pâdâ, Ahmedâbâd. This manuscript is written on paper 44 leaves with 15 lines of about 70 aksharas each. It is dated Samvat 1532 (1475 A.D.) This date appears in a paragraph which seems to be written after some years of the writing of the whole work. This and Manuscript K strikingly resemble each other. This and Manuscript K contain original text in the first four leaves which is a Digambara version of the text, and from the fifth leaf we have the Bhâshya with the original text intermixed as in Manuscripts A and C. Manuscript B is a very carelessly written manuscript.

C :—Manuscript belonging to Lohar's Pole Upâshraya in Ahmedâbâd. It is without date and appears to be a very old manuscript. It is a carefully written manuscript though the scribe appears to have omitted words at intervals with the intention of avoiding trouble. It is written on paper 29 leaves with 19 lines of 70 aksharas each.

D :—Manuscript belonging to the Government of Bombay being No. 1,162 of the year 1887-1890 of Dr. Bhandarkar's collections. This is a paper manuscript of 45 leaves, with 18 lines, of about 54 letters each. It is dated Saturday, 7th of Jeṣhta, Suda Samvat 1467 (1412 A.D.), and is written in Bhrugupura (Broach in the Bombay Presidency). The manuscript begins from fourth leaf. It is of the type of the manuscripts B and K. It is correct and best of the manuscripts seen by me. This manuscript, I presume, must have contained the Digambar version of the text in the first three leaves as it strikingly resembles manuscripts B and K. This manuscript did

not originally mark the number of Sûtras. It is very carefully revised and Sûtras are numbered afterwards besides containing a good पदच्छेद। This manuscript was obtained by me through the kindness of the Philological Secretary of the Asiatic Society. Unfortunately I received it after first three forms were published.

H :—I have named the commentary of Haribhadrasuri H. I have seen three copies of this work. It was commenced by Haribhadrasuri and finished by the pupil of Yashobhadrasuri. A full description as well as the question of the priority of this commentary and that of Siddhesena will be given in the introduction.

K:—Manuscript K belonging to Mr. Shankerlal, of Kapadvanja, Kaira District. This manuscript contains Bhâshya up to 42 pages and then begins a commentary of Siddhasena extending up to 337 leaves. The manuscript was dated but someone has erased the date. It is a manuscript written in the fourteenth century. It is very beautifully written and is corrected in some places by someone. This is tolerably a good manuscript.

P—is a printed copy of the original text giving a Svetâmbara version of the text. Bhâshya is not published. P is printed by Tattvavivechakasabhâ at Pânjerâ Pole, Ahmedâbâd.

S :—I have called the commentary of Siddhasena S. I have two copies of it. As far as possible, I have checked the text with the commentary. The commentary is Bhâshyânusari, *i.e.*, follows Bhâshya. It is rather a commentary on the Bhâshya itself.

U :—This is the copy of the commentary of Siddhasena belonging to the Bhandâra of Sheth Umabhai Hathising of Ahmedabad.

Besides these manuscripts, I have occasionally referred to other copies of both the text and the commentary of Siddhesena.

My sincerest thanks are due to Maharaja Anandasâgarjī, who has been kind enough to look over my manuscript as well as some of the proofs, and who has practically put his whole library at my disposal; and to my brother Vakil Dahyabhai Premchand, who was the first to put the idea of editing such a work in my mind.

Lastly, it was only through the assistance and advice of Professor Hermann Jacobi that I was able to do this work. It was he who instructed me in the art of editing. He has been kind enough to supervise and revise my text and has read the final proof. My sincerest thanks are due to him.

I must pay my highest tribute of respect to the custodians of manuscripts who have kindly placed them at my disposal.

I shall be obliged if the oriental scholars be pleased to communicate to me the mistakes that might have crept in, so that I may be able to give an addenda in the next fasciculus.

HAZAPATEL'S POLE.
AHMEDABAD.
BOMBAY PRESIDENCY.
26th April, 1903.

K. P. MODY.

॥ तत्त्वार्थाधिगमसूत्रम् ॥

॥ ॐ ॥

सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति ।
दुःखनिमित्तमपीदं तेन सुलब्धं भवति जन्म ॥१॥
जन्मनि कर्मक्लेशैरनु[1]बद्धे ऽस्मिंस्तथा प्रयतितव्यम् ।
कर्मक्लेशाभावो यथा भवत्येष परमार्थः ॥२॥
परमार्थालाभे वा दोषै[2]ष्वारम्भकस्वभावेषु ।
कुशलानुबन्ध[3]मेव स्यादनवद्यं यथा[4] कर्म ॥३॥
कर्माहितमिह चामुत्र चाधमतमो नरः समारभते ।
दृष्टफलमेव त्वधमो विमध्यमस्त्वभयफलार्थम् ॥४॥
परलोकहितायैव प्रवर्तते मध्यमः क्रियासु सदा ।
मोक्षायैव तु घटते विशिष्टमतिरुत्तमः पुरुषः ॥५॥
यस्तु[5] कृतार्थो ऽप्युत्तम[6]-मवाप्य धर्मं परेभ्य उपदिशति ।
नित्यं स उत्तमेभ्यो ऽप्युत्तम इति पूज्यतम एव[7] ॥६॥
तस्मादर्हति पूजामर्हन्नेवोत्तमोत्तमो लोके ।
देवर्षिनरेन्द्रेभ्यः पूज्येभ्योऽन्यसत्त्वानाम् ॥७॥

---

१ S सन्ततिवेष्टिते अनुबद्धे । २ S दोष = कषाय ।
३ S अनुबन्धं = प्रयोजनम् । ४ S तथा प्रवर्तितव्यम् यथा कुशलानुबन्धं कर्म स्यात् । ५ S तु = पुनः ।
६ S उत्तमं मोक्षफलमवाप्य कृतार्थो भवतीति । ७ S एवकारस्यार्थे ।

अभ्यर्चनाद्दर्हतां* मनःप्रसादस्ततः समाधिश्च ।
तस्मादपि निःश्रेयसमतो हि तत्पूजनं न्याय्यम् ॥८॥
तीर्थप्रवर्तनफलं यत्प्रोक्तं कर्म तीर्थकरनाम ।
तस्योदयात्कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्तयति ॥९॥
तत्त्वाभाव्यादेव प्रकाशयति भास्करो यथा लोकम् ।
तीर्थप्रवर्तनाय प्रवर्तते तीर्थकर एवम् ॥१०॥
यः शुभकर्मासेवनभावितभावो भवेष्वनेकेषु ।
जज्ञे ज्ञातेक्ष्वाकुषु[1] सिद्धार्थनरेन्द्रकुलदीपः ॥११॥
ज्ञानैः पूर्वाधिगतैरप्रतिपतितैर्मतिश्रुतावधिभिः ।
त्रिभिरपि शुद्धैर्युक्तः शैत्यद्युतिकान्तिभिरिवेन्दुः ॥१२॥
शुभसारसत्त्व[2]संहननवीर्यमाहात्म्यरूपगुणयुक्तः ।
जगति महावीर इति त्रिदशैर्गुणतः कृताभिख्यः ॥१३॥
स्वयमेव बुद्धतत्त्वः सत्त्वहिताभ्युद्यताऽचलितसत्त्वः ।
अभिनन्दितशुभसत्त्वः सेन्द्रैर्लोकान्तिकैर्देवैः[3] ॥१४॥
जन्मजरामरणार्तं जगदशरणमभिसमीक्ष्य निःसारम् ।
स्फीतमपहाय राज्यं शमाय धीमान्प्रवव्राज ॥१५॥
प्रतिपद्याशुभशमनं निःश्रेयससाधकं श्रमणलिङ्गम् ।
कृतसामायिककर्मा व्रतानि विधिवत्समारोप्य ॥१६॥

---

* Pronounce अरिहंतां metri causa. † A omits कर्म ।
‡ K लो ऽ ।

---

१ S ज्ञाता नाम क्षत्रियविशेषाः तेषामपि विशेषसंज्ञा इक्ष्वाकवः ।
२ S सारं प्रधानमिति । सत्त्वमवैक्लव्यम् ।
३ S सलोकान्तिकैरिन्द्रैरिति प्राप्ते सेन्द्रैरित्युक्तम् ।

सम्यक्त्वज्ञानचारित्रसंवरतपःसमाधिबलयुक्तः ।
मोहादीनि निहत्याशुभानि चत्वारि कर्माणि ॥१७॥
केवलमधिगम्य विभुः स्वयमेव ज्ञानदर्शनमनन्तम् ।
लोकहिताय कृतार्थोऽपि देशयामास तीर्थमिदम् ॥१८॥
द्विविधमनेकद्वादशविधं महाविषयममितगमयुक्तम्[१] ।
संसारार्णवपारगमनाय दुःखक्षयायालम् ॥१९॥
ग्रन्थार्थवचनपटुभिः प्रयत्नवद्भिरपि वादिभिर्निपुणैः ।
[२]अनभिभवनीयमन्यैर्भास्कर इव सर्वतेजोभिः ॥२०॥
कृत्वा त्रिकरणशुद्धं तस्मै परमर्षये नमस्कारम् ।
पूज्यतमाय भगवते वीराय विलीनमोहाय ॥२१॥
तत्त्वार्थाधिगमाख्यं बह्वर्थं संग्रहं लघुग्रन्थम् ।
वक्ष्यामि शिष्यहितमिममर्हद्वचनैकदेशस्य ॥२२॥
महतोऽतिमहाविषयस्य दुर्गमग्रन्थभाष्यपारस्य ।
कः शक्तः प्रत्यासं[३] जिनवचनमहोदधेः कर्तुम्[४] ॥२३॥
शिरसा गिरिं बिभित्सेदुच्चिक्षिपेच्च स क्षितिं दोर्भ्याम् ।
प्रतितीर्षेच्च समुद्रं मित्सेच्च पुनः कुशाग्रेण[५] ॥२४॥
व्योम्नीन्दुं चिक्रमिषेन्मेरुगिरिं* पाणिना चिकम्पयिषेत् ।
गत्वानिलं जिगीषेच्चरमसमुद्रं पिपासेच्च ॥२५॥

---

* K व्योम्नि प्रतिचंक्रमिषेन्मे° ।

---

१ S गम = नय ॥ २ S अनभिभवनीयमिदं तीर्थं देशयामास ॥
३ H प्रत्यासं = सङ्ग्रहम् ॥ ४ S यश्चैतत्प्रधारयेदसाविदमप्यध्यवसेत् ॥
५ S तमेव समुद्रं परिमाणाधिगमाय कुशाग्रेण मातुमिच्छेत् ॥

खद्योतकप्रभाभिः सोऽभिबुभूषेच्च भास्करं मोहात् ।
योऽतिमहाग्रन्थार्थं जिनवचनं संजिघृक्षेत* ॥ २ ६ ॥
एकमपि तु जिनवचनाद्यस्मान्निर्वाहकं[१] पदं भवति ।
श्रूयन्ते चानन्ताः सामायिकमात्रपदसिद्धाः ॥ २ ७ ॥
तस्मात्तत्[२]प्रामाण्यात् समासतो व्यासतश्च जिनवचनम् ।
श्रेय इति निर्विचारं[३] ग्राह्यं धार्यं च वाच्यं च[४] ॥ २ ८ ॥
न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति ॥ २ ९ ॥
अममविचिन्त्यात्मगतं तस्माच्छ्रेयः सदोपदेष्टव्यम् ।
आत्मानं च परं च हि हितोपदेष्टानुगच्छति ॥ ३ ० ॥
नर्ते च मोक्षमार्गाद्धितोपदेशोऽस्ति जगति कृत्स्नेऽस्मिन् ।
[५]तस्मात्परमिममेवेति मोक्षमार्गं प्रवक्ष्यामि ॥ ३ १ ॥
॥ इति सम्बन्धकारिकाः समाप्ताः ॥[६]

---

* B संजिघृक्षेत् ।

---

१ S सुगृहीतमप्यभ्यस्यमानमुत्तरोत्तरज्ञानकारणत्वाद्भवोत्तारकमित्यर्थः ॥
२ S आगम । ३ निःशंकम् ।
४ ग्राह्यमध्ययनश्रवणाभ्यां धार्यमनुप्रेक्षणादिभिः वाच्यमर्थविचारणादिभिः ॥
५ S उत्कृष्टम् । इमं हितोपदेशम् ॥
६ At the end of the commentary on these Kārikās S has the following verse: इतीयं कारिकाटीका ग्राह्यटीकाचिकीर्षुणा संदृब्धा देवगुप्तेन प्रीतिधर्मार्थिना सता ॥ Then he gives five verses as his introduction.

तत्त्वार्थाधिगमसूत्रम् ।

प्रथमोऽध्यायः ।



सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १ ॥

सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमित्येष* त्रिविधो मोक्षमार्गः । तं पुरस्ताल्लक्षणतो विधानतश्च विस्तरेणोपदेक्ष्यामः । शास्त्रानुपूर्वीविन्यासार्थं[१] तूद्देशमात्रमिदमुच्यते । एतानि च[२] समस्तानि मोक्षसाधनानि । एकतराभावेऽप्यसाधनानी‡त्यतस्त्रयाणां ग्रहणम् । एषां च पूर्वलाभे भजनीयमुत्तरं । उत्तरलाभे तु नियतः पूर्वलाभः । तच्च सम्यगिति प्रशंसार्थो निपातः समञ्चतेर्वा[३] भावः§ दर्शनमिति । [४]दृशेर्-

---

* B ०त्येव । † A & B तद्देश० ।

‡ K omits इति । § K भावे ।

---

१ S शास्त्रक्रमरचनार्थम् । अवश्यिष्टपदार्थाभिधानं उद्देशः ।

२ S च = हि ।

३ S व्युत्पत्तिपक्षेऽप्यर्थप्रदर्शनायाह समञ्चतेर्वा संपूर्वादञ्चतेस्साध्वेतद्रूपमित्यर्थः . . . समञ्चति गच्छति व्याप्नोति सर्वान्द्रव्यभावानिति सम्यग् . . . . वा शब्दो विकल्पप्रदर्शनाय एतस्मिंश्च पक्षे किलाधिगमसम्यग्दर्शनं कथितम् ।

४ H भावो दर्शनं दृशेः । अत्र० ।

व्यभिचारिणी सर्वेन्द्रियानिन्द्रियार्थप्राप्तिरेत*त्सम्यग्दर्शनं । प्रशस्तं दर्शनं सम्यग्दर्शनं† । संगतं वा दर्शनं सम्यग्दर्शनम् । एवं ज्ञानचारित्रयोरपि‡ ॥

तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥ २ ॥

तत्त्वानामर्थानां श्रद्धानं तत्त्वेन वार्थानां श्रद्धानं तत्त्वार्थ- 5
श्रद्धानम् तत् सम्यग्दर्शनम्§ । तत्त्वेन भावतो निश्चितमित्यर्थः । तत्त्वानि जीवादीनि वक्ष्यन्ते‖ । त एव चार्थास्तेषां श्रद्धानं तेषु प्रत्ययावधारणम् । तदेवं¶ प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं[१] तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति ॥ 10

तन्निसर्गादधिगमाद्वा ॥ ३ ॥

तदेतत्सम्यग्दर्शनं द्विविधं भवति । निसर्गसम्यग्दर्शनमधिगमसम्यग्दर्शनं च । निसर्गादधिगमाद्वोत्पद्यत इति द्विहेतुकं द्विविधम् ॥ निसर्गः परिणामः स्वभावः अपरोपदेश**इत्यनर्थान्तरम् । ज्ञानदर्शनोपयोगलक्षणो जीव इति वक्ष्यते†† । 15
तस्यानादौ संसारे परिभ्रमतः कर्मत एव कर्मणः स्वकृतस्य

---

* K तत् for एतत् । † K omits प्रशस्तं दर्शनं सम्यग्दर्शनं ।
‡ K omits अपि । § B om. तत् सम्यग्दर्शनं ।
‖ I. 4. ¶ B om.
** A om. B स्वपरो॰ perhaps S omits this. †† cf. II. 8.

---

१ लक्षणं = चिह्नं ।

बन्धनिकाचनोदयनिर्जरापेक्षं *नारकतिर्यग्योनिमनुष्यामरभवग्रहणेषु विविधं पुण्यपापफलमनुभवतो ज्ञानदर्शनोपयोगस्वाभाव्यात् तानि तानि परिणामाध्यवसायस्थानान्तराणि गच्छतोऽनादिमिथ्यादृष्टेरपि सतः परिणामविशेषात्पूर्वकरणं तादृग्भवति येनास्यानुपदेशात्सम्यग्दर्शनमुत्पद्यत इत्येतन्निसर्गसम्यग्दर्शनम्॥ अधिगमः अभिगमः आगमो निमित्तं श्रवणं शिक्षा उपदेश इत्यनर्थान्तरम्। तदेवं †परोपदेशाद्यत्तत्त्वार्थश्रद्धानं भवति तदधिगमसम्यग्दर्शनमिति॥

अत्राह। तत्त्वार्थश्रद्धानं सम्यग्दर्शनमित्युक्तम्‡। तच्च किं तत्त्व§मिति। अत्रोच्यते।

जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम्॥ ४॥

जीवा अजीवा आस्रवा॥ बन्धः संवरो निर्जरा मोक्ष इत्येष सप्तविधोऽर्थस्तत्त्वम्। एते वा सप्त पदार्थास्तत्त्वानि। तांल्लक्षणतो विधानतश्च पुरस्ताद्विस्तरेणोपदेक्ष्यामः॥

नामस्थापनाद्रव्यभावतस्तन्न्यासः॥ ५॥

एभिर्नामादिभिश्चतुर्भिरनुयोग[1]द्वारैस्तेषां जीवादीनां तत्त्वानां न्यासो भवति। विस्तरेण लक्षणतो विधानतश्चाधि-

---

* K नरक। † K puts यद् before परोपदे०।
‡ K तत्त्वं किमिति। § I. 2. ॥ B आश्रवो।

---

१ S अनुयोगः सकलगणिपिटकार्थोऽभिधीयते॥ तस्य द्वाराणि तस्यार्थस्याधिगमोपाया इत्यर्थः।

गमार्थं* न्यासो निक्षेप इत्यर्थः । तद्यथा † नामजीवः स्थापनाजीवो द्रव्यजीवो भावजीव इति । नाम संज्ञा कर्म इत्यनर्थान्तरम् । चेतनावतोऽचेतनस्य वा द्रव्यस्य जीव इति नाम क्रियते । स नामजीवः ॥ यः काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु स्थाप्यते जीव इति स स्थापनाजीवो देवताप्रतिकृतिवदिन्द्रो रुद्रः स्कन्दो विष्णुरिति ॥ द्रव्यजीव इति गुणपर्यायवियुक्तः प्रज्ञास्थापितोऽनादिपारिणामिकभावयुक्तो जीव‡ उच्यते । अथवा शून्योऽयं भङ्गः । यस्य ह्यजीवस्य सतो भव्यं जीवत्वं स्यात् स द्रव्यजीवः स्याद्§ निष्टं चैतत् ॥ भावतो जीवा औपशमिकक्षायिकक्षायोपशमिकौदयिकपारिणामिकभावयुक्ता उपयोगलक्षणाः संसारिणो मुक्ताश्च द्विविधा वक्ष्यन्ते‖ ॥ एवमजीवादिषु¶ सर्वेष्वनुगन्तव्यम् ॥

पर्यायान्तरेणापि नामद्रव्यं स्थापनाद्रव्यं द्रव्यद्रव्यं भावतो द्रव्यमिति । यस्य जीवस्य **वा जीवस्य वा नाम क्रियते द्रव्यमिति तन्नामद्रव्यम् । यत्काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु स्थाप्यते द्रव्यमिति तत्††स्थापनाद्रव्यं देवताप्रतिकृतिवदिन्द्रो रुद्रः स्कन्दो विष्णुरिति । द्रव्यद्रव्यं नाम ‡‡गुणपर्यायवियुक्तं प्रज्ञास्थापितं धर्मादीनामन्यतमत् । केचिदप्याहुर्यद्द्रव्यतो द्रव्यं

---

* B अधिगमाय । † K adds यस्य । ‡ K द्रव्यजीव for जीव।
§ K omits स्यात् । ‖ II. 10. ¶ K adds अपि ।
** K omits वा । †† K omits तत् ।
‡‡ B adds सर्व० । K adds स सद्० ।

भवति* तच्च पुद्गलद्रव्यमेवेति प्रत्येतव्यम्। अणवः स्कन्धाश्च सङ्घातभेदेभ्य उत्पद्यन्ते† इति वक्ष्यामः। भावतो-द्रव्याणि धर्मादीनि सगुणपर्यायाणि‡ प्राग्निर्लक्षणानि वक्ष्यन्ते। आगमतश्च प्राभृतज्ञो द्रव्यमिति भव्यमाह। द्रव्यं च भव्ये। भव्यमिति§ प्राप्यमाह। भू प्राप्तावात्मनेपदी‖। तदेवं प्राप्यन्ते प्राप्नुवन्ति¶ वा द्रव्याणि॥ एवं सर्वेषामनादीनामादिमतां च जीवादीनां भावानां** मोक्षान्तानां†† तत्त्वाधिगमार्थं न्यासः कार्य इति॥

प्रमाणनयैरधिगमः॥ ६॥

एषां च जीवादीनां तत्त्वानां यथोद्दिष्टानां‡‡ नामादिभिर्न्यस्तानां§§ प्रमाणनयैर्विस्ताराधिगमो भवति॥ तच्च प्रमाणं द्विविधं परोक्षं प्रत्यक्षं च वक्ष्यते‖‖। चतुर्विधमित्येके। नयवादान्तरेण॥ नयाश्च¶¶ नैगमादयो वक्ष्यन्ते*** ॥

किं चान्यत्।

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः॥ ७॥

---

* K भवतीति। † V. 25, 26. ‡ cf. V. 38.
§ K adds च। ‖ K पदीति। ¶ K adds इति।
** H K omit भावानां। †† S omits this. ‡‡ K यथोपदिष्टानां।
§§ MSS have न्यस्तानामित्यधिगमोपायार्थमुपचिन्वानामित्यर्थः। H considers this to be the part of the text. ‖‖ I. 10 11
¶¶ H K adds पञ्च। *** I. 35.

एभिश्च निर्देशादिभिः षड्भिरनुयोगद्वारैः सर्वेषां भावानां जीवादीनां तत्त्वानां विकल्पशो विस्तरेणाधिगमो भवति। तद्यथा। **निर्देशः**[१]। को जीवः। औपशमिकादिभावयुक्तो द्रव्यं जीवः।

सम्यग्दर्शनपरीक्षायां। किं सम्यग्दर्शनं द्रव्यं। सम्यग्दृष्टिजीवो*ऽरूपी नो स्कन्धो नो ग्रामः॥ **स्वामित्वं**। कस्य सम्यग्दर्शनमित्येतदात्मसंयोगेन परसंयोगेनोभयसंयोगेन चेति वाच्यम्। आत्मसंयोगेन जीवस्य सम्यग्दर्शनम्। परसंयोगेन जीवस्याजीवस्य जीवयोरजीवयोर्जीवानामजीवानामिति विकल्पाः†। उभयसंयोगेन‡ जीवस्य§ नोजीवस्य जीवयोरजीवयोर्जीवानामजीवानामिति॥ विकल्पा न सन्ति शेषाः[२] सन्ति॥ **साधनं**। सम्यग्दर्शनं केन भवति। निसर्गादधिगमाद्वा

---

* H K •ष्टिर्जीवो। † K om. ‡ K adds च।

§ C जीवस्य नोजीवयोरजीवस्य जीवयो जीवानां, B जीवस्य नोजीवस्य जीवयोः नोजीवयोः जीवानाम्।

॥ K जीवयोर्नोजीवयोर्जीवानां नोजीवानामिति।

---

१ S निश्चयेनोपयुज्यते प्रस्तुते वस्तुनि स निर्देशः।

२ S जीवस्य जीवस्य। जीवस्य जीवयोः। जीवस्य जीवानाम्। जीवस्याजीवस्य। जीवस्याजीवयोः। जीवस्याजीवानाम्। षडित्यर्थः। K gives these as part of भाष्य and adds एते च विकल्पा क्वचिद् भाष्ये न दृश्यन्ते॥

भवतीत्युक्तम्* । तत्र निसर्गः पूर्वोक्तः । अधिगमस्तु सम्यग्व्यायामः[१] । उभयमपि तदावरणीयस्य कर्मणः क्षयेणोपशमेन क्षयोपशमाभ्यामिति ॥ **अधिकरणं** त्रिविधं आत्मसन्निधानेन परसन्निधानेनोभयसन्निधानेनेति वाच्यम्† । आत्मसन्निधानमभ्यन्तरसन्निधानमित्यर्थः । परसन्निधानं बाह्यसन्निधानमित्यर्थः । उभयसन्निधानं बाह्याभ्यन्तरसन्निधानमित्यर्थः‡ । कस्मिन्सम्यग्दर्शनं । आत्मसन्निधाने तावत्§ जीवे सम्यग्दर्शनं जीवे ज्ञानं जीवे चारित्रमित्येतदादि । बाह्यसन्निधाने‖ जीवे सम्यग्दर्शनं नोजीवे¶ सम्यग्दर्शनमिति यथोक्ता विकल्पाः । उभयसन्निधाने **चाक्षुषाः सङ्घातास्च†† यथोक्ता भङ्गविकल्पा इति‡‡ ॥ **स्थितिः** । सम्यग्दर्शनं कियन्तं कालम् । सम्यग्दृष्टिर्द्विविधा । सादिः सपर्यवसाना सादिरपर्यवसाना च । सादि सपर्यवसानमेव च§§ सम्यग्दर्शनम् । तज्जघन्येनान्तर्मुहूर्तं उत्कृष्टेन||| षट्षष्टिः सागरोपमाणि साधिकानि । सम्यग्दृष्टिः सादिरपर्यवसाना । सयोगः शैलेशीप्राप्तश्च केवली सिद्धश्चेति ॥

---

* I. 3. † K om. ‡ C & S om.
§ B भवेत् । ‖ K बाह्यसन्निधानेन । ¶ K नोजीवस्य ।
** K °धानेनाप्य० । †† K भूताश्च । ‡‡ K om.
§§ K तु for च । ||| K adds तु ।

---

१ S गुर्वादिसमीपाध्यासिनः शुभा या क्रिया सम्यग्दर्शनोत्पादने या शक्ता सा सम्यग्व्यायाम इत्युच्यते ।

विधानं हेतुभेदाद्विविधात्* †क्षयादिविविधं‡ सम्यग्दर्शनम् । तदावरणीयस्य कर्मणो दर्शनमोहस्य च क्षयादिभ्यः । तद्यथा । क्षयसम्यग्दर्शनं उपशमसम्यग्दर्शनं क्षयोपशमसम्यग्दर्शनमिति । अत्र चौपशमिकक्षायोपशमिकक्षायिकाणां परतः परतो विशुद्धिप्रकर्षः ॥

किं चान्यत् ।

सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥ ८ ॥

सत् संख्या क्षेत्रं स्पर्शनं कालः अन्तरं भावः अल्पबहुत्वमित्येतैश्च सद्भूत§पदप्ररूपणादिभिरष्टाभिरनुयोगद्वारैः सर्वभावानां विकल्पशो विस्तराधिगमो भवति । कथमिति चेदुच्यते । **सत्** सम्यग्दर्शनं किमस्ति ॥नास्त्यस्तीत्युच्यते । क्वास्तीति चेदु¶च्यते । अजीवेषु तावन्नास्ति** । जीवेषु तु†† भाज्यम्‡‡ । तद्यथा । गतीन्द्रियकाययोगकषायवेदलेश्यासम्यक्त्वज्ञानदर्शनचारित्राहारोपयोगेषु क्षयोदयक्षयानुयोगद्वारेषु यथासम्भवं सद्भूत§§प्ररूपणा कर्तव्या ॥ **संख्या** । कियत्सम्यग्दर्शनं किं संख्येयमसंख्येयमनन्तमिति । उच्यते । असंख्येयानि

---

* H K हेतुभेदाद्विविधात्तु विविधम् । † K adds विविधं च । ‡ K om. § K adds तत्त्वानां । ‖ B नास्तीति क्वास्तीत्युच्यते । ¶ K omits चेदु । ** K नास्तीति †† K omits तु । ‡‡ K भजनीयम् । §§ K adds सद्भूतपदप्रक० ।

---

१ S सद्भूत = विद्यमानार्थ ।

सम्यग्दर्शनानि । सम्यग्दृष्टयस्त्वनन्ताः ॥ **क्षेत्रम्** । सम्यग्दर्शनं कियति क्षेत्रे । लोकस्यासंख्येयभागे ॥ **स्पर्शनम्** । सम्यग्दर्शनेन किं स्पृष्टम् । लोकस्यासंख्येयभागः*। सम्यग्दृष्टिना तु सर्वलोक इति ॥ अत्राह सम्यग्दृष्टिसम्यग्दर्शनयोः कः प्रतिविशेष इति । †उच्यते । अपायसद्व्यतया सम्यग्दर्शनमपाय आभिनिबोधिकम् । तद्योगात्सम्यग्दर्शनम् । तत्केवलिनो नास्ति । तस्मान्न केवली सम्यग्दर्शनी सम्यग्दृष्टिस्तु‡ ॥ **कालः** । सम्यग्दर्शनं कियन्तं कालमित्युच्यते । तदेकजीवेन नानाजीवैश्च परीत्यम् । तद्यथा । एकजीवं प्रति जघन्येनान्तर्मुहूर्तं उत्कृष्टेन षट्षष्टिः सागरोपमाणि साधिकानि । नानाजीवान् प्रति सर्वाद्धा[1] ॥ **अन्तरम्** । सम्यग्दर्शनस्य को विरहकालः । एकं जीवं॥ प्रति जघन्येनान्तर्मुहूर्तं उत्कृष्टेन उपार्धपुद्गलपरिवर्तः । नानाजीवान् प्रति नास्त्यन्तरम् ॥ **भावः** । सम्यग्दर्शनमौपशमिकादीनां भावानां कतमो भाव उच्यते । औदयिकपारिणामिकवर्जं त्रिषु भावेषु भवति ॥ **अल्पबहुत्वम्** । अत्राह सम्यग्दर्शनानां त्रिषु भावेषु वर्तमानानां किं तुल्यसंख्यत्वमाहोस्विदल्पबहुत्वमस्तीति । उच्यते**। सर्वस्तोकमौपशमिकम् । ततः क्षायिकमसंख्येयगुणम् । ततोऽपि क्षायोपशमिकमसंख्येयगुणम् ।

---

* C adds अष्टौ चतुर्दशभागा देशोनाः । † H K अथोच्यते ।
‡ C adds भवति । § K कालमुच्यते । ‖ K एकजीवं ।
¶ K तुल्यसंख्यात्वं । ** K adds भाव before उच्यते ।

---

१ सर्वकालम् ।

सम्यग्दृष्टयस्त्वनन्तगुणा इति ॥ एवं सर्वभावानां नामादिभिर्न्यासं कृत्वा प्रमाणादिभिरभिगमः* कार्यः ॥

उक्तं सम्यग्दर्शनम्। ज्ञानं वक्ष्यामः।

मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम् ॥ ९ ॥

मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानमित्येतन्मूलविधानतः पञ्चविधं ज्ञानम्। प्रभेदाःस्वस्य[1] पुरस्ताद्वक्ष्यन्ते† ॥

तत्प्रमाणे ॥ १० ॥

तदेतत्पञ्चविधमपि ज्ञानं द्वे प्रमाणे भवतः परोक्षं प्रत्यक्षं च ॥

आद्ये परोक्षम् ॥ ११ ॥

आदौ भवमाद्यम्। आद्ये सूत्रक्रमप्रामाण्यात् प्रथमद्वितीये ग्राह्ये[2]। तदेवमाद्ये मतिज्ञानश्रुतज्ञाने परोक्षं प्रमाणं भवतः। कुतः। निमित्तापेक्षत्वात्। [3]अपायसद्व्यतया मतिज्ञानम्।

---

* H K ०रधिगमः। † K adds तच।

---

१ S मतिज्ञानस्यावग्रहादयः श्रुतस्यांगानंगप्रविष्टादयोऽवधिज्ञानस्य भवप्रत्ययादयो मनःपर्यायज्ञानस्य ऋजुमत्यादयः केवलज्ञानस्य तु न सन्त्येव।

२ S ग्राह्यौति च ग्रन्थकार एव द्विधात्मानं विभज्य सूत्रभाष्यकारकारेणैवमाह ग्राह्यौति सूत्रकार इति।

३ S अपायस्य सद्द्रव्याणि च तेषां भावः तया। सद्द्रव्यतयेत्यनेनार्थतः इदं कथ्यते सम्यग्दृष्टेर्योऽपायांश इति।

तदिन्द्रियानिन्द्रियनिमित्तमिति* वक्ष्यते ॥ तत्पूर्वकत्वात्परोपदेशजत्वाच्च श्रुतज्ञानम् ॥

प्रत्यक्षमन्यत् ॥ १२ ॥

मतिश्रुताभ्यां यदन्यत् त्रिविधं ज्ञानं तत्प्रत्यक्षं प्रमाणं भवति। कुतः। अतीन्द्रियत्वात्। प्रमीयन्तेऽर्थास्तैरिति प्रमाणानि[1] ॥ अत्राह। इह अवधारितं द्वे एव प्रमाणे प्रत्यक्षपरोक्षे इति। अनुमानोपमानागमार्थापत्तिसम्भवाभावानपि च प्रमाणानीति केचिन्मन्यन्ते। †तत्कथमेतदिति। अत्रोच्यते। सर्वाण्येतानि मतिश्रुतयोरन्तर्भूतानीन्द्रियार्थसन्निकर्षनिमित्तत्वात्[2]। किं चान्यत्। अप्रमाणान्येव वा। कुतः। मिथ्यादर्शनपरिग्रहाद्विपरीतोपदेशाच्च। मिथ्यादृष्टेर्हि मतिश्रुतावधयो नियतमज्ञानमेवेति वक्ष्यते‡। [3]नयवादान्तरेण

* I. 14. † K omits तत्। ‡ I. 32.

१ S बहुवचनं व्यक्तिपक्षसमाश्रयणादिति।

२ S इन्द्रियाणि चक्षुरादीनि तेषामर्था रूपादयः इन्द्रियाणि चार्थाश्च इन्द्रियार्थाः तेषां सन्निकर्षः संबन्धः। स निमित्तं यस्य अनुमानादेस्तत्।

३ S यस्मान्मिथ्यादृष्टेरज्ञानं वक्ष्यते। यद्येवं कथं तर्हि मतिश्रुतयोरन्तर्भूतानीत्युक्तमुच्यते। नयवादमाश्रित्यैतदुक्तं। ..... नयानां वादः स्वरुचितार्थप्रकाशनं तस्मान्नयवादान्तरं भेदो तेनैवम्। यथा मतिश्रुतयोर्विकल्पा भेदास्तेभ्यो जायन्त इति मतिश्रुतविकल्पजानि भवन्ति यथा तथा परस्तान्नयविचारणायां वक्ष्याम इति शब्दनयस्य हि मिथ्यादृष्टिरज्ञो वा नास्तीति वक्ष्यते तन्मतेन तु प्रमाणानीति।

तु यथा मतिश्रुतविकल्पजानि भवन्ति तथा परस्ताद्-वक्ष्यामः* ॥

अत्राह । उक्तं भवता मत्यादीनि ज्ञानानि उद्दिश्य तानि विधानतो लक्षणतश्च परस्तादिस्तरेण वक्ष्याम इति । तदुच्यता-मिति । अत्रोच्यते ।

मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम् ॥ १३ ॥

मतिज्ञानं स्मृतिज्ञानं संज्ञाज्ञानं चिन्ताज्ञानं आभिनि-बोधिकज्ञानमित्यनर्थान्तरम् ॥

तदिन्द्रियानिन्द्रियनिमित्तम् ॥ १४ ॥

तदेतन्मतिज्ञानं द्विविधं भवति । इन्द्रियनिमित्तमनि-न्द्रियनिमित्तं च[1] । तत्रेन्द्रियनिमित्तं स्पर्शनादीनां पञ्चानां स्पर्शादिषु पञ्चस्वेव स्वविषयेषु । अनिन्द्रियनिमित्तं मनोवृत्ति-रोघ[2]ज्ञानं च ।

अवग्रहेहापायधारणाः ॥ १५ ॥

तदेतन्मतिज्ञानमुभयनिमित्तमप्येकग्रहणतुर्विधं भवति ।

---

* I. 35. † I. 9. p. 14. Line. 7.

---

१ S च शब्दात्क्षयोपशमनिमित्तमिति । स क्षयोपशमस्सर्वसाधारण इति कृत्वा न पठितश्च शब्देन वा संगृहीतः ।

२ S ओघ = सामान्यं अप्रविभक्तरूपम् ।

तद्यथा*। अवग्रह ईहापायो धारणा चेति। तत्राव्यक्तं[१] यथास्वमिन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः। अवग्रहो ग्रहणमालोचनमवधारणमित्यनर्थान्तरम्॥ अवगृहीते विषयार्थैकदेशाच्छेषानुगमनं निश्चयविशेषजिज्ञासा[२]† ईहा। ईहा ‡ऊहा तर्कः परीक्षा विचारणा जिज्ञासेत्यनर्थान्तरम्॥ अवगृहीते विषये सम्यगसम्यगिति गुणदोषविचारणाध्यवसायापनोदोऽपायः। अपायोऽपगमः अपनोदः अपव्याधः अपेतमपगतमपविद्धमपनुत्तमित्यनर्थान्तरम्॥ [३]धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च। धारणा प्रतिपत्तिरवधारणमवस्थानं निश्चयोऽवगमः अवबोध इत्यनर्थान्तरम्॥

बहुबहुविधक्षिप्रानिश्रितानुक्तध्रुवाणां सेतराणाम्॥ १६॥

अवग्रहादयश्चत्वारो मतिज्ञानविभागा एषां बह्वादीनामर्थानां सेतराणां भवन्त्येकशः। सेतराणामिति सप्रतिपक्षाणामि-

---

* K यथा only. S perhaps omits. † K, H add चेष्टा।

‡ S perhaps adds चेष्टा।

§ K omits these three, and has अपनुन्न for अपनुत्त।

|| Var. S °निश्रितानिश्चितध्रुवाणाम्।

---

१ S तत्रेति चतुर्ष्ववग्रहादिषु प्रक्रान्तेषु।

२ H जिज्ञासया चेष्टा बोधखतत्त्वात्मव्यापाररूपा ईहोच्यते।

३ S धारणा इति लक्ष्यं प्रतिपत्तिर्यथास्वमित्यनेनाद्यभेदं दर्शयति। मत्यवस्थानमित्यनेन द्वितीयां लब्धिरूपां धारणां कथयति। अवधारणं चेत्यनेन तृतीयं भेदं कथयति।

त्यर्थः । *बह्ववग्रहाति† अल्पमवग्रहाति[१] । बहुविधमवग्रहाति एकविधमवग्रहाति । क्षिप्रमवग्रहाति चिरेणावग्रहाति । अनिश्रितमवग्रहाति निश्रित[२]मवग्रहाति । अनुक्तमवग्रहाति उक्तमवग्रहाति[३] । ध्रुवमवग्रहाति अध्रुवमवग्रहाति‡ इत्येवमीहादीनामपि विद्यात् ॥ 5

अर्थस्य ॥ १७ ॥

अवग्रहादयो मतिज्ञानविकल्पा अर्थस्य भवन्ति ॥

व्यञ्जनस्यावग्रहः ॥ १८ ॥

व्यञ्जनस्यावग्रह एव भवति नेहादयः । एवं द्विविधोऽवग्रहो व्यञ्जनस्यार्थस्य च । ईहादयस्त्वर्थस्यैव ॥ 10

---

* K, H add तद्यथा । † K बहुमव० । ‡ K विन्द्यात् ।

---

१ S एवं औपचारिको (व्यावहारिको) ऽवग्रहस्तमङ्गीकृत्य बह्ववग्रहातीत्येतदुच्यते । न त्वेकसमयवर्तिनं नैश्चयिकम् । H तत्र बहुमवग्रहाति वेणुवीणामृदङ्गपटहध्वनिसमुदयं श्रोत्रेणापश्मोत्कर्षात् । कथमेतद्विनिश्चीयते । उत्तरकालं तथा अपायादिदर्शनात् । न ह्यसत्यवग्रहभेदे स तथाविधो युक्तोऽतिप्रसङ्गात् । व्यावहारिकावग्रहमपेक्ष्यैवमुक्तमित्यन्ये । स ह्यपाय एवोत्तरेहाद्यपेक्षयावग्रह इति ॥

२ S निश्रितो लिङ्गप्रमितो ऽभिधीयते । H अनिश्रितं वेण्वादिशब्दमन्यनिरपेक्षमेव शब्दादिना मेरीशब्दग्रहणवदिति वृद्धव्याख्या ॥

३ S says that the text is उक्तमवग्रहाति अनुक्तमवग्रहाति but others through fear of अव्याप्तिदोष substitute निश्चितमवग्रहाति and अनिश्चितमवग्रहाति । H संदिग्धमवग्रहाति असंदिग्धमवग्रहाति & explains असंदिग्धं to mean निश्चितम् ॥

न चक्षुरनिन्द्रियाभ्याम् ॥ १९ ॥

चक्षुषा नोइन्द्रियेण च व्यञ्जनावग्रहो न भवति। चतुर्भिरिन्द्रियैः शेषैर्भवतीत्यर्थः। एवमेतन्मतिज्ञानं द्विविधं[१] चतुर्विधं अष्टाविंशतिविधं अष्टषष्ट्युत्तरशतविधं षट्त्रिंशत्त्रिशतविधं च भवति ॥

अत्राह। यद्येवमल्पावन्मतिज्ञानम्। अथ श्रुतज्ञानं किमिति। अत्रोच्यते ॥

श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम् ॥ २० ॥

श्रुतज्ञानं मतिज्ञानपूर्वकं[२] भवति। श्रुतमाप्तवचनमागम उपदेश ऐतिह्यमाम्नायः प्रवचनं जिनवचनमित्यनर्थान्तरम्। *तद्द्विविधमङ्गबाह्यमङ्गप्रविष्टं च। तत्पुनरनेकविधं द्वादशविधं च यथासङ्ख्यम्। अङ्गबाह्यमनेकविधम्। तद्यथा। सामायिकं

* H K तदेतद्द्विविध॰।

१ S H द्विविधमिति इन्द्रियनिमित्तमनिन्द्रियनिमित्तं च। चतुर्विधमवग्रहादिभेदतः। अष्टाविंशतिविधमिति स्पर्शनादीनां मनःपर्यवसानानां षण्णामेकैकस्य चत्वारो भेदा अवग्रहादयस्ते समुदिताः सर्वेऽपि चतुर्विंशतिरुपजातास्ततश्चक्षुर्मनोवर्जः स्पर्शनादीनां यो व्यञ्जनानामवग्रहश्चतुर्भेदः स प्रक्षिप्यतेततोऽष्टाविंशतिविधं भवति। अष्टषष्ट्युत्तरशतविधमिति तस्या एवाष्टाविंशतेरेकैको भेदः षड्विधो भवति बह्वादिभेदेन। षट्त्रिंशत्त्रिशतविधमिति तस्या एवाष्टाविंशतेरेकैको भेदो द्वादशधा भवति सेतरबह्वादिद्वादशकेन ॥

२ S अपेक्षाकारणं चेह पूर्वमित्यनेनोच्यते ॥ H युगपदेव मतिश्रुतयोर्लब्धिरुत्कर्षं मतिपूर्वकत्वं। उच्यते। उपयोगापेक्षया श्रुतोपयोगो मतिनिमित्त इत्यर्थः ॥

चतुर्विंशतिस्तवो वन्दनं प्रतिक्रमणं कायव्युत्सर्गः[१]* प्रत्याख्यानं दशवैकालिकं उत्तराध्यायाः† दशाः[२] कल्पव्यवहारौ निशीथमृषि[३]भाषितान्येवमादि॥ **अङ्गप्रविष्टं** द्वादशविधम्। तद्यथा। आचारः सूचकृतं स्थानं समवायः व्याख्याप्रज्ञप्तिः ज्ञातधर्मकथाः§ उपासकाध्ययनदशाः अन्तकृद्दशाः अनुत्तरौपपातिकदशाः प्रश्नव्याकरणं विपाकसूत्रं दृष्टिपात[४] इति॥ आचाह। मतिज्ञानश्रुतज्ञानयोः कः प्रतिविशेष इति। आचोच्यते। उत्पन्नाविनष्टार्थग्राहकं साम्प्रतकालविषयं मतिज्ञानम्। श्रुतज्ञानं तु त्रिकालविषयं उत्पन्नविनष्टानुत्पन्नार्थग्राहकम्॥ आचाह। गृहीमो॥ मतिश्रुतयोर्नानात्वम्। अथ श्रुतज्ञानस्य द्विविधमनेकद्वादशविधमिति किं कृतः प्रतिविशेष इति। आचोच्यते। वक्तृविशेषाद्द्वैविध्यम्। यद्भगवद्भिः सर्वज्ञैः सर्वदर्शिभिः पर-

---

* B कायोत्सर्गः। † S com. उत्तराध्ययनानि।

‡ MSS. •नौत्ये•। § K ज्ञाताधर्मकथा।

॥ K गृहीमस्त्रावत्।

---

१ S H कृतस्य पापस्य यत्र कायपरित्यागेन क्रियमाणेन विशुद्धिराख्यायते स कायव्युत्सर्गः॥

२ S H पूर्वेभ्य आनीय सङ्घसन्ततिहिताय स्थापितान्यध्ययनानि दशा उच्यन्ते। दशा इति वावस्थावचनः शब्दः काचित्प्रतिविशिष्टावस्थायतीनां यासु वर्ण्यते ता दशा इति॥

३ S H ऋषिभिर्भाषितानि प्रत्येकबुद्धादिभिः कापिलीयादीनि॥

४ S H दृष्टिनामाज्ञानिकादीनां यत्र प्ररूपणा कृता स दृष्टिवादः तासां वा तत्र पातः॥

मर्षिभिरर्हद्भिस्तत्त्वाभाव्यात्परमशुभस्य च प्रवचनप्रतिष्ठापनफलस्य तीर्थकरनामकर्मणोऽनुभावादुक्तं भगवद्भिर्गणधरैर्दृब्धं तदङ्गप्रविष्टम् । गणधरानन्तर्यादिभिस्तत्यन्तविशुद्धागमैः परमप्रकृष्टवाङ्मतिशक्तिभिराचार्यैः कालसंहननायुर्दोषादल्पशक्तीनां शिष्याणामनुग्रहाय यत्प्रोक्तं तदङ्गबाह्यमिति ॥ सर्वज्ञप्रणीतत्वादानन्त्याच्च ज्ञेयस्य श्रुतज्ञानं मतिज्ञानान्महाविषयम् । तस्य[1] च महाविषयत्वात्तांस्तानर्थानधिकृत्य प्रकरणसमाप्त्यपेक्षमङ्गोपाङ्गनानात्वम् । किं चान्यत् । सुखग्रहणधारणविज्ञानापोह[2]प्रयोगार्थं* च । अन्यथा ह्यनिबद्धमङ्गोपाङ्गशः समुद्रप्रतरणवदुरध्यवसेयं स्यात् । एतेन[3] पूर्वाणि वस्तूनि प्राभृतानि प्राभृतप्राभृतानि अध्ययनान्युद्देशाश्च† व्याख्याताः ॥ अत्राह । मतिश्रुतयोस्तुल्यविषयत्वं वक्ष्यति‡ । द्रव्येष्वसर्वपर्यायेष्विति । तस्मादेकत्वमेवास्त्विति । अत्रोच्यते । उक्तमेतत् सान्प्रतकालविषयं मतिज्ञानं श्रुतज्ञानं तु त्रिकालविषयं विशुद्धतरं चेति§ । किं चान्यत् । मतिज्ञानमिन्द्रियानिन्द्रियनिमित्तमात्मनो ज्ञस्वाभाव्यात्पारिणामिकम् । श्रुतज्ञानं तु तत्पूर्वकमाप्तोपदेशाद्भवतीति ॥

---

* K ०विज्ञानेहापोहप्रयोगार्थं० ।

† H K ०न्युद्देशाः पदानि च व्याख्यातानि । ‡ I. 27. § S C च only.

---

१ S H तस्य = श्रुतस्य । तांस्तानर्थानधिकृत्य जीवादीनाश्रित्य ॥

२ S H अपोहं = निश्चयं ।

३ S H एतेनाङ्गोपाङ्गभेदप्रयोजनेन सुखग्रहणादिना ॥

अत्राह । उक्तं श्रुतज्ञानम् । अथावधिज्ञानं किमिति* । अत्रोच्यते ॥

द्विविधोऽवधिः ॥ २१ ॥

भवप्रत्ययः क्षयोपशमनिमित्तश्च ॥

तत्र

भवप्रत्ययो नारकदेवानाम् ॥ २२ ॥

नारकाणां देवानां च यथास्वं भवप्रत्ययमवधिज्ञानं भवति। भवप्रत्ययं भवहेतुकं† भवनिमित्तमित्यर्थः। तेषां‡ हि भवोत्पत्तिरेव तस्य हेतुर्भवति पक्षिणामाकाशगमनवत् न शिक्षा न तप इति ॥§

यथोक्तनिमित्तः षड्विकल्पः शेषाणाम् ॥ २३ ॥

यथोक्तनिमित्तः क्षयोपशमनिमित्त इत्यर्थः। तदेतदवधिज्ञानं क्षयोपशमनिमित्तं षड्विधं भवति शेषाणाम्। शेषाणामिति नारकदेवेभ्यः शेषाणाम् तिर्यग्योनिजानां मनुष्याणां च। अवधिज्ञानावरणीयस्य कर्मणः क्षयोपशमाभ्यां भवति षड्विधम्। तद्यथा। अनानुगामिकं आनुगामिकं हीयमानकं वर्धमानकं अनवस्थितं अवस्थितमिति। तत्रानानुगामिकं यत्

---

* B किं यदस्यानन्तरमुद्दिष्टमिति।

† H omits भवहेतुकम्।

‡ K तथा for तेषाम्।

§ K adds इति।

क्षेत्रे स्थितस्योत्पन्नं ततः प्रच्युतस्य प्रतिपतति प्रश्नादेशः[1]पुरुष-ज्ञानवत् ॥ **आनुगामिकं** यत्र क्वचिदुत्पन्नं क्षेत्रान्तरगतस्यापि न प्रतिपतति भास्करप्रकाशवत् घटरूपभाववच्च* ॥ **हीयमानकं** असंख्येयेषु द्वीपेषु समुद्रेषु पृथिवीषु विमानेषु तिर्यगूर्ध्वमधो† यदुत्पन्नं क्रमशः संक्षिप्यमाणं प्रतिपतति आ [2]अङ्गुला-संख्येयभागात् प्रतिपतत्येव वा‡ [3]परिच्छिन्नेन्धनोपादानसंतत्यग्नि-शिखावत् ॥ **वर्धमानकं** यदङ्गुलस्यासंख्येयभागादिषूत्पन्नं वर्धते आ सर्वलोकात् अधरोत्तरारणिनिर्मथनोत्पन्नो[4]पात्तशुष्कोप-चीयमानाधीयमानेन्धनराशग्निवत् ॥ **अनवस्थितं** हीयते वर्धते च वर्धते हीयते च प्रतिपतति चोत्पद्यते§ चेति पुनः पुनरूर्मिवत् ॥ **अवस्थितं** यावति क्षेत्रे उत्पन्नं भवति ततो

---

* S वा for च । † B adds वा ।
‡ K omits वा । § C चोत्पतति ।

---

१ S H अथवा प्रश्नादेशः प्रधानपुरुषस्तन्निष्ठस्तत्परायणस्तस्य ज्ञानं तद्वदिति । का पुनर्भावना । यथा नैमित्तकः कश्चिदादिशन्कस्मिंश्चिदेव स्थाने शक्नोति संवादयितुं न सर्वत्र पृच्छ्यमानमर्थमेवं तदप्यवधिज्ञानं यत्र स्थितस्योत्पन्नं तत्रस्थ एवोपलभते तेन नान्यत्रेति ॥

२ S H अङ्गुलशब्दस्य परिभाषितो ऽर्थो दृश्यः ॥

३ S परिच्छिन्ना इन्धनोपादानसन्ततिर्यस्यामग्निशिखायां सा परिच्छि-न्नेन्धनोपादानसन्तत्यग्निशिखा । परितः सर्वासु दिक्षु छिन्ना परिछिन्ना । इन्धनस्य नैरन्तर्येण प्रेक्षपः ॥

४ S उपात्तं प्रक्षिप्तं । उपचीयमानो वृद्धिं गच्छन्नित्यर्थः । आधीय-मानः प्रक्षिप्यमाणः ॥

न प्रतिपतत्या केवलप्राप्तेः* आ भवक्षयाद्वा जात्यन्तरस्थायि वा भवति लिङ्गवत् ॥

उक्तमवधिज्ञानम् । मनःपर्यायज्ञानं वक्ष्यामः ।

ऋजुविपुलमती मनःपर्यायः ॥ २४ ॥

मनःपर्यायज्ञानं द्विविधम् । ऋजुमतिमनःपर्यायज्ञानं विपुलमतिमनःपर्यायज्ञानं च ॥

अत्राह । कोऽनयोः प्रतिविशेष इति । अत्रोच्यते ।

विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ २५ ॥

विशुद्धिकृतश्चाप्रतिपातकृतश्चानयोः प्रतिविशेषः । तद्यथा । ऋजुमतिमनःपर्यायाद्विपुलमतिमनःपर्यायज्ञानं विशुद्धतरम् । किं चान्यत् । ऋजुमतिमनःपर्यायज्ञानं प्रतिपतत्यपि भूयो[१] विपुलमतिमनःपर्यायज्ञानं तु न प्रतिपततीति ॥

अत्राह । अथावधिमनःपर्यायज्ञानयोः कः प्रतिविशेष इति । अत्रोच्यते ।

विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्याययोः ॥ २६ ॥

विशुद्धिकृतः क्षेत्रकृतः स्वामिकृतो विषयकृतश्चानयोर्विशेषो भवत्यवधिमनःपर्यायज्ञानयोः । तद्यथा । अवधिज्ञानान्मनःपर्यायज्ञानं विशुद्धतरम् । यावन्ति हि रूपाणि† द्रव्याण्यवधिज्ञानी जानीते तानि मनःपर्यायज्ञानी विशुद्धतराणि

* B & K add अवतिष्ठते । † B C रूपीणि ।

१ S भूयः = पुनः to be construed with what follows.

मनोगतानि* जानीते॥ किं चान्यत्। क्षेत्रकृतश्चानयोः प्रतिविशेषः। अवधिज्ञानमङ्गुलस्यासंख्येयभागादिषूत्पन्नं† भवत्यसर्वलोकात्। मनःपर्यायज्ञानं तु मनुष्यक्षेत्र एव भवति नान्यक्षेत्रे‡ इति॥ किं चान्यत्। स्वामिकृतश्चानयोः प्रतिविशेषः। अवधिज्ञानं संयतस्य असंयतस्य वा§ सर्वगतिषु भवति। मनःपर्यायज्ञानं तु मनुष्यसंयतस्यैव भवति नान्यस्य॥ किं चान्यत्। विषयकृतश्चानयोः प्रतिविशेषः। रूपिद्रव्येष्वसर्वपर्यायेष्ववधेर्विषयनिबन्धो भवति। तदनन्तभागे मनःपर्यायस्येति॥

अत्राह। उक्तं मनःपर्यायज्ञानम्। अथ केवलज्ञानं किमिति। अत्रोच्यते। केवलज्ञानं दशमेऽध्याये वक्ष्यते। मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलमिति॥॥

अत्राह। एषां मतिज्ञानादीनां ज्ञानानां कः कस्य विषयनिबन्ध इति। अत्रोच्यते।

मतिश्रुतयोर्निबन्धः सर्वद्रव्येष्वसर्वपर्यायेषु॥ २७॥

मतिज्ञानश्रुतज्ञानयोर्विषयनिबन्धो भवति सर्वद्रव्येष्वसर्वपर्यायेषु। ताभ्यां हि सर्वाणि द्रव्याणि जानीते न तु सर्वैः पर्यायैः।

---

* K मनोरहस्यगतानीव जानीते। † K omits उत्पन्नम्।

‡ S नान्यक्षेत्रे। § HAC have संयतासंयतस्य and च for वा। S वाशब्दात्संयतासंयतस्य वा। ॥ X. I.

रूपिष्ववधेः ॥ २८ ॥

रूपिष्वेव द्रव्येष्ववधिज्ञानस्य विषयनिबन्धो भवति अपर्वपर्यायेषु । सुविशुद्धेनाप्यवधिज्ञानेन रूपीण्येव* द्रव्याण्यवधिज्ञानी जानीते तान्यपि न सर्वैः पर्यायैरिति ॥

तदनन्तभागे मनःपर्यायस्य ॥ २९ ॥

यानि रूपीणि† द्रव्याण्यवधिज्ञानी जानीते ततोऽनन्तभागे मनःपर्यायस्य विषयनिबन्धो भवति । अवधिज्ञानविषयस्यानन्तभागं मनःपर्यायज्ञानी जानीते रूपिद्रव्याणि‡ मनोरहस्यविचारगतानि च§ मानुषाणां¶ चेचपर्यापन्नानि[१] विशुद्धतराणि चेति ॥

सर्वद्रव्यपर्यायेषु केवलस्य ॥ ३० ॥

सर्वद्रव्येषु सर्वपर्यायेषु च¶ केवलज्ञानस्य विषयनिबन्धो भवति । तद्धि सर्वभावग्राहकं संभिन्नलोकालोकविषयम् । नातः परं ज्ञानमस्ति । न च केवलज्ञानविषयात्परं किंचिदन्यज्ज्ञेयमस्ति[२] । केवलं परिपूर्णं समग्रमसाधारणं निरपेक्षं विशुद्धं सर्वभावज्ञापकं लोकालोकविषयमनन्तपर्यायमित्यर्थः ॥

अत्राह । एषां मतिज्ञानादीनां युगपदेकस्मिञ्जीवे कति भवन्तीति । अत्रोच्यते ।

---

* K रूपाण्येव । † K रूपाणि । ‡ रूपद्रव्याणि ।
§ S omits च । ‖ K मनुष्य । ¶ omits च ।

---

१ SH पर्यापन्नानि = व्यवस्थितानि ।

२ S यदप्रकाशितं केवलेनेति ।

एकादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः ॥ ३१ ॥

एषां मत्यादीनां ज्ञानानामादित एकादीनि भाज्यानि युगपदेकस्मिञ्जीव आ चतुर्भ्यः। *कस्मिंश्चिज्जीवे मत्यादीनामेकं[1] भवति। कस्मिंश्चिज्जीवे द्वे भवतः। कस्मिंश्चित्त्रीणि भवन्ति। कस्मिंश्चिच्चत्वारि भवन्ति। श्रुतज्ञानस्य तु मतिज्ञानेन नियतः सहभावस्तत्पूर्वकत्वात्। यस्य श्रुतज्ञानं तस्य नियतं मतिज्ञानम्। यस्य तु मतिज्ञानं तस्य श्रुतज्ञानं स्याद्वा न वेति ॥ अत्राह। अथ केवलज्ञानस्य पूर्वैर्मतिज्ञानादिभिः किं† सहभावो भवति। नेत्युच्यते‡। केचिदाचार्या व्याचक्षते। नाभावः। किं तु तदभिभूतत्वादकिंचित्कराणि भवन्तीन्द्रियवत्। यथा वा व्यभ्रे नभसि आदित्य उदिते भूरितेजस्त्वादादित्येनाभिभूतान्यन्यतेजांसि [2]ज्वलनमणिचन्द्रनक्षत्रप्रभृतीनि प्रकाशनं प्रत्यकिंचित्कराणि भवन्ति तद्वदिति। केचित्पुनराहुः। [3]अपायसद्व्यतया मतिज्ञानं तत्पूर्वकं श्रुतज्ञानमवधिज्ञानमनःपर्यायज्ञाने च रूपिद्रव्यविषये तस्मान्नैतानि केवलिनः सन्तीति ॥ किं चान्यत्। मतिज्ञानादिषु चतुर्षु पर्यायेणोपयोगो भवति न

---

* K adds तथा। † C omits किं। ‡ HK नेति। व्याचक्षते।

---

१ S येन निसर्गसम्यग्दर्शनं प्राप्तं तस्य मतिज्ञानमाद्यमेवैकं—न श्रुतं ॥

२ S ज्वलनोऽग्निः ॥

३ S अपायो नाम श्रोत्रादीन्द्रियोपलब्धस्येहितस्यार्थस्य निश्चयः। नैवंविधोऽपायः केवलिनोऽस्ति। यावच्च शोभनानि सम्यक्त्वदलिकानि सन्ति तावन्मतिज्ञानं। तदेतद्द्वयमपि दूरोत्सारितं केवलिनः ॥

युगपत् । [1]संभिन्नज्ञानदर्शनस्य तु भगवतः केवलिनो युगपत्सर्व-

१ S किं चान्यदित्यादिना । स्वाभिप्रायद्वयं प्रकाशयति । मतिज्ञानादिषु चतुर्षु मतिश्रुतावधिमनःपर्यायज्ञानेषु पर्यायेण क्रमेणोपयोगः *स्वविषयग्राहिता भवति न युगपदेकस्मिन्काले न स्वस्वविषय एषां व्यापारः । यदा मतिज्ञानी मतिज्ञानेनोपयुक्तो न तदा श्रुतादीनामन्यतमेन केनचित् । यदा च श्रुतज्ञानेनोपयुक्तो न तदा मत्यादीनामन्यतमेनेति । केवलिनस्तु क्रमेणैतज्ज्ञानगतो नास्त्युपयोगः ॥ यतः संभिन्न इत्यादि । ज्ञानं विशेषग्राहि दर्शनं सामान्यग्राहि ज्ञानं च दर्शनं च ज्ञानदर्शने संभिन्ने सर्वद्रव्यपर्यायग्राहके ज्ञानदर्शने यस्य स संभिन्नज्ञानदर्शनः तस्यैवं† । माहात्म्यादिगुणान्वितस्य भगवतः । केवलं सर्वार्थग्राहि ज्ञानं यस्यास्ति तस्य केवलिनः । युगपदेकस्मिन्समये केवलज्ञाने ऽनुसमयमुपयोगो भवति दर्शने च‡ । कीदृशि केवलज्ञाने दर्शने वा । उच्यते । सर्वभावग्राहके सर्वे भावाः पञ्चास्तिकायास्तेषां ग्राहकं विशेषे परिच्छेदकमित्यर्थः । निरपेक्षे निर्गता अपेक्षा ज्ञेयं मुक्त्वान्यच्च इन्द्रियादौ यस्य तन्निरपेक्षं तस्मिन्निरपेक्षे । केवलज्ञाने विशेषग्राहिणि । दर्शने च सर्वभावग्राहके निरपेक्षे सामान्यग्राहिणि अनुसमयमुपयोगो भवतीति । अनुगतः अव्यवहितः समयो ऽत्यन्ताविभागः कालो यत्र कालसन्ताने स कालसन्तानः अनुसमयस्तमनुसमयं कालसन्तानमुपयोगो भवति "कालध्वनोरत्यन्तसंयोगे (पा० २।३।५) इति

* U स्वामि। † U तस्यैव। ‡ CF प्रज्ञापना।

भावग्राहके निरपेक्षे केवलज्ञाने केवलदर्शने चानुसमयमुपयोगो

द्वितीया। अव्ययीभावो वा विभक्त्यादिषु (पा० २।१।६) वारंवारेणोपयोगो भवति इति यावत्। एकस्मिन्समये केवलज्ञानोपयोगे वृत्ते ततो ऽन्यस्मिन्केवलदर्शनोपयोग इति एवं सर्वकालमवसेयम्। यद्यपि केचित्पण्डितंमन्याः सूचाण्यन्यथाकारमर्थमाचचते तर्कबलात्तु विशुद्धबुद्धयो वारंवारेणोपयोगो नास्तीति तत्तु न प्रमाणयामः। यत आम्नाये भूयांसि सूचाणि वारंवारेणोपयोगं प्रतिपादयन्ति।

नाणंमि दंसणंमि य एत्तो एगतरगम्मि उवउत्ता। तथा—

सव्वस्स केवलिस्स वि जुगवं दो णत्थि उवओगा॥

इत्यादीनि। अथैवं मन्येथाः सूचाणामेषामन्य एवार्थो ऽन्य एवाव्युत्पन्नबुद्धिभिराख्यायत इत्येतदपि दुःश्रद्धानं। यतः सत्यं सूचाण्यपुरुषस्थानानि* सुधिया गृहीतानि शक्नुवन्त्यर्थं ख्यापयितुम्। यथा श्वेतो धावतीत्यादि एवंविधेषु च सूचेष्ववश्यमाचसंप्रदाय एवान्वेषणीयो भवति स चाविच्छेदेनार्थसंप्रदायः समस्तश्रुतधरादधिकारिणः परिस्रवमानो† मुनिपरम्परया यावद्येत्यागमादविगणनेन वारंवारमित्यभ्युपेयते‡। (वारंवारेणोपयोग इति कुतः पुनरर्थागमो ऽकस्मादुपयोगवादिनः स्वत एव चेत्रेचितः स्वमनीषिका सिद्धान्तविरोधिनी न प्रमाणमित्यभ्युपेयते)। अथागमात्प्रदर्शनीयस्तर्ह्यसौ तस्माद्यत्किंचिदेतदिति।

* U स्थानीयानि। † U परिस्रवमानो।

‡ U omits words in the brackets.

भवति ॥ किं चान्यत् । क्षयोपशमजानि चत्वारि ज्ञानानि पूर्वाणि क्षयादेव केवलं । तस्मान्न केवलिनः शेषाणि ज्ञानानि सन्तीति*[१] ॥

मतिश्रुतावधयो विपर्ययश्च† ॥ ३२ ॥

मतिज्ञानं श्रुतज्ञानमवधिज्ञानमिति । विपर्ययश्च भवत्य- 5
ज्ञानं चेत्यर्थः । ज्ञानविपर्ययो ऽज्ञानमिति‡ । अत्राह । तदेव ज्ञानं तदेवाज्ञानमिति । ननु§ च्छायातपवच्छीतोष्णवच्च तदत्य-

* C भवन्तीति । † HK मतिश्रुताविभङ्गा विपर्ययश्च ।
‡ विपर्ययश्च भवत्यज्ञानविपर्ययो ज्ञानमिति । § K न तु ।

अथ* मन्यसे साकारो ऽनाकार इति शब्दभेदः केवलमत्र केवलिनि अर्थस्त्वभिन्न एव यतः सर्वमेव विशेषपरिच्छेदकं ज्ञानं केवलिनि समस्ति न दर्शनमिति । इदमपि न जाघट्यते ज्ञाना- 10
वरणं भगवतः क्षीणं दर्शनावरणं च निरवशेषं । तच्चैकत्वे सति को ऽयमावरणभेदाभिमानो निःप्रयोजनः । तथा साकारोपयोगो ऽष्टधा दर्शनोपयोगश्चतुर्धेति तथा ज्ञानं पञ्चधा दर्शनं चतुर्धेति एकत्वे सति कुत इदमपि घटमानकम् । न वातीवाभिनिवेशो ऽस्माकं युगपदुपयोगो मा भूदिति वचनं न पश्यामस्तादृशं । 15
क्रमोपयोगार्थप्रतिपादने तु भूरिवचनमुपलभामहे । न चान्यथा जिनवचनं कर्तुं शक्यते सुविदुषापीति ॥

१ Var. S ज्ञानदर्शनावरणयोस्तु क्षतत्वक्षयात् केवलज्ञानदर्शने भवतस्तस्मान्न केवलिनः शेषज्ञानानि ॥

* U इति for अथ ।

न्तविरुद्धमिति। अत्रोच्यते। मिथ्यादर्शनपरिग्रहाद्विपरीतग्राहकत्वमेतेषाम्[१*]। तस्मादज्ञानानि भवन्ति। तद्यथा। मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानमिति[†]। अवधिर्विपरीतो[‡] विभङ्ग इत्युच्यते[२]? ॥

5 अत्राह। उक्तं भवता सम्यग्दर्शनपरिग्रहीतं मत्यादिज्ञानं भवत्यन्यथा[‖]ज्ञानमेवेति। मिथ्यादृष्टयोऽपि च[¶] भव्याश्चाभव्याश्चेन्द्रियनिमित्तानविपरीतान्स्वर्गादीनुपलभन्ते उपदिशन्ति च[**] स्वर्गं स्वर्ग[††] इति रसं रस इति। एवं शेषान्। तत्कथमेतदिति। अत्रोच्यते। तेषां हि विपरीतमेतद्भवति।

10 [१]सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥ ३३ ॥

यथोन्मत्तः कर्मोदयादुपहतेन्द्रियमतिर्विपरीतग्राही भवति सोऽश्वं गौरित्यध्यवस्यति गां चाश्व[‡‡] इति लोष्टं सुवर्णमिति सुवर्णं लोष्ट[§§] इति लोष्टं च लोष्ट[‖‖] इति सुवर्ण[¶¶] सुवर्णमिति

---

* K मिथ्यादर्शनपरिग्रहीतग्राहकमेतेषाम्। † K विभङ्गमिति।
‡ H अवधेर्विपरीतो, K अवधिविपरीतो। § AC ग्रंथ १५००।
‖ SK add तु० त्यन्यथा लज्ञान। ¶ C omits च।
** C omits च। †† K स्वर्गमिति रसं रसमिति।
‡‡ AC वाश्वमिति। §§ K लोष्टमिति।
‖‖ K लोष्टमिति। ¶¶ HK add च।

---

१ S एतेषामिति मतिश्रुतावधीनां ॥

२ S सद्विद्यमानमसदविद्यमानं। अविशेषादयथार्थावबोधात्। यदृच्छोपलब्धेरिति अनालोचिता अर्थोपलब्धिस्तस्या यदृच्छोपलब्धेः स्वर्गादिपरिज्ञानं भवति उन्मत्तस्येव ॥

तस्यैवमविशेषेण लोष्टं सुवर्णं सुवर्णं लोष्टमिति विपरीतमध्यवस्यतो नियतमज्ञानमेव भवति—तद्ह्यमिथ्यादर्शनोपहतेन्द्रियमतेर्मतिश्रुतावधयोऽप्यज्ञानं* भवन्ति ॥

उक्तं ज्ञानं। चारित्रं नवमेऽध्याये वक्ष्यामः। प्रमाणे चोक्ते। नयान्वक्ष्यामः। तद्यथा।

नैगमसंग्रहव्यवहारर्जुसूत्रशब्दा नयाः ॥ ३४ ॥

नैगमः संग्रहो व्यवहार ऋजुसूत्रः शब्द इत्येते पञ्चनया भवन्ति। तत्र

आद्यशब्दौ द्वित्रिभेदौ ॥ ३५ ॥

आद्य इति सूत्रक्रमप्रामाण्यान्नैगममाह। स द्विभेदो देशपरिक्षेपी सर्वपरिक्षेपी चेति। शब्दस्त्रिभेदः साम्प्रतः समभिरूढ एवम्भूत इति ॥ अत्राह। किमेषां लक्षणमिति। अत्रोच्यते। निगमेषु येऽभिहिताः शब्दास्तेषामर्थः† शब्दार्थपरिज्ञानं च देशसमग्रग्राही नैगमः। अर्थानां सर्वैकदेशसंग्रहणं संग्रहः। लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहारः। सतां साम्प्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्रः। यथार्थाभिधानं शब्दः। नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रत्ययः साम्प्रतः। सत्यर्थेष्वसंक्रमः समभिरूढः। व्यञ्जनार्थयोरेवम्भूत इति ॥

अत्राह। उद्दिष्टा भवता नैगमाद्यो नयाः। तन्नया इति‡ कः पदार्थ इति। अत्रोच्यते। नयाः प्रापकाः कारकाः

* HK अज्ञानान्येव। † HK °र्थाः। ‡ S adds तु।

साधका निर्वर्तका निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम् । जीवादीन्पदार्थान्नयन्ति प्राप्नुवन्ति* कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्जयन्तीति नयाः ॥

अत्राह । किमेते [1]तन्त्रान्तरीया वादिन आहोस्वित्स्वतन्त्रा एव चोदकपक्षग्राहिणो मतिभेदेन विप्रधाविता इति । अत्रोच्यते । नेते तन्त्रान्तरीया नापि स्वतन्त्रा मतिभेदेन विप्रधाविताः । ज्ञेयस्य †त्वर्थस्या[2]ध्यवसायान्तराण्येतानि[3] । तद्यथा । घट इत्युक्ते योऽसौ चेष्टाभिर्निर्वृत्त[4] ऊर्ध्वकुण्डलौ[5]ष्ठायतवृत्तग्रीवोऽधस्तात्परिमण्डलो जलादीनामाहरणधारणसमर्थ उत्तरगुणनिर्वर्तनानिर्वृत्तो[6] द्रव्यविशेषस्तस्मिन्नेकस्मिन्विशेषवति तज्ज्ञातीयेषु वा सर्वेष्वविशेषा[7]त्परिज्ञानं नैगमनयः । एकस्मिन्वा‡

---

* HK प्रापयन्ति । † K omits तु । ‡ K omits वा ।

---

१ S तन्त्रं जैनं प्रवचनं तस्मादन्यत्वाद्गुणभुजादिप्रणीतं तस्मिन्भवाः कुशला वा तन्त्रान्तरीयाः । अवश्यं वदन्तीति वादिनो ऽतः किं वैशेषिकादयो वादिनो नया भण्यन्ते । आत्मीयं तन्त्रमेषां ते स्वतन्त्राः । चोदको दुरुक्तादिसूचकस्तस्य पक्षो विषयः तं चोदकपक्षं ग्रहीतुं शीलमेषामिति चोदकपक्षग्राहिणः । विप्रधाविता अयथार्थनिरूपका इति ॥

२ S अर्थस्य घटपटादेः ॥ ३ S एतानीति नैगमादीनि ॥

४ S कुम्भकारचेष्टानिर्वृत्तः ॥ ५ S कुण्डल = वृत्त ॥

६ S उत्तरेत्यादि पाकजरक्तादिगुणपरिसमाप्तया निष्पन्नः ।

७ S अविशेषादभेदेन ।

बहुषु वा नामादिविशेषितेषु साम्प्रतातीतानागतेषु घटेषु संप्रत्ययः[१] संग्रहः। तेष्वेव लौकिकपरीक्षकग्राह्येषूपचारगम्येषु[२] यथास्थूलार्थेषु संप्रत्ययो व्यवहारः। तेष्वेव सत्सु साम्प्रतेषु संप्रत्यय ऋजुसूत्रः। तेष्वेव साम्प्रतेषु नामादीनामन्यतमग्राहिषु प्रसिद्धपूर्वकेषु* घटेषु† संप्रत्ययः साम्प्रतः शब्दः‡। तेषामेव साम्प्रतानामध्यवसायासंक्रमो वितर्कध्यानवत् समभिरूढः। तेषामेव व्यञ्जनार्थयोरन्योन्यापेक्षार्थग्राहित्वमेवम्भूत इति॥

अत्राह। एवमिदानीमेकस्मिन्नर्थेऽध्यवसायनानात्वान्नानु[३]विप्रतिपत्तिप्रसङ्ग इति। अत्रोच्यते। यथा सर्वमेकं सदविशेषात् सर्वं द्विलं जीवाजीवात्मकत्वात् सर्वं त्रिलं द्रव्यगुणपर्यायावरोधात् सर्वं चतुष्कं§ चतुर्दर्शनविषयावरोधात् सर्वं पञ्चत्वमस्तिकायावरोधात् सर्वं षट्त्वं षड्द्रव्यावरोधादिति। यथैता न विप्रतिपत्तयोऽथ चाध्यवसायस्थानान्तराण्येतानि तद्वन्नयवादा इति। किं चान्यत्। यथा मतिज्ञानादिभिः पञ्चभिर्ज्ञानैर्धर्मादीनामस्तिकायानामन्यतमोऽर्थः पृथक् पृथगुपलभ्यते पर्यायविशुद्धिविशेषादुत्कर्षेण न च ता विप्रतिपत्तयः

---

* C पूर्वेषु। † K शब्देषु।
‡ K साम्प्रतशब्दः। § H चतुष्कं A चतुष्टयं।

---

१ S संप्रत्ययः सामान्यं घटो घट इति परिज्ञानं॥
२ S उपचारगम्येष्विति लोकक्रियाधारेषु॥
३ S विरुद्धप्रतीतिर्विप्रतिपत्तिः॥

तद्वन्नयवादाः । यथा वा प्रत्यक्षानुमानोपमानाप्तवचनैः प्रमाणैरेकोऽर्थः प्रमीयते* स्वविषयनियमात् न च ता विप्रतिपत्तयो भवन्ति तद्वन्नयवादा इति । आह च[१]

[२]नैगमशब्दार्थानामेकानेकार्थनयगमापेक्षः ।
देशसमग्रग्राही व्यवहारी नैगमो ज्ञेयः ॥ १ ॥
यत्संग्रहीतवचनं सामान्ये देशतो [३]ऽथ च विशेषे† ।
तत्संग्रहनयनियतं ज्ञानं‡ विद्यान्नयविधिज्ञः ॥ २ ॥
समुदायव्यक्त्याकृतिसत्तासंज्ञादि[४]निश्चयापेक्षम् ।
[५]लोकोपचारनियतं व्यवहारं विस्तृतं विद्यात् ॥ ३ ॥

---

* K प्रतीयते । † H देशतो विशेषाच्च । ‡ K adds च ।

---

१ S संक्षिप्तरुचीनामनुग्रहार्थमार्याभिर्वक्तुकाम एवं प्रक्रमत आह चेत्यादि आह चेत्यात्मानमेव पर्यायान्तरवर्तिनं निर्दिशति । H प्रयासः अभिहितमेवार्थं पूर्वाचार्यबहुमतोऽयमिति तत्संग्रह्यार्याभिरुपप्रदर्शयन्नाह । आह चेत्यादि ॥

२ S निगमो जनपदस्तत्रभवा नैगमाः शब्दास्तेषामर्था अभिधेया अतस्तेषां नैगमशब्दार्थानां । एको विशेषः अनेकं सामान्यमनेकव्यक्त्याश्रितत्वात् तावेवार्थौ एकानेकार्थौ तयोरेकानेकार्थयोर्नयः प्रकटनं प्रकाशनमेकानेकार्थनयः स एव गमः प्रकारः एकानेकार्थनयगमस्तमपेक्षते ऽभ्युपैतीति यः स एकानेकार्थनयगमापेक्षः ॥ व्यवहारो ऽस्य सामान्यविशेषाभ्यां परस्परविमुखाभ्यामस्तीति व्यवहारी नैगमो नयो ज्ञातव्यः ॥

३ S अथ च = अथवा ॥

४ S संज्ञादयो नामस्थापनाद्रव्यभावाः । ——— ———

५ S लोकोपचारे नियतं निष्पन्नं । उपचरितानुपचरितार्थाश्रयणाद्विस्तृतं ।

साम्प्रतविषयग्राहकमृजुसूत्रनयं समासतो विद्यात् ।

विद्याद्यथार्थशब्दं विशेषितपदं तु शब्दनयम् ॥ ४ ॥ इति ॥

अत्राह । अथ जीवो नोजीवः अजीवो नोऽजीव इत्याकारिते केन नयेन कोऽर्थः प्रतीयत इति । अत्रोच्यते । जीव इत्याकारिते नैगमदेशसंग्रहव्यवहारर्जुसूत्रसाम्प्रतसमभिरूढैः पञ्चस्वपि गतिष्वन्यतमो जीव इति प्रतीयते । कस्मात् । एते हि नया जीवं प्रत्यौपशमिकादियुक्तभावग्राहिणः । नोजीव इत्यजीवद्रव्यं जीवस्य वा देशप्रदेशौ । अजीव इत्यजीवद्रव्यमेव । नोऽजीव इति जीव एव तस्य वा देशप्रदेशाविति ॥ एवम्भूतनयेन तु जीव इत्याकारिते भवस्थो जीवः प्रतीयते । कस्मात् । एष हि नयो जीवं प्रत्यौदयिकभावग्राहक एव । जीवतीति जीवः प्राणिति प्राणान्धारयतीत्यर्थः । तच्च* जीवनं सिद्धे न विद्यते तस्माद्भवस्थ एव जीव इति । नोजीव इत्यजीवद्रव्यं सिद्धो वा । अजीव इत्यजीवद्रव्यमेव । नोऽजीव इति भवस्थ एव जीव इति । समग्रार्थग्राहित्वाच्चास्य नयस्य नानेन देशप्रदेशौ गृह्येते । एवं जीवौ जीवा इति[१] द्वित्वबहुत्वाकारितेष्वपि । सर्वसंग्रहणे तु जीवो नोजीवः अजीवो नोऽजीवः जीवौ नोजीवौ अजीवौ नोऽजीवौ इत्येकद्वित्वाकारितेषु शून्यम् । कस्मात् । एष हि नयः संख्यानन्त्याज्जीवानां बहुत्वमेवेच्छति

---

* A नतु, E ननु ।

---

१ S इति शब्द आद्यर्थे ।

यथार्थग्राही*। शेषास्तु नया जात्यपेक्षमेकस्मिन्बहुवचनत्वं बहुषु च बहुवचनं [1]सर्वाकारितग्राहिण इति। एवं सर्वभावेषु नयवादाधिगमः कार्यः।

अत्राह। अथ पञ्चानां ज्ञानानां सविपर्ययाणां कानि को नयः अयत इति। अत्रोच्यते। नैगमाद्यस्त्रयः सर्वाण्यष्टौ अयन्ते। ऋजुसूत्रनयो मतिज्ञानमत्यज्ञानवर्जानि षट्॥ अत्राह। कस्मान्मतिं सविपर्ययां न अयत इति। अत्रोच्यते। श्रुतस्य सविपर्ययस्योपग्रहत्वात्। शब्दनयस्तु द्वे एव श्रुतज्ञानकेवलज्ञाने अयते। अत्राह। कस्मान्नेतराणि अयत इति। अत्रोच्यते। मत्यवधिमनःपर्यायाणां श्रुतस्यैवोपग्राहकत्वात्। चेतनाज्ञस्वाभाव्याच्च सर्वजीवानां नास्य कश्चिन्मिथ्यादृष्टिरज्ञो वा जीवो विद्यते। तस्मादपि विपर्ययान्न अयत इति। अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्यनुज्ञायत इति। आह च

विज्ञायैकार्थपदान्यर्थपदानि च विधानमिष्टं च।
विन्यस्य परिच्छेपान्नयैः परीक्ष्याणि तत्त्वानि॥ १॥
ज्ञानं सविपर्यासं त्रयः अयन्त्यादितो नयाः सर्वम्।
सम्यग्दृष्टेर्ज्ञानं मिथ्यादृष्टेर्विपर्यासः॥ २॥
ऋजुसूत्रः षट् अयते मतेः श्रुतोपग्रहादनन्यत्वात्।
श्रुतकेवले तु शब्दः अयते नोऽन्यच्छ्रुताङ्गत्वात्॥ ३॥

---

* S omits this.

---

१ सर्वाकारितग्राहिण इति सर्ववचनैरेकवचनादिभिराकारितानेतान्विकल्पान् गृह्णन्ति तच्छीलाश्च सर्वाकारितग्राहिण इति॥

मिथ्यादृष्ज्ञाने न श्रयते नास्य कश्चिदज्ञो* ऽस्ति ।
ज्ञस्वाभाव्याज्जीवो मिथ्यादृष्टिर्न चाप्यज्ञः ॥ ४ ॥
इति नयवादाश्चित्राः क्वचिदिरुद्धा इवाथ च विशुद्धाः ।
लौकिकविषयातीतास्तत्त्वज्ञानार्थमधिगम्याः ॥ ५ ॥

इति तत्त्वार्थाधिगमेऽर्हत्प्रवचनसंग्रहे
प्रथमोऽध्यायः समाप्तः ॥

---

* Here and everywhere, Mss. BK give अन्य for अज्ञ० ।

अथ द्वितीयोऽध्यायः ।

अत्राह । उक्तं भवता जीवादीनि तत्त्वानीति । तत्र को जीवः कथं लक्षणो वेति[1] । अत्रोच्यते ।

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च[2] ॥ १ ॥

औपशमिकः क्षायिकः क्षायोपशमिक औदयिकः पारिणामिक इत्येते पञ्च भावा जीवस्य स्वतत्त्वं भवन्ति ।

द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥ २ ॥

एते औपशमिकादयः पञ्च भावा द्विनवाष्टादशैकविंशतित्रिभेदा भवन्ति । तद्यथा* । औपशमिको द्विभेदः क्षायिको नवभेदः क्षायोपशमिको ऽष्टादशभेदः औदयिक एकविंशतिभेदः पारिणामिकस्त्रिभेद इति । यथाक्रममिति येन सूत्रक्रमेणात ऊर्ध्वं वक्ष्यामः† ।

सम्यक्त्वचारित्रे ॥ ३ ॥

सम्यक्त्वं चारित्रं च द्वावौपशमिकौ भावौ भवत इति ।

ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ ४ ॥

---

* K यथाक्रमम् A यथा । † K adds तद्यथा ।

---

१ S वा = and. २ S च शब्दात्सान्निपातिकः ।

ज्ञानं दर्शनं दानं लाभो भोग उपभोगो वीर्यमित्येतानि च* सम्यक्त्वचारित्रे च नव क्षायिका भावा भवन्तीति।

ज्ञानाज्ञानदर्शनदानादिलब्ध्यश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ ५ ॥

ज्ञानं चतुर्भेदं मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्यायज्ञानमिति। अज्ञानं त्रिभेदं मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानमिति। दर्शनं त्रिभेदं चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनमिति। लब्धयः पञ्चविधा दानलब्धिर्लाभलब्धिर्भोगलब्धिरुपभोगलब्धिर्वीर्यलब्धिरिति। सम्यक्त्वं चारित्रं संयमासंयम इत्येते ऽष्टादश क्षायोपशमिका भावा भवन्तीति।

गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धत्वलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥ ६ ॥

गतिश्चतुर्भेदा नारकतैर्यग्योनमनुष्यदेवा इति। कषायश्चतुर्भेदः क्रोधो मानो मायो लोभोति[१]। लिङ्गं त्रिभेदं स्त्री† पुमान्नपुंसकमिति। मिथ्यादर्शनमेकभेदं मिथ्यादृष्टिरिति। अज्ञानमेकभेदमज्ञानीति। असंयतत्वमेकभेदमसंयतो ऽविरत इति। असिद्धत्वमेकभेदमसिद्ध इति। एकभेदमेकविधमिति। लेश्याः षड्भेदाः कृष्णलेश्या नीललेश्या कापोतलेश्या तेजो-

* KC omits च। † K तिर्यग्योन०। ‡ K puts पुमान् before स्त्री।

१ S कषः संसारस्तस्याय उपादानकारणविशेषः कषायः। स चतुर्धा क्रोधादिस्तदुदयात्क्रोध्यादिव्यपदेशः। अत्रापि जीवस्वतत्त्वप्रतिपत्तये क्रोधीति व्यपदेशो न क्रोध इति।

लेश्या पद्मलेश्या शुक्ललेश्या। इत्येते एकविंशतिरौदयिक*-भावा भवन्ति।

जीवभव्याभव्यत्वादीनि च ॥ ७ ॥

जीवत्वं भव्यत्वमभव्यत्वमित्येते त्रयः पारिणामिका भावा भवन्तीति। आदिग्रहणं किमर्थमिति। अत्रोच्यते। अस्तित्वमन्यत्वं कर्तृत्वं भोक्तृत्वं गुणवत्त्वमसर्वगतत्वमनादिकर्मसन्तानबद्धत्वं प्रदेशत्व†मरूपत्व‡ नित्यत्वमित्येवमादयो ऽप्यनादिपारिणामिका जीवस्य भावा भवन्ति। धर्मादिभिस्तु समाना इत्यादिग्रहणेन सूचिताः। ये जीवस्यैव वैशेषिकास्ते स्वशब्देनोक्ता इति। एते पञ्च भावास्त्रिपञ्चाशद्भेदा जीवस्य स्वतत्त्वं भवन्ति। अस्तित्वादयश्च§। किं चान्यत्।

उपयोगो लक्षणम् ॥ ८ ॥

उपयोगो लक्षणं जीवस्य भवति।

स॥ द्विविधो ऽष्टचतुर्भेदः ॥ ९ ॥

स॥ उपयोगो द्विविधः साकारो ऽनाकारश्च ज्ञानोपयोगो दर्शनोपयोगश्चेत्यर्थः। स पुनर्यथासङ्ख्यमष्टचतुर्भेदो भवति।

---

* S probably omits औदयिक K औदयिका भावा।

† K प्रदेशवत्वं। ‡ KB •रूपित्वम्। § K omits.

|| Var S omits. S says this is wrong, and in arguing says "यत्र भेदविधिः तत्र तच्छब्दो न प्रयुज्यते इति कः खलु नियमः" and further quotes VI 2 and VIII 2 in support of his argument.

ज्ञानोपयोगो ऽष्टविधः । तद्यथा । मतिज्ञानोपयोगः श्रुतज्ञानोपयोगो ऽवधिज्ञानोपयोगो मनःपर्यायज्ञानोपयोगः केवलज्ञानोपयोगो मत्यज्ञानोपयोगः श्रुताज्ञानोपयोगो विभङ्गज्ञानोपयोग इति । दर्शनोपयोगश्चतुर्भेदः । तद्यथा । चक्षुर्दर्शनोपयोगो ऽचक्षुर्दर्शनोपयोगो ऽवधिदर्शनोपयोगः केवलदर्शनोपयोग इति ॥

संसारिणो मुक्ताश्च ॥ १० ॥

ते जीवाः समासतो द्विविधा भवन्ति संसारिणो मुक्ताश्च । किं चान्यत् ।

समनस्कामनस्काः ॥ ११ ॥

समासतस्ते एव जीवा द्विविधा भवन्ति समनस्काश्च अमनस्काश्च । तान्परस्ताद्वक्ष्यामः* ॥

संसारिणस्त्रसस्थावराः ॥ १२ ॥

संसारिणो जीवा द्विविधा भवन्ति त्रसाः स्थावराश्च । तत्र

पृथिव्यब्वनस्पतयः स्थावराः ॥ १३ ॥

पृथिवीकायिका अप्कायिका वनस्पतिकायिका इत्येते त्रिविधाः स्थावरा जीवा भवन्ति । तत्र पृथिवीकायो ऽनेकविधः शुद्धपृथिवीशर्करावालुकादिः । अप्कायो ऽनेकविधो हिमादिः । वनस्पतिकायो ऽनेकविधः शैवलादिः ॥

तेजोवायू द्वीन्द्रियादयश्च त्रसाः ॥ १४ ॥

---

* II. 25.

तेजःकायिका अङ्गारादयः । वायुकायिका उत्कलिकादयः । द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रिया इत्येते त्रसा भवन्ति । संसारिणस्त्रसाः स्थावरा इत्युक्ते एतदुक्तं भवति मुक्ता नैव त्रसा नैव स्थावरा इति ॥

पञ्चेन्द्रियाणि ॥ १५ ॥

पञ्चेन्द्रियाणि* भवन्ति । आरम्भो नियमार्थः षडादिप्रतिषेधार्थश्च ॥ इन्द्रियं । इन्द्रलिङ्गमिन्द्रदिष्टमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिति† वा । इन्द्रो जीवः सर्वद्रव्येष्वैश्वर्ययोगाद्विषयेषु वा परमैश्वर्ययोगात् । तस्य लिङ्गमिन्द्रियं लिङ्गनात्सूचनात्प्रदर्शनादुपष्टम्भनाद्व्रज्ञनाच्च‡ जीवस्य लिङ्गमिन्द्रियम् ॥

द्विविधानि ॥ १६ ॥

द्विविधानीन्द्रियाणि भवन्ति । द्रव्येन्द्रियाणि भावेन्द्रियाणि च ॥ तत्र

निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ १७ ॥

निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च द्विविधं द्रव्येन्द्रियम् । निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्तितानीन्द्रियद्वाराणि§ कर्मविशेष-

---

* K पञ्चैवेन्द्रियाणि भवन्तीत्या० ।

† B adds इन्द्रदत्तम्, C adds इन्द्रसृष्टम् K adds इन्द्रदत्तं last and omits इन्द्रदृष्टं ।

‡ B adds स्रवनात् and puts उपलंभनात् for उपष्टंभनात् K gives उपलम्भनात् for जुष्टं and व्रज्ञनात् for दत्तम् । § K निर्वृत्ति ।

---

१ S अङ्गोपाङ्गनाम निर्माणकर्म चाभ्यां कर्मविशेषाभ्यां.....विशिष्टावयवरचनया निष्पादिता.....प्रतिविशिष्टदेशाः प्रदेशाः ।

संस्थिताः शरीरप्रदेशाः । निर्माणनामाङ्गो*पाङ्गप्रत्ययाः[१] मूलगुणनिर्वर्तनेत्यर्थः ॥ उपकरणं बाह्यमभ्यन्तरं च । निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति ॥

लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८ ॥

लब्धिरुपयोगश्च भावेन्द्रियं भवति । लब्धिर्नाम गतिजात्यादिनामकर्मजनिता तदावरणीयकर्मक्षयोपशमजनिता चेन्द्रियाश्रयकर्मोदयनिर्वृत्ता च† जीवस्य भवति । सा पञ्चविधा । तद्यथा । स्पर्शनेन्द्रियलब्धिः रसनेन्द्रियलब्धिः घ्राणेन्द्रियलब्धिः चक्षुरिन्द्रियलब्धिः श्रोत्रेन्द्रियलब्धिरिति ॥

उपयोगः स्पर्शादिषु‡ ॥ १९ ॥

स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः । उक्तमेतदुपयोगो लक्षणम्§ । उपयोगः प्रणिधानमायोग॥स्तद्भावः परिणाम इत्यर्थः ॥ एषां च सत्यां निर्वृत्तावुपकरणोपयोगौ भवतः । सत्यां च¶ लब्धौ निर्वृत्त्युपकरणोपयोगा भवन्ति । निर्वृत्त्यादीनामेकतराभावे विषयाज्ञोचनं न भवति ।

---

* K omits च । † KB वा ।

‡ S says: some doubt whether this is a sutra, but he adds, their view is wrong. K margin टीकाकारमते सूत्रमिदं केषांचिन्मते भाष्यमेवैतदिति ।

§ II. 8. ॥ K च योगः । ¶ S probably omits च ।

---

१ S मध्यव्यवस्थितो नामशब्द उभयं विशेषतयाक्षिप्यति ।.....ते कर्मणी प्रत्ययं कारणं निमित्तं यस्या निवृत्तेः सा निर्माणनामाङ्गोपाङ्गप्रत्यया ।

अत्राह। उक्तं भवता पञ्चेन्द्रियाणीति*। तत्कानि तानीन्द्रियाणीत्युच्यते।

स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ २० ॥

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रमित्येतानि पञ्चेन्द्रियाणि ॥

स्पर्शरसगन्धवर्णशब्दास्तेषामर्थाः ॥ २१ ॥

एतेषामिन्द्रियाणामेते स्पर्शादयोऽर्था भवन्ति यथासङ्ख्यम् ॥

श्रुतमनिन्द्रियस्य ॥ २२ ॥

श्रुतज्ञानं द्विविधमनेकद्वादशविधं नोइन्द्रियस्यार्थः।

अत्राह। उक्तं भवता पृथिव्यब्वनस्पतितेजोवायवो द्वीन्द्रियादयश्च† नव जीवनिकायाः। पञ्चेन्द्रियाणि‡ चेति। तत्किं कस्येन्द्रियमिति। अत्रोच्यते।

वाय्वन्तानामेकम् ॥ २३ ॥

पृथिव्यादीनां वाय्वन्तानां जीवनिकायानामेकमेवेन्द्रियं सूत्रक्रमप्रामाण्यात्प्रथमं स्पर्शनमेवेत्यर्थः।

कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि§॥२४॥

कृम्यादीनां पिपीलिकादीनां भ्रमरादीनां मनुष्यादीनां च यथासङ्ख्यमेकैकवृद्धानीन्द्रियाणि भवन्ति। यथाक्रमम्। तद्यथा। कृम्यादीनां अपादिक-नूपुरक-गण्डूपद-शङ्ख-शुक्तिका शम्बूका-

---

* II. 15. † II. 13, 14. ‡ II. 15.

§ Var S omits मनुष्यादीनाम्।

जलूका-प्रभृतीनामेकेन्द्रियेभ्यः पृथिव्यादिभ्य एकेन वृद्धे स्पर्शन-रसनेन्द्रिये भवतः । ततो ऽप्येकेन वृद्धानि पिपीलिका-रोहिणिका-उपचिका-कुन्थु-तुबुरुक-चपुसबीज-कर्पासास्थिका-शतपद्यु-त्पतक-तृणपत्र-काष्ठहारकप्रभृतीनां चीणि स्पर्शनरसनघ्राणानि । ततो ऽप्येकेन वृद्धानि भ्रमर-वटर*-सारङ्ग-मक्षिका-पुत्तिका†-दंश-मशक-वृश्चिक-नन्द्यावर्त-कीट-पतङ्गादीनां चत्वारि स्पर्शन-रसनघ्राणचक्षूंषि । शेषाणां च तिर्यग्योनिजानां मत्स्योरग-भुजङ्ग-पक्षि-चतुष्पदानां सर्वेषां च नारकमनुष्यदेवानां पञ्चेन्द्रियाणीति‡ ॥

अत्राह । उक्तं भवता द्विविधा जीवाः । समनस्का अमनस्कास्चेति§ । तत्र के समनस्का इति । अत्रोच्यते ।

संज्ञिनः समनस्काः ॥ २५ ॥

संप्रधारणसंज्ञायां संज्ञिनो जीवाः समनस्का भवन्ति । सर्वे नारकदेवा गर्भव्युत्क्रान्तयश्च मनुष्यास्तिर्यग्योनिजाश्च केचित् ॥ ईहापोहयुक्ता गुणदोषविचारणात्मिका संप्रधारणसंज्ञा । तां प्रति संज्ञिनो विवक्षिताः । अन्यथा ह्याहारभयमैथुनपरिग्रह-संज्ञाभिः सर्व एव जीवाः संज्ञिन इति ॥

विग्रहगतौ कर्मयोगः‖ ॥ २६ ॥

विग्रहगतिसमापन्नस्य जीवस्य कर्मकृत एव योगो भवति ।

---

* K वरट । † K B यूंतिका ।

‡ Var S adds here as a sutra अनीन्द्रियाः केवलिनः ।

§ II. 11. ‖ C कर्मयोगम् ।

कर्मशरीरयोग इत्यर्थः। अन्यच्च तु यथोक्तः कायवाङ्मनोयोग इत्यर्थः॥

अनुश्रेणि गतिः॥ २७॥

सर्वा गतिर्जीवानां पुद्गलानां चाकाशप्रदेशानुश्रेणि भवति विश्रेणिर्न भवतीति गतिनियम इति*।

अविग्रहा जीवस्य॥ २८॥

सिध्यमानगतिर्जीवस्य नियतमविग्रहा भवतीति।

विग्रहवती च संसारिणः प्राक् चतुर्भ्यः॥ २९॥

जात्यन्तरसंक्रान्तौ संसारिणो जीवस्य विग्रहवती चाविग्रहा च गतिर्भवति उपपातक्षेत्रवशात्। तिर्यगूर्ध्वमधश्च प्राक् चतुर्भ्य इति। येषां विग्रहवती तेषां विग्रहाः प्राक् चतुर्भ्यो भवन्ति। अविग्रहा एकविग्रहा द्विविग्रहा† त्रिविग्रहा इत्येताः§-श्चतुःसमयपराश्चतुर्विधा गतयो भवन्ति। परतो न संभवन्ति। प्रतिघाताभावाद्विग्रहनिमित्ताभावाच्च। विग्रहो वक्रितं विग्रहो व्यग्रहः श्रेण्यन्तरसंक्रान्तिरित्यनर्थान्तरम्। पुद्गलानामप्येवमेव॥

शरीरिणां‖ च¶ जीवानां विग्रहवती चाविग्रहवती** च प्रयोगपरिणामवशात्। न तु तच्च विग्रहनियम इति॥

अत्राह। अथ विग्रहस्य किं परिमाणमिति। अत्रोच्यते। क्षेत्रतो भाज्यम्। कालतस्तु

---

* A omits इति। † K B सिद्धमानस्य। ‡ C द्विविग्रहास्त्रि।
§ S probably एवम् for इति। ‖ B शारीरिणाम्।
¶ Mss. omits च। ** A omits K चाविग्रहा।

एकसमयो ऽविग्रहः ॥ ३० ॥

एकसमयो ऽविग्रहो भवति । अविग्रहा गति*रालोकान्तादण्येकेन समयेन भवति । एकविग्रहा द्वाभ्याम् । द्विविग्रहा त्रिभिः । त्रिविग्रहा चतुर्भिरिति । अत्र भङ्गप्ररूपणा कार्येति ॥

एकं द्वौ वानाहारकः ॥ ३१ ॥

विग्रहगतिसमापन्नो जीव एकं वा समयं द्वौ वा समयावनाहारको भवति । शेषं कालमनुसमयमाहारयति । कथमेकं द्वौ वानाहारको न बह्वनीत्यत्र भङ्गप्ररूपणा कार्या ॥

अत्राह । एवमिदानीं भवत्ये जीवो ऽविग्रहया विग्रहवत्या वा गत्या गतः कथं पुनर्जायत† इति अत्रोच्यते । उपपातक्षेत्रं स्वकर्मवशात्प्राप्तः शरीरार्थं पुद्गलग्रहणं करोति । सकषायत्वाज्जीवः कर्मणो योग्यान्पुद्गलानादत्त‡ इति । कायवाङ्मनःप्राणापानाः पुद्गलानामुपकारः§ । नामप्रत्ययाः॥ सर्वतो योगविशेषादिति¶ वक्ष्यामः । तज्जन्म । तच्च त्रिविधम् । तद्यथा ।

संमूर्छनगर्भोपपाता** जन्म ॥ ३२ ॥

संमूर्छनं गर्भ उपपात इत्येतत्त्रिविधं जन्म ।

सचित्तशीतसंवृत्ताः सेतरा मिश्राश्चैकशस्तद्योनयः॥३३॥

संसारे जीवानामस्य त्रिविधस्य जन्मन एताः सचित्तादयः

---

* K चविग्रहगतिरा० ।
† K ज्ञायते ।
‡ VIII. 2.
§ V. 19.
॥ KB नामप्रत्ययास्त० ।
¶ VIII. 24.
** KB •पाताज्जन्म ।

सप्रतिपक्षा मिश्राश्चैकशो योनयो भवन्ति। तद्यथा। सचित्ता अचित्ता सचित्ताचित्ता शीता उष्णा शीतोष्णा संवृत्ता विवृत्ता संवृत्तविवृत्ता इति। तत्र देवनारका*नामचित्ता योनिः। गर्भजन्मनां मिश्रा। त्रिविधान्येषाम्॥ गर्भजन्मनां देवानां च शीतोष्णा। तैजःकायस्योष्णा। त्रिविधान्येषाम्॥ नारकैकेन्द्रिय-देवानां संवृत्ता। गर्भजन्मनां मिश्रा। विवृत्तान्येषामिति॥

जराय्वण्डपोतजानां गर्भः† ॥ ३४ ॥

जरायुजानां मनुष्य-गो-महिषा‡जाविकाश्व-खरोष्ट्र-मृग-चमर-वराह-गवय-सिंह-व्याघ्रर्क्ष-दीपि-श्व§-शृगाल-मार्जारादीनाम्। अण्डजानां सर्प-गोधा-शकलाग्र-गृहकोकिलिका‖-मत्स्य-कूर्म-नक्र-शिशुमारादीनां¶ पक्षिणां च लोमपक्षाणां** हंस-चाष-शुक-गृध्र-श्येन-पारापत-काक-मयूर-मद्गु-बक-बला-कादीनां। पोतजानां शल्लक††-हस्ति-श्वाविल्लापक‡‡-शशशा-रिका-नकुल-मूषिकादीनां पक्षिणां च चर्मपक्षाणां§§ जलुका-||||
वल्गुलि-भारण्ड पक्षिविरालादीनां¶¶ गर्भो ***जन्मेति॥

नारकदेवानामुपपातः ॥ ३५ ॥

---

* KA नारकदेवाना०। † Var S जराय्वण्डजपोतानां गर्भः।
‡ B महिष्यजाविका०। § A श्व K द्वीपिक-शृ०।
‖ K गृहगोलिका। ¶ KB शिशुमार। ** Var S पक्षिणाम्।
†† C शल्लकहस्तिश्वाविल्लोचक ससारिका।
‡‡ B श्वासहाविल्लापक K श्वसेहाविल्लापक। §§ Var S पक्षिणाम्।
|||| K जलुका वल्लि H जलूका। ¶¶ C पिढालादीनां।
*** K B गर्भाज्जन्मेति।

नारकाणां देवानां चोपपातो जन्मेति ।

शेषाणां संमूर्छनम् ॥ ३६ ॥

* जराय्वण्डपोतजनारकदेवेभ्यः शेषाणां संमूर्छनं जन्म । उभयावधारणं चात्र* भवति । जरायुजादीनामेवा गर्भः । गर्भ एव जरायुजादीनाम्‡ । नारकदेवानामेवोपपातः । उपपात एव नारकदेवानाम् । शेषाणामेव संमूर्छनम् । संमूर्छनमेव शेषाणाम् ॥

औदारिकवैक्रियाहारकतैजसकार्मणानि शरीराणि[१] ॥ ३७ ॥

औदारिकं वैक्रियं आहारकं तैजसं कार्मणमित्येतानि पञ्च शरीराणि संसारिणां जीवानां भवन्ति ।

§तेषां परं परं सूक्ष्मम् ॥ ३८ ॥

तेषामौदारिकादिशरीराणां परं परं सूक्ष्मं[२] वेदितव्यम् । तद्यथा । औदारिकाद्वैक्रियं सूक्ष्मम् । वैक्रियादाहारकम् । आहारकात्तैजसम् । तैजसात्कार्मणमिति ॥

प्रदेशतो ऽसङ्ख्येयगुणं प्राक् तैजसात् ॥ ३९ ॥

तेषां शरीराणां परं परमेव प्रदेशतो[३] ऽसङ्ख्येयगुणं भवति

---

* BK omit च । † K जराय्वादीनामेव । ‡ K जराय्वादीनाम् ।
§ Some Mss. omit तेषाम्। H omits, but places it after the सूत्र । तेषामौदा ।

---

१ S अत्र केचित्सूत्रावयवमविच्छिद्य शरीराणीति पृथक् सूत्रं कल्पयन्ति ।
२ S स्वल्पाकाशप्रदेशावगाहीति ।
३ S अनन्ताणुस्कन्धः प्रदेशोऽत्राभिधीयते ।

प्राक् तैजसात्। औदारिकशरीरप्रदेशेभ्यो वैक्रियशरीरप्रदेशा असङ्ख्येयगुणाः। वैक्रियशरीरप्रदेशेभ्य आहारकशरीरप्रदेशा असङ्ख्येयगुणा इति॥

अनन्तगुणे परे॥ ४०॥

परे द्वे शरीरे तैजसकार्मणे पूर्वतः पूर्वतः* प्रदेशार्थतयानन्तगुणे भवतः। आहारकात्तैजसं प्रदेशतो ऽनन्तगुणम्। तैजसात्कार्मणमनन्तगुणमिति।

अप्रतिघाते॥ ४१॥

एते द्वे शरीरे तैजसकार्मणे अन्यत्र लोकान्तात्सर्वचाप्रतिघाते भवतः।

अनादिसंबन्धे† च॥ ४२॥

ताभ्यां तैजसकार्मणाभ्यामनादिसंबन्धो जीवस्येत्यनादिसंबन्ध इति।

सर्वस्य॥ ४३॥

सर्वस्य चैते तैजसकार्मणे शरीरे संसारिणो जीवस्य भवतः। एके त्वाचार्या नयवादापेक्षं व्याचक्षते। कार्मणमेवैकमनादिसंबन्धम्‡। तेनैवैकेन जीवस्यानादिः संबन्धो§ भवतीति। तैजसं तु लब्ध्यपेक्षं भवति। सा च तैजसलब्धिर्न सर्वस्य कस्यचिदेव भवति। क्रोधप्रसादनिमित्तौ शापानुग्रहौ प्रति तेजोनिसर्गशीतरश्मिनिसर्गकरं तथा भ्राजिष्णुप्रभासमुदयच्छायानिर्वर्तकं तैजसं¶ शरीरेषु मणिज्वलनज्योतिष्कविमानवदिति।

---

* K पूर्वतः once. † P संबद्धे। ‡ C संबन्धि।
§ K जीवस्यानादिसंबन्धे। ‖ HC कोप। ¶ K omits तैजसं।

तदादीनि भाज्यानि युगपदेकस्या चतुर्भ्यः ॥ ४४ ॥

ते[१] आदिनौ एषामिति तदादीनि । तैजसकार्मणे यावत्संसारभाविनौ आदिं* कृत्वा शेषाणि युगपदेकस्य जीवस्य

* C आदि ।

S [१]ते आदिनौ इत्यादि भाष्यं प्रस्तुततैजसकार्मणे तच्छब्देनाभिसंबध्यते । ते आदिनौ एषामौदारिकादीनां मेढिभूते व्यवस्थिते तानि तदादीनि समुदायसमासार्थः । एतदेव स्पष्टतरं करोति । तैजसकार्मणे यावत्संसारभाविनौ आदिं कृत्वा यावत्संसारं भवितुं शीलमनयोस्ते संसारभाविनौ- तैजसकार्मणे आदिं कृत्वा मेढीभूततया व्यवस्थाप्य शेषाण्यौदारिकादीनि एकस्मिन्काले एकजीवस्य भाज्यानि विकल्प्यानि आचतुर्भ्य इति यावच्चत्वारि युगपदेकजीवस्य भवन्त्यप्रत्याख्यानपक्षे अथैकीयमतेन तैजसं प्रत्याख्यानं तथा त्रीणि युगपदेकस्य स्युः । आचार्यस्याभिप्रायः कार्मणं च तैजसं आश्रयः सर्वदा सर्वस्यास्ति । अतस्ते आदिनौ एषामिति विग्रहः कृतवान् । ये तु प्रत्याचक्षते तेषां विग्रहः तत् आदि कार्मणमेषां तानीमानि तदादीनि । उभयथा च भाष्यं भविष्यति । आचार्यस्य तु विग्रहगतौ कर्मकृत एव योगो भवति न तु तैजसमित्यत्रैव लब्ध्यापेक्षत्वात्तत्क्रिया नास्ति । तस्यामवस्थायाम् । अन्यत्र त्वाचार्यस्य तैजसं सर्वत्रास्ति । तामिदानीमात्माभिप्रायानुसारिणीं भजनां दर्शयन्नाह तद्यथेत्यादिना । अन्तर्गतौ तैजसकार्मणे

केवले स्तः । इह तु तैजसमाश्रितमाचार्येण विग्रहगतावित्यत्र पराभिप्रायेण नाश्रितम् ॥ भवस्थतायामेते चौदारिकं चेति चीणि युगपत् । अथवा एते च वैक्रियं चेति चीणि । तिर्यङ्मनुष्याणां तैजसकार्मणौदारिकैः सह लब्धिप्रत्ययवैक्रियशरीरसद्भावे युगपदविच्छिन्नप्रदेशत्वाच्चत्वारि । चतुर्दशपूर्वधरमनुष्यस्याहारकलब्धौ सत्यां तैजसकार्मणौदारिकैः सह युगपदेवं चत्वारि पद्मनालतन्तुवदेव चाविच्छेदेनैकजन्मप्रदेशैश्चतुष्टयमपि प्रतिबद्धुमवसेयम् ॥ एवमेतान्पञ्च विकल्पान्स्वमते प्रदर्श्याधुना एकीयमतमादर्शयितुमाह । कार्मणमेव वा स्यात् । न ह्यन्तर्गतौ लब्धिप्रत्ययं तैजसमस्ति लब्धेर्मृतावेव प्रच्यवनात् । अतः कार्मणमेवैकमिति प्रथमो विकल्पः । कार्मणतैजसे वा स्यातामित्ययमचानुपपन्नो विकल्पः । हेया तु भाष्येष्वधीतः । कथं । यैः प्रत्याख्यातं सहजं तैजसं तेषां कुतोऽन्तर्गतौ तत्संभवः । न चान्यावस्था भवस्थतायामस्ति यत्रोभयमेव स्यात् । अनुत्पन्नतैजसवैक्रियलब्धेः कार्मणौदारिके द्वे भवतः । अथवा कार्मणवैक्रिये देवनारकाणां । तिर्यङ्मनुष्याणामनुत्पन्नतैजसलब्धीनां कार्मणौदारिकवैक्रियाणि युगपत् । अनुत्पन्नतैजसवैक्रियलब्धेश्चतुर्दशपूर्वधरमनुष्यस्य कार्मणौदारिकाहारकाणि वा । उत्पन्नलब्धीनां नृतिरश्चां कार्मणतैजसौदारिकवैक्रियाणि युगपच्चत्वारि भवन्ति । चतुर्दशपूर्वधरमनुष्यस्यानुत्पन्नवैक्रियलब्धेः कार्मणतैजसौदारिकाहारकाणि युगपत् । एवमेते ऽन्याचार्यदर्शनेन सप्त विकल्पाः संभवन्ति ॥

भाज्यान्या चतुर्भ्यः । तद्यथा । तैजसकार्मणे वा स्याताम् । तैजसकार्मणौदारिकाणि वा स्युः । तैजसकार्मणवैक्रियाणि वा स्युः । तैजसकार्मणौदारिकवैक्रियाणि वा स्युः । तैजसकार्मणौदारिकाहारकाणि वा स्युः ॥ कार्मणमेव वा स्यात्* । कार्मणौदारिके वा स्याताम् । कार्मणवैक्रिये वा स्याताम् । कार्मणौदारिकवैक्रियाणि वा स्युः । कार्मणौदारिकाहारकाणि वा स्युः । कार्मणतैजसौदारिकवैक्रियाणि वा स्युः । कार्मणतैजसौदारिकाहारकाणि वा स्युः । न तु† कदाचिद्युगपत्पञ्च भवन्ति । नापि वैक्रियाहारके युगपद्भवतः स्वामिविशेषादिति वक्ष्यते ॥

निरुपभोगमन्त्यम् ॥ ४५ ॥

अन्त्यमिति सूत्रक्रमप्रामाण्यात्कार्मणमाह । तच्चिरुपभोगम् । न सुखदुःखे तेनोपभुज्येते न तेन कर्म बध्यते न वेद्यते नापि निर्जीर्यत इत्यर्थः ॥ शेषाणि तु सोपभोगानि । यस्मात्सुखदुःखे तैरुपभुज्येते कर्म‡ बध्यते वेद्यते निर्जीर्यते च तस्मात्सोपभोगानीति ॥

अत्राह । एषां पञ्चानामपि शरीराणां संमूर्छनादिषु त्रिषु§ जन्मसु किं क्व जायत इति । अत्रोच्यते ।

गर्भसंमूर्छनजमाद्यम् ॥ ४६ ॥

आद्यमिति सूत्रक्रमप्रामाण्यादौदारिकमाह । तद्गर्भे संमूर्छने वा जायते ।

---

* Some Mss. add कार्मणतैजसे वा स्याताम् ।
† K च for तु । ‡ K adds च । § KB त्रिजन्मसु ।

वैक्रियमौपपातिकम् ॥ ४७ ॥

वैक्रियशरीरमौपपातिकं भवति। नारकाणां देवानां चेति*।

लब्धिप्रत्ययं च ॥ ४८ ॥

लब्धिप्रत्ययं च वैक्रियशरीरं† भवति। तिर्यग्योनीनां मनुष्याणां चेति।

शुभं विशुद्धमव्याघाति चाहारकं चतुर्दशपूर्वधरस्यैव‡ ॥ ४९ ॥

शुभमिति शुभद्रव्योपचितं शुभपरिणामं चेत्यर्थः। विशुद्धमिति विशुद्धद्रव्योपचितमसावद्यं चेत्यर्थः। अव्याघातीति आहारकं शरीरं न व्याहन्ति न व्याहन्यते चेत्यर्थः। तच्चतुर्दशपूर्वधर एव कस्मिंश्चिदर्थे छद्मस्थे ऽत्यन्तसूक्ष्मे संदेहमापन्नो निश्चयाधिगमार्थं क्षेत्रान्तरितस्य भगवतो ऽर्हतः पादमूल§मौदारिकेण शरीरेणाशक्यगमनं॥ मत्वा लब्धिप्रत्ययमेवोत्पादयति दृष्ट्वा¶ भगवन्तं क्षिप्रसंशयः पुनरागत्य व्युत्सृजत्यन्तर्मुहूर्तस्य ॥ तैजसमपि[१] शरीरं लब्धिप्रत्ययं भवति ॥

---

* K omits च। † K वैक्रियं शरीरं। ‡ A °धर एव। § C मूले।
|| K अशक्यं गन्तुमितिमत्वा। ¶ K adds च।

---

१ This is marked as a separate sutra by Mss. Bhandakar does the same. But S does not do so. H considers this to be a sūtra तैजसमपि ॥ तैजसं शरीरं।

S अथ तैजसकार्मणे कस्मिन् जन्मनि समुद्भवत इति नानयोर्नियमः सर्वत्राप्रतिहतशक्तित्वात्सर्वजन्मसु सह तैजसं कार्मणं वा

कार्मणमेषां निबन्ध*माश्रयो भवति । तत्कर्मत एव भवतीति बन्धे परस्ताद्†च्यति । कर्म हि कार्मणस्य कारणमन्येषां च शरीराणामादित्यप्रकाशवत् ॥ यथादित्यः स्वमा-

* K निबन्धनमा० । † VIII.

स्यात् । तनुलब्धि तैजसमतो लब्धिप्रस्तावमुपजीवन्भाष्यकार-स्तैजसमपीत्याह । तेजोविकारस्तैजसं सर्वस्योष्णलक्षणं रसाद्याहारपाकजननमेतच्चावश्यं सर्वप्राणिविषयमभ्युपगन्तव्यमन्यथा शरीरपदे तैजसशरीराणि बद्धान्यनन्तानि अनन्तोत्सर्पिण्यवसर्पिणीसमयराशिसमसङ्ख्यानि कालतः क्षेत्रतो ऽनन्ता लोका द्रव्यतः सिद्धेभ्यो ऽनन्तगुणानि सर्वजीवानन्तभागोनानि । किं पुनः कारणमनन्तानि तत्स्वामिनामानन्त्यादित्येष ग्रन्थः सर्वो विघटेत । लब्धिप्रत्यय एवाङ्गीक्रियमाणे तैजसवपुष्यतो विद्यमानमपि सर्वासुमत्सु सहजमनादृत्य तैजसं लब्ध्यधिकारे लब्धिप्रत्ययमेवाचष्टे नेतरदिति तैजसं शरीरं तैजसशरीरलब्धिकारणमुद्भूतशक्ति भवति तपोविशेषानुष्ठानात्कस्यचिदेव जातुचिन्न सर्वस्येति ॥

H तैजसमपीति सूत्रं संबन्धः प्रतीतः समुदायार्थं वा । अवयवार्थमाह तैजसमित्यादिना तैजसमपि शरीरं प्राङ्निर्दिष्टस्वरूपं किमित्याह लब्धिप्रत्ययं लब्धिनिमित्तं भवति लब्धिनिमित्तमपि न तु लब्धिनिमित्तमेव कार्मणभेदस्योष्णलक्षणस्य रसाद्याहारपाकजनकस्य भावादिति ॥

त्मानं प्रकाशयत्यन्यानि च द्रव्याणि न चास्यान्यः प्रकाशकः* । एवं कार्मणमात्मनश्च† कारणमन्येषां च शरीराणामिति ॥

अत्राह । औदारिकमित्येतदादीनां शरीरसंज्ञानां कः पदार्थ इति । अत्रोच्यते । उद्गतारमुदारम् । उत्कटार‡-मुदारम् । उद्गम एव §वोदारम् । उपादानात्प्रभृति अनुसमयमुद्गच्छति वर्धते जीर्यते शीर्यते परिणमतीत्युदारम् । उदारमेवौदारिकम् । नैवमन्यानि ॥ यथोद्गमं वा निरतिशेषं॥ याह्यं क्षेयं भेद्यं दाह्यं हार्यमित्युदारणा¶दौदारिकम् । नैवमन्यानि ॥ उदारमिति च स्थूलनाम** । स्थूलमुद्गतं पुष्टं बृहन्महदित्युदारमेवौदारिकम् । नैवं शेषाणि । तेषां हि परं परं सूक्ष्ममित्युक्तम्†† ॥

वैक्रियमिति । विक्रिया विकारो विकृतिर्विकरणमित्यनर्थान्तरम् । विविधं क्रियते । एकं भूत्वानेकं भवति । अनेकं भूत्वा एकं भवति । अणु भूत्वा महद्भवति । महच्च भूत्वाणु भवति । एकाकृति भूत्वानेकाकृति भवति । अनेकाकृति भूत्वा एकाकृति भवति । दृश्यं भूत्वादृश्यं भवति । अदृश्यं भूत्वा दृश्यं भवति । भूमिचरं भूत्वा खेचरं भवति खेचरं भूत्वा भूमिचरं भवति । प्रतिघाति भूत्वाप्रतिघाति भवति । अप्रतिघाति भूत्वा प्रतिघाति भवति । युगपच्चैतान् भावाननुभवति । नैवं

---

* K चास्यान्यैः प्रकाशः । † S आत्मनश्च स्वरूपस्य कारणम् ।

‡ C उत्कठारम् । § A omits वा । ‖ K adds वा ।

¶ A उदारणा, B K उदाहरणा, S perhaps विदारणात् ।

** C omits नाम । †† II. 38.

शेषाणीति । विक्रियायां भवति* विक्रियायां जायते विक्रियायां निर्वर्त्यते विक्रियैव† वा वैक्रियम् ॥

आहारकम् । आहृियत इति आहार्यम् । आहारकमन्तर्मुहूर्तस्थिति । नैवं शेषाणि ॥

तेजसो विकारस्तैजसं तेजोमयं तेजःस्वतत्त्वं प्रापानुग्रह- 5
प्रयोजनम् । नैवं शेषाणि ॥

कर्मणो विकारः कर्मात्मकं कर्ममयमिति कार्मणम् । नैवं शेषाणि ॥

एभ्य एव चार्थविशेषेभ्यः शरीराणां नानात्वं सिद्धम्‡ । किं चान्यत् । कारणतो विषयतः स्वामितः प्रयोजनतः 10
प्रमाणतः प्रदेशसङ्ख्यातो ऽवगाहनतः स्थितितो ऽल्पबहुत्वत इत्येतेभ्यश्च नवभ्यो विशेषेभ्यः शरीराणां नानात्वं सिद्धमिति[१] ।

---

* C विक्रियायां भवं । † K विक्रयैव वा वैक्रियम् । ‡ K adds इति ।

---

१ K and B here add a long passage explaining these indicia of distinguishing these different sorts of bodies which is copied verbatim from S.

एवमन्वर्थसंज्ञाकानि* प्रतिपाद्यौदारिकादीनि एकप्रयत्नप्रसाध्यं लक्षणभेदात् शरीरनानात्वमुपदिशति । एभ्य एव चार्थविशेषेभ्यः शरीराणां नानात्वं सिद्धम् । उदाराद्यर्थविशे- 15
षेभ्यो विहितलक्षणेभ्यो विविक्तस्वरूपेभ्यः शरीराणां नानात्वं घटपटादीनामिव लक्षणभेदात्सिद्धमिति ॥

---

* K संज्ञकानि । † B omits च ।

किं चान्यदित्यादि । न केवलमन्वर्थसंज्ञाख्या*नद्वारेणैव विशेषः शरीराणामन्येभ्यो पि हेतुभ्यः सम्भवत्येव कारणादिभ्यः ॥ **तच्च कारणतस्तावत्** । स्थूलपुद्गलोपचितमूर्ति औदारिकं । न तथा वैक्रियादीनि । परं परं सूक्ष्ममिति वचनात्† ॥ **तथा विषयकृतो भेदः** । विद्याधरौदारिकशरीराणि प्रत्यानन्दीश्वरादौदारिकस्य विषयः जङ्घाचारणं प्रत्यारुचकवरपर्वतात्तिर्यक् ऊर्ध्वमापण्डकवनात्‡ । वैक्रियमसङ्ख्येयद्वीपसमुद्रविषयम् । आहारकस्य यावन्महाविदेहचैत्यानि । तैजसकार्मणयोरासर्वलोकात् ॥ **तथा स्वामिकृतो विशेषः** । औदारिकस्य तिर्यग्मनुष्याः । वैक्रियस्य देवनारकाः तिर्यग्मनुष्याश्च केचित् । आहारकस्य चतुर्दशपूर्वधरमनुष्यसंयताः । तैजसकार्मणयोः सर्वसंसारिणः ॥ **तथा§ प्रयोजनकृतो भेदः** । औदारिकस्य धर्माधर्मसुखदुःखकेवलज्ञानावाप्त्यादि प्रयोजनम् । वैक्रियस्य स्थूलसूक्ष्मैकत्वव्योमचरचित्तिगतिविषयाद्यनेकलक्षणा‖ विभूतिः । आहारकस्य सूक्ष्मव्यवहितदुरवगाहार्थव्यवच्छित्तिः । तैजसस्याहारपाकः शापानुग्रहप्रदानसामर्थ्यं च । कार्मणस्य भवान्तरगतिपरिणामः ॥ **तथा प्रमाणकृतो भेदः** । सातिरेकं योजनसहस्रमौदारिकम् । योजनलक्षप्रमाणं वैक्रियम् । रत्निप्रमाणमाहारकम् । लोकायामप्रमाणे तैजसकार्मणे ॥ **प्रदेशसङ्ख्यातो भेदः** । प्रदेशतो ऽसङ्ख्येयगुणं प्राक्तैजसात् अनन्तगुणे

* B संज्ञानद्वा० । † II 38 ।
‡ K चापाण्डक० । § K तेषां for तथा । ‖ B लक्षणविभूति ।

परे त्वाहुः* प्रदेशभेदः प्राक्॥ **तथावगाहनाकृतो विशेषः।** सातिरेकयोजनसहस्रमौदारिकमसङ्ख्येयप्रदेशेषु यावत्स्वावगाढं भवति। तेभ्यो बहुतरकासङ्ख्येयप्रदेशावगाढं योजनसहस्रप्रमाणं वैक्रियं भवति। आहारकमाभ्यामल्पतरप्रदेशावगाढं भवति। हस्तमात्रत्वात्। तैजसकार्मणे लोकान्तायताकाशश्रेण्यवगाढे भवतः॥ **तथा स्थितिकृतो भेदः।** औदारिकं जघन्येनान्तर्मुहूर्तस्थिति उत्कर्षेण त्रिपल्योपमस्थिति। वैक्रियं जघन्येनान्तर्मुहूर्तस्थिति उत्कर्षेण त्रयस्त्रिंशत्सागरोपमस्थिति। आहारकमन्तर्मुहूर्तस्थित्येव। तैजसकार्मणयोः सन्तानानुरोधादनादित्वमपर्यवसानता चाभव्यसम्बन्धितया अनादित्वं अपर्यवसानता च भव्यसम्बन्धिलेनेति। **तथाल्पबहुत्वकृतो विशेषः।** सर्वस्तोकमाहारकं यदि संभवति कदाचिन्न संभवत्यपि। किं कारणम्। येन तस्यान्तरमुक्तं जघन्येनैकः समय उत्कृष्टेन षण्मासाः तद्यदि भवति ततो जघन्यैकमादिं कृत्वा यावदुत्कर्षेण नवसहस्राणि युगपद्भवन्त्याहारकशरीराणाम्। आहारकादैक्रियशरीराण्यसङ्ख्येयगुणानि नारकदेवानामसङ्ख्येयत्वात् असङ्ख्येयोत्सर्पिणीसमयराशिसमसङ्ख्यानि भवन्ति। वैक्रियशरीरेभ्य औदारिकशरीराण्यसङ्ख्येयगुणानि तिर्यक्शरीरमनुष्याणामसङ्ख्येयत्वात् असङ्ख्येयोत्सर्पिणीवसर्पिणीसमयराशिसमसङ्ख्यानि। ननु च तिर्यञ्चोऽनन्ताः तत्कथमानन्त्ये सत्यसङ्ख्येयानि शरीराणि स्युः

* II 39 II 40।

† K •सहस्रप्रमाणमौदा•।

अत्राह। आसु चतसृषु संसारगतिषु को लिङ्गनियम इति। अत्रोच्यते। जीवस्यौदयिकेषु भावेषु* व्याख्यायमानेषूक्तम्। त्रिविधमेव लिङ्गं स्त्रीलिङ्गं पुंलिङ्गं नपुंसकलिङ्गमिति† ॥ तथा चारित्रमोहे नोकषायवेदनीये त्रिविध एव वेदो वक्ष्यते‡। स्त्रीवेदः पुंवेदो नपुंसकवेद इति ॥ तस्मात्त्रिविधमेव लिङ्गमिति ॥ तत्र —

नारकसंमूर्छिनो नपुंसकानि§ ॥ ५० ॥

नारकाश्च सर्वे¶ संमूर्छिनश्च नपुंसकान्येव भवन्ति। न स्त्रियो न पुमांसः¶। तेषां हि** चारित्रमोहनीयनोकषायवेदनीयाश्रयेषु त्रिषु वेदेषु नपुंसकवेदनीयमेवैकमशुभगतिनामापेक्षं पूर्वबद्धनिकाचितमुदयप्राप्तं भवति नेतरे इति ॥

---

* K जीवस्यौदयिकभावेषु। † II. 6.
‡ VIII. 10. § Var S नपुंसकाः।
¶ C सर्वे twice। ¶ C प्र० 500। ** K omits हि।

उच्यते। प्रत्येकशरीराणामसङ्ख्येयानि साधारणास्त्वनन्ताः तेषामनन्तानामेकं शरीरं भवतीत्यतोऽसङ्ख्येयानि न पुनरनन्तानामपि प्रत्येकं शरीरमस्ति तस्मात्सुष्ठूक्तमसङ्ख्येयानीति ॥ औदारिकशरीरेभ्यः तैजसकार्मणान्यनन्तगुणानि। तानि हि प्रत्येकं सर्वजीवानां संसारिणां भवन्त्यतोऽनन्तानि न पुनरेकं तैजसं कार्मणं वा बहूनामिति ॥ एवमेतेभ्यः कारणादिभ्यः नवभ्यो विशेषेभ्यः शरीराणां नानात्वं* प्रतिष्ठितमवसातव्यमिति ॥

---

* B adds सिद्धं।

न देवाः ॥ ५१ ॥

देवाश्चतुर्निकाया अपि नपुंसकानि न भवन्ति । स्त्रियः पुमांसश्च भवन्ति । तेषां हि शुभगतिनामापेक्षे स्त्रीपुंवेदनीये पूर्ववद्बहुनिकाचिते उदयप्राप्ते द्वे एव भवतो नेतरत् । पारिशेष्या*च्च गम्यते जराण्डपोतजास्त्रिविधा भवन्ति स्त्रियः पुमांसो नपुंसकानीति ॥

अत्राह । चतुर्गतावपि संसारे किं व्यवस्थिता स्थितिरायुष उताकालमृत्युरप्यस्तीति । अत्रोच्यते । †द्विविधान्यायूंषि । अपवर्तनीयानि अनपवर्तनीयानि च । अनपवर्तनीयानि पुनर्द्विविधानि । सोपक्रमाणि निरुपक्रमाणि च । अपवर्तनीयानि तु‡ नियतं सोपक्रमाणीति ॥ तच्च

औपपातिकचरमदेहोत्तमपुरुषासङ्ख्येयवर्षायुषोऽनपवर्त्यायुषः[१] ॥ ५२ ॥

---

* S perhaps परिशेषाच्च । † B चि० । ‡ K omits तु ।

---

१ Var S omits उत्तमपुरुष । After discussing this point very elaborately S sums up by saying he is very doubtful as to the true reading. A portion of it is as follows :—

उत्तमपुरुषास्तीर्थकरचक्रवर्तिबलदेववासुदेवादयः केचिद्भिद्यते नास्ति सूचकारस्योत्तमपुरुषग्रहणमिति तत्कथं तीर्थकरादिसंग्रहमिति चेदेवं मन्यन्ते चरमदेहग्रहणाद्गृहीष्यन्ते कथं ये किल चरमदेहास्ते नियमत एवोत्तमा भवन्ति उत्तमास्तु चरमदेहत्वेन भाज्या वासुदेवादय इति तस्मादनार्षमुत्तमपुरुषग्रहण-

औपपातिकाश्चरमदेहा उत्तमपुरुषा असङ्ख्येयवर्षायुष इत्येते ऽनपवर्त्यायुषो भवन्ति। तत्रौपपातिका नारकदेवाश्चेत्युक्तम्*। चरमदेहा मनुष्या एव भवन्ति नान्ये। चरमदेहा अन्त्यदेहा इत्यर्थः†। ये तेनैव शरीरेण सिध्यन्ति। उत्तमपुरुषास्तीर्थकर-चक्रवर्त्यर्धचक्रवर्तिनः। असङ्ख्येयवर्षायुषो मनुष्याः तिर्यग्योनिजाश्च भवन्ति। सदेवकुरूत्तरकुरुषु सान्तरद्वीपकास्वकर्मभूमिषु कर्मभूमिषु च सुषमसुषमायां सुषमायां सुषमदुःषमायामित्यसङ्ख्येयवर्षायुषो मनुष्या भवन्ति। अत्रैव‡ बाह्येषु द्वीपेषु समुद्रेषु तिर्यग्योनिजा असङ्ख्येयवर्षायुषो भवन्ति। औपपातिकाश्चासङ्ख्येयवर्षायुषश्च निरुपक्रमाः। चरमदेहाः सोपक्रमा निरुपक्रमाश्चेति। एभ्य औपपातिकचरमदेहासङ्ख्येयवर्षायुर्भ्यः शेषा मनुष्यास्तिर्यग्योनिजाः सोपक्रमा निरुपक्रमाश्चापवर्त्यायुषो ऽनपवर्त्यायुषश्च भवन्ति। तत्र ये ऽपवर्त्यायुषस्तेषां विषशस्त्रकण्टकाग्न्युदकाद्यग्नि§ताजीर्णाग्निप्रपातोद्व-

* II. 35. † B नान्ये चरमदेहा इत्यदेहा इत्यर्थः। ‡ C adds च।
§ C adds उत्तमपुरुष but S distinctly says the word is not in his text.
‖ B उदकानिवानिता, K उदकानितामिता। A उदकाहितामिता०।

मिति। उभयथा च भाष्यमुपलक्ष्यते अविगानात् आदावुत्तमपुरुषास्तीर्थकरादय इति विवृतमुत्तरकालं पुनर्नोपात्तमुत्तमपुरुषग्रहणं निरुपक्रमसोपक्रमनिरूपणायामतो भाष्यादेव संदेहः किमस्ति नास्तीति संशयात्तमेवेदमस्माकम्॥ In श्रावकप्रज्ञप्ति by the same author in verse 74, उत्तमपुरुष in this context is adopted.

न्मनश्चापदवज्रनि*र्घातादिभिः क्षुत्पिपासाशीतोष्णादिभिश्च द्वन्द्वोपक्रमैरायुरपवर्त्यते† । अपवर्तनं शीघ्रमन्तर्मुहूर्तात्कर्मफलोपभोगः । उपक्रमोऽपवर्तननिमित्तम् ॥

अत्राह । यद्यपवर्तते‡ कर्म तस्मात्कृतनाशः प्रसज्यते यस्मान्न वेद्यते । अथाख्यायुष्कं कर्म म्रियते च तस्मादकृताभ्यागमः प्रसज्यते । येन सत्यायुष्के म्रियते ततश्चायुष्कस्य कर्मणः आफल्यं प्रसज्यते§ । अनिष्टं चैतत् । एकभवस्थिति चायुष्कं कर्म न जात्यन्तरानुबन्धि तस्माच्चापवर्तनमायुषोऽस्तीति ॥ अत्रोच्यते । कृतनाशाकृताभ्यागमा||फल्यानि कर्मणो न विद्यन्ते । नाप्यायुष्कस्य जात्यन्तरानुबन्धः । किं तु यथोक्तैरुपक्रमैरभिहतस्य सर्वसंदोहेनोदयप्राप्तमायुष्कं कर्म शीघ्रं पच्यते तदपवर्तनमित्युच्यते । संहतशुष्कतृण¶राशिदहनवत् । यथाहि संहतस्य शुष्कस्यापि तृणराशेरवयवशः क्रमेण दह्यमानस्य चिरेण दाहो भवति तस्यैव शिथिल**प्रकीर्णोपचितस्य सर्वतो†† युगपदादीपितस्य पवनोपक्रमाभिहतस्याशु दाहो भवति‡‡ तद्वत् । यथा वा सङ्ख्यानाचार्यः करणलाघवार्थं गुणकारभागहाराभ्यां राशिं§§छेदादेवापवर्तयति न च सङ्ख्येयस्यार्थस्याभावो भवति तद्वदुपक्रमाभिहतो मरणसमुद्घातदुःखार्त्तः कर्म-

---

* B वज्राद्यिघाता०, K वज्रादिघाता० । A वज्रोपघातादिभिः ।

† A अपवर्तते । ‡ K यद्यपवर्त्यते ।

§ K प्रसज्यात् । || K B ०भावाफल्यानि ।

¶ K संहतशुष्कतृणराशिदहन० । ** C adds च ।

†† सर्वशो । ‡‡ B K add अर्थस्य । §§ K B राशि०


प्रत्ययमनाभोगयोगपूर्वकं करणविशेषमुत्पाद्य फलोपभोगलाघवार्थं कर्मापवर्तयति न चास्य फलाभाव इति ॥ किं चान्यत् । यथा वा धौतपटो जलार्द्र एव संहतश्चिरेण शोषमुपयाति स एव च वितानितः सूर्यरश्मिवाय्वभिहतः* क्षिप्रं शोषमुपयाति न च संहते तस्मिन्प्रभूतस्नेहागमो† नापि वितानिते‡ ऽल्पस्नेहशोषः तद्वद्यथोक्तनिमित्तापवर्तनैः§ कर्मणः क्षिप्रं फलोपभोगो भवति । न च कृतप्रणाशाकृताभ्यागमाफल्यानि ॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसंग्रहे
द्वितीयो ऽध्यायः समाप्तः ॥

---

* K निग्मरश्मिवाय्वभिहतः । † K तस्मिनभूतस्नेहागमो ।
‡ A adds सति । § C adds भाष्यतः ।

अथ तृतीयो ऽध्यायः ॥



अथाह । उक्तं भवता । नारका इति गतिं प्रतीत्य जीवस्यौदयिको भावः* । तथा जन्मसु नारकदेवानामुपपातः† । वक्ष्यति च । स्थितौ नारकाणां च द्वितीयादिषु‡ । आस्रवेषु बह्वारम्भपरिग्रहत्वं च नारकस्यायुषः§ इति ॥ तत्र के नारका नाम क्व चेति‖ । अत्रोच्यते । नरकेषु भवा नारकाः । तत्र नरकप्रसिद्ध्यर्थमिदमुच्यते

रत्न-शर्करा-वालुका-पङ्क-धूम-तमो-महातमःप्रभा-भूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताधो ऽधः पृथुतराः ॥ १ ॥

रत्नप्रभा शर्कराप्रभा वालुकाप्रभा पङ्कप्रभा धूमप्रभा तमःप्रभा महातमःप्रभा इत्येता¶ भूमयो घनाम्बुवाताकाशप्रतिष्ठा भवन्त्येकैकशः** सप्तअधो ऽधः । रत्नप्रभाया अधः शर्कराप्रभा । शर्कराप्रभाया अधो वालुकाप्रभा । इत्येवं शेषाः । अम्बुवाताकाशप्रतिष्ठा†† इति सिद्धे घनग्रहणं क्रियते यथा प्रतीयते घनमेवाम्बु अधः पृथिव्याः‡‡ । वातास्तु घनास्तनवश्चेति । तदेवं

---

* II. 6. † II. 35. ‡ IV. 34. § VI. 16. ‖ K वेति ।
¶ C omits इत्येता । ** S एकशः ।
†† K प्रतिष्ठा here and elsewhere. ‡‡ C पृथिव्यां ।

खरपृथिवी पङ्कप्रतिष्ठा पङ्को घनोदधिवलयप्रतिष्ठो* घनोदधिवलयं घनवातवलयप्रतिष्ठं घनवातवलयं तनुवातवलयप्रतिष्ठं ततो महातमोभूतमाकाशम्। सर्वं चैतत्पृथिव्यादि तनुवातवलयान्तमाकाशप्रतिष्ठम्। आकाशं त्वात्मप्रतिष्ठम्। उक्तमवगाहनमाकाशस्येति†। तदनेन क्रमेण लोकानुभावसंनिविष्टा‡[1] असङ्ख्येययोजनकोटीकोट्यो विस्तृताः सप्त भूमयो रत्नप्रभाद्याः॥

सप्तग्रहणं नियमार्थं रत्नप्रभाद्याः§ माभूवन्नेकशो ह्यनियतसङ्ख्या इति। किं चान्यत्। अधः सप्तैवेत्यवधार्यते। ऊर्ध्वं लेकैवेति वक्ष्यते। अपि च तन्त्वान्तरीया[2] असङ्ख्येयेषु लोकधातुष्वसङ्ख्येयाः पृथिवीप्रस्तारा इत्यध्यवसिताः। तत्प्रतिषेधार्थं च सप्तग्रहणमिति॥

सर्वास्वेता अधोऽधः पृथुतराः क्वचातिच्छत्रसंस्थिताः। धर्मा वंशा शैलाञ्जनारिष्टा माघव्या माघवीति¶ चासां नामधेयानि यथासङ्ख्यमेवं** भवन्ति। रत्नप्रभा घनभावेनाशीतं योजनशतसहस्रं शेषा द्वात्रिंशदष्टाविंशतिविंशत्यष्टादशषोडशाष्टाधिकमिति††।

---

* K colophon घनशब्दलोपः। † V. 18. ‡ H. B omit सं।
§ B omits. ‖ C omits हि।
¶ B मघा माघवतीति। ** K यथासङ्ख्यमेव।
†† K द्वात्रिंशदष्टाविंशतिः विंशतिः अष्टादश षोडशाष्टाधिकमिति।

---

१ S लोकस्थितिरनाद्या न केनचिदीश्वरादिना कृता व्योमवदकृत्रिमा।
२ S प्रायो मायासूनवीयाः।

सर्वे घनोदधयो विंशतियोजनसहस्राणि*। घनवाततनुवातास्व-
सङ्ख्येयानि अधो ऽधस्तु घनतरा विशेषेणेति ॥

तासु नरकाः ॥ २ ॥

तासु रत्नप्रभाद्यासु भूपूर्ध्वमधश्चैकैको योजनसहस्रमेकैकं वर्जयित्वा मध्ये नरका भवन्ति। तद्यथा। उष्ट्रिकापिष्टपचनीखोही- 5
कर†केन्द्रजानुकाजन्त्रो‡कायस्कुम्भा§यःकोष्ठादि‖संस्थाना वज्रतलाः सीमन्तकोपक्रान्ता¶ रौरवोऽच्युतो रौद्रो हाहारवो** घातनः शोचनस्तापनः†† क्रन्दनो विलपन‡‡च्छेदनो भेदनः खटाखटः§§ कालपिञ्जर‖‖‖ इत्येवमाद्या अशुभनामानः कालमहाकालरौरव-महारौरवाप्रतिष्ठानपर्यन्ताः ॥ रत्नप्रभायां नरकाणां प्रस्तारा¶¶- 10
स्त्रयोदश। द्वितीयाः शेषासु ॥ रत्नप्रभायां नरकवासानां*** त्रिंशच्छतसहस्राणि। शेषासु पञ्चविंशतिः पञ्चदश दश त्रीण्येकं पञ्चोनं नरक†††शतसहस्रमित्याषष्ठ्याः। सप्तम्यां तु पञ्चैव महानरका‡‡‡ इति ॥

नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥ ३ ॥ 15

ते नरका भूमिक्रमेणाधो ऽधो निर्माणतो ऽशुभतराः।

---

* K adds घनाः। † B खोदीकर। ‡ B जानुकजचा K जत्ता। § K कायाखुम्भ। ‖ K कोष्टकादि। ¶ K सीमन्तकोपक्रान्ताः B सोमन्तकोपकान्तगी। ** C हारवो। †† K शोधनः पाचनः। ‡‡ B विलेपन। §§ K खाटाखटः। ‖‖‖ A कलपिञ्जरः K. काल-पञ्जरः। ¶¶ प्रस्तराः *** K नरकावासानां। ††† K नरकावास०। ‡‡‡ K omits महा।

अशुभा रत्नप्रभायां ततो ऽशुभतराः शर्कराप्रभायां ततो ऽप्यशुभतरा वालुकाप्रभायाम्। इत्येवमासप्तम्याः॥

नित्यग्रहणं गतिजातिशरीराङ्गोपाङ्गकर्मनियमादेते लेश्यादयो भावा नरकगतौ नरकपञ्चेन्द्रियजातौ* च नैरन्तर्येणाभवक्षयोद्वर्तनाद्भवन्ति न कदाचिदचिन्निमेषमात्रमपि न भवन्ति शुभा वा भवन्त्यतो† नित्या इत्युच्यन्ते‡॥

अशुभतरलेश्याः। कापोतलेश्या रत्नप्रभायाम्। ततस्तीव्रतरसंक्लेशाध्यवसाना कापोता शर्कराप्रभायाम्। ततस्तीव्रतरसंक्लेशाध्यवसाना कापोतनीला वालुकाप्रभायाम्। ततस्तीव्रतरसंक्लेशाध्यवसाना नीला पङ्कप्रभायाम्। ततस्तीव्रतरसंक्लेशाध्यवसाना नीलकृष्णा धूमप्रभायाम्। ततस्तीव्रतरसंक्लेशाध्यवसाना कृष्णा तमःप्रभायाम्। ततस्तीव्रतरसंक्लेशाध्यवसाना कृष्णैव महातमःप्रभायामिति॥

अशुभतरपरिणामः§। बन्धनगतिसंस्थानभेदवर्णगन्धरसस्पर्शागुरुलघुशब्दाख्यो दशविधो‖ ऽशुभः पुद्गलपरिणामो¶ नरकेषु। अशुभतरश्चाधो ऽधः। तिर्यगूर्ध्वमधश्च सर्वतो ऽनन्तेन भयानकेन नित्योत्तमकेन** तमसा नित्यान्धकाराः श्लेष्ममूत्रपुरीषस्रोतो††मलरुधिरवसामेदपूयानुलेपनतलाः श्मशानमिव पूतिमांसकेशास्थिचर्मदन्तनखास्तीर्णभूमयः। श्वशृगालमार्जारनकुलसर्पमूषक‡‡-

---

* B omits, A C नरकजातौ। † C omits शुभा वा भवन्ति।
‡ A and C omit. § K परिणामाः। ‖ K adds अपि।
¶ C omits पुद्गल। ** K नित्येनोत्तमकेन। †† K श्रोतो०।
‡‡ K. A. C मूषिक।

हस्त्यश्वगोमानुषगवक्कोष्ठा*शुभतरगन्धाः । हा मातर्धिग्हो† कष्टं बत मुञ्च तावद्भावत‡ प्रमीद§ भर्तर्मा वधीः कृपणकमित्यनुबद्धरुदितैस्तीव्रकरुणैर्दीनविक्लवैर्विलापैरार्त्तस्वनैर्निनादैर्दीनकृपणकरुणैर्याचितैर्बाष्पसंनिरुद्धैर्निस्वनितैर्गाढवेदनैः कूजितैः‖ सन्तापोष्णैश्च निश्वासैरनुपरतभय¶स्वनाः** ॥ 5

अशुभतरदेहाः । देहाः शरीराणि । अशुभनामप्रत्ययादशुभान्यङ्गोपाङ्गनिर्माणसंस्थानस्पर्शरसगन्धवर्णस्वराणि । कुण्डानि†† निर्लूनाण्डजशरीराकृतीनि क्रूरकरुणबीभत्सप्रतिभयदर्शनानि दुःखभाञ्ज्यशुचीनि च तेषु शरीराणि भवन्ति । अतो ऽशुभतराणि चाधो ऽधः । सप्त धनूंषि त्रयो हस्ताः षडङ्गुलमिति शरीरोच्छ्रायो नारकाणां रत्नप्रभायाम् । द्विर्द्विः शेषासु । स्थितिवच्चोत्कृष्टजघन्यता‡‡ वेदितव्या ॥ 10

अशुभतरवेदनाः । अशुभतराश्च वेदना भवन्ति नरकेष्वधो ऽधः । तद्यथा । उष्णवेदनास्तीव्रास्तीव्रतरास्तीव्रतमाश्च द्वतीयायाः । उष्णशीते चतुर्थ्याम् । शीतोष्णे पञ्चम्याम् । परयोः शीताः शीततरास्चेति । तद्यथा । प्रथमशरत्काले चरमनिदाघे वा पित्तव्याधि§§प्रकोपाभिभूतशरीरस्य सर्वतो दीप्ताग्निराग्नि- 15

---

* K कोष्ठ, B कोथ । † K मातर्द्विधा ऽहो । ‡ A. C यावत ।
§ K प्रसीदत भातर्मा । ‖ C कूर्जितैः । ¶ K प्रतिभय for भय ।
** Out of these ten kinds of परिणाम only वर्ण-गन्ध and शब्दपरिणाम are described; the rest are only mentioned.
†† K. B तुण्डानि । ‡‡ C ०जघन्यतो । §§ C omits व्याधि ।

परिवृतस्य व्यभ्रे नभसि मध्याह्ने निवाते ऽतिरक्ततातपस्य यादृगुष्णजं दुःखं भवति ततो ऽनन्तगुणं प्रकृष्टं* कष्टमुष्णवेदनेषु नरकेषु भवति। पौषमाघयोश्च मासयोस्तुषारस्निग्धगात्रस्य† रात्रौ हृदयकरचरणाधरौष्ठदग्धनायासिनि प्रतिसमयप्रवृद्धे शीतमारुते निरग्न्याश्रयप्रावरणस्य यादृक्‡ शीतसमुद्भवं दुःखमशुभं भवति ततो ऽनन्तगुणं प्रकृष्टं कष्टं ॥शीतवेदनेषु नरकेषु भवति। यदि किलोष्णवेदनान्नरकादुत्क्षिप्य नारकः सुमहत्यङ्गारराशावुद्दीप्ते प्रक्षिप्येत स किल¶ सुशीतां मृदुमारुतं** शीतलां छायामिव प्राप्तः सुखमनुपमं विन्द्यान्निद्रां चोपलभेत†† एवं कष्टतरं नारकमुष्ण‡‡माचक्षते। तथा किल यदि§§ शीतवेदनान्नरकादुत्क्षिप्य नारकः कस्मिंश्चिन्माघमासे निशि प्रवाते महति तुषारराशौ प्रक्षिप्येत महन्महच्छब्दोत्तमकर||| प्रकम्पायासकरे ऽपि तत्र सुखं¶¶ विन्द्यादनुपमां निद्रां चोपलभेत एवं कष्टतरं नारकं शीतदुःखमाचक्षत इति ॥

अशुभतरविक्रियाः। अशुभतराश्च विक्रिया नरकेषु नारकाणां भवन्ति। शुभं करिष्याम इत्यशुभतरमेव विकुर्वते। दुःखाभिभूतमनसश्च*** दुःखप्रतीकारं चिकीर्षवो गरीयस एव ते दुःखहेतूंश्चिकुर्वत इति ॥

---

* K अनन्तगुणप्रकृष्टं। † K अवलिप्त for स्निग्ध। ‡ B यस्य।
§ B यावत्शीतं। || K adds शीतं। ¶ B omits स किल।
** B मारुतं K सुशीतमृदुमारुतं। †† K °लभते B °लभ्यते।
‡‡ K उष्णदुःखं। §§ K places यदि before किल।
||| K. B omit महत्। ¶¶ K सुखमनुपमं विद्यान्निद्रां चोपलभेत।
*** A अभिहत for अभिभूत C दुर्मनस for दुःख।

परस्परोदीरितदुःखाः* ॥ ४ ॥

परस्परोदीरितानि† दुःखानि नरकेषु नारकाणां भवन्ति । क्षेत्रस्वभावजनिताच्चाशुभात्पुद्गलपरिणामादित्यर्थः ॥

तत्र क्षेत्रस्वभावजनितपुद्गलपरिणामः‡ शीतोष्णक्षुत्पिपासादिः । शीतोष्णे व्याख्याते§ क्षुत्पिपासे वक्ष्यामः॥ । अनुपरतशुष्केन्धनोपादानेनेवाग्निना तीक्ष्णेन प्रततेन क्षुदग्निना दन्द्ह्यमानशरीरा अनुसमयमाहरयन्ति ते सर्वं पुद्गलानप्यशु**स्तीव्रया च नित्यानुषक्तया पिपासया शुष्ककण्ठौष्ठतालुजिह्वाः सर्वोदधीनपि पिबेयुर्न च क्षन्निं समाप्नुयुर्वर्धयातामेव चैषां क्षुत्तृष्णे इत्येवमादीनि क्षेत्रप्रत्ययानि ॥

परस्परोदीरितानि च । अपि चोक्तम् । भवप्रत्ययोऽवधिर्नारकदेवानामिति†† । तन्नारकेष्ववधिज्ञानमशुभभवहेतुकं मिथ्यादर्शनयोगाच्च‡‡ विभङ्गज्ञानं भवति । भावदोषोपघातात्तु तेषां दुःखकारणमेव भवति । तेन हि ते सर्वतः तिर्यगूर्ध्वमधश्च दूरत एवाजस्रं दुःखहेतून्पश्यन्ति । यथा च काकोलूकमहिनकुलं चोत्पत्त्यैव बद्धवैरं तथा परस्परं प्रति नारकाः । यथा वापूर्वान्§§ शुनो दृष्ट्वा श्वानो निर्दयं क्रुध्यन्त्यन्योन्यं प्रहरन्ति च तथा तेषां नारकाणामवधिविषयेण दूरत एवान्योन्यमालोक्य क्रोधस्तीव्रानुशयो जायते दुरन्तो भवहेतुकः । ततः प्रागेव दुःखसमुद्घातार्त्ताः क्रोधाग्न्यादीपितमनसो ऽतर्किता इव श्वानः

* H K दुःखाच्च । † K adds च here. ‡ K जनितः पुद्गल० ।
§ II. 3. ‖ cf IX. 9. ¶ A ०नेवा० । ** K न च क्षन्निमाप्नुयुः ।
†† I. 22. ‡‡ K मिथ्यादर्शनोपयोगाच्च । §§ K अन्यान् for अपूर्वान् ।

समुद्हता वैक्रियं भयानकं रूपमास्थाय तत्रैव पृथिवीपरिणामजानि चेत्रानुभावजनितानि चायःशूलशिलामुसलमुद्गरकुन्तोमरासिपट्टिश*शक्तयोघनखड्गयष्टिपरशुभिण्डिमाला†दीन्यायुधान्यादाय करचरणदशनैश्चान्योन्यमभिघ्नन्ति । ततः परस्परा-
5 भिहता विक्षताङ्गा निस्तनन्तो गाढवेदनाः शूनाघातनप्रविष्टा इव महिषसूकरोरभ्राः स्फुरन्तो रुधिरकर्दमे चेष्टन्ते‡ । इत्येवमादीनि परस्परोदीरितानि नरकेषु नारकाणां दुःखानि भवन्तीति ॥

संक्लिष्टासुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः ॥ ५ ॥

10 संक्लिष्टासुरोदीरितदुःखाश्च नारका भवन्ति । तिसृषु भूमिषु प्राक् चतुर्थ्याः । तद्यथा । अम्बाऽम्बरीषश्यामशबलरुद्रोपरुद्रकालमहाकालास्यसिपत्रवन§कुम्भीवालुकावैतरणीखरस्वर¶महाघोषाः पञ्चदश परमाधार्मिका मिथ्यादृष्टयः पूर्वजन्मसु संक्लिष्टकर्माणः पापाभिरतय आसुरीं गतिमनुप्राप्ताः कर्मक्लेशजा एते तान्छीलाच्चारकाणां वेदनाः समुदीरयन्ति चित्राभिरुपपत्तिभिः । तद्यथा । तप्तायोरसपाययनिष्टप्ता**यःस्तम्भालिङ्गनकूटशाल्मल्यारोपणावतारणायोघनाभिघातवासी††क्षुरतक्षणक्षारतप्ततैलाभिषे-

---

* K ऋसिपट्टिस । † K भिडिपाता० ।

‡ A ०पि वेष्टन्ते । K वि चेष्टन्त । § B ऋम्बर । || K घन for घन ।

¶ B खरस्वर । ** A पायिनो निस्तप्त० । †† C वासा ।

चना*यःकुम्भपाकाम्बरीषतर्जनयन्त्रपीडनाय:शूलशलाकाभेदनक्र-
कचपाटनाङ्गारदहनवाहनासूची†श्वादाला‡पकर्षणैः तथा सिंह-
व्याघ्र§द्वीपिश्वगृध्रगालवृककोकमार्जारनकुल‖सर्पवायसगृध्रकाको¶-
लूकश्येनादिखादनैः तथा तप्तवालुकावतरणाभिषेचनप्रवेशनवैत-
रण्यवतारणपरस्परयोधनादिभिरिति ॥ 5

स्यादेतत्किमर्थं त एवं कुर्वन्तीति । अत्रोच्यते । पापकर्मा-
भिरतय इत्युक्तम् । तद्यथा गोवृषभमहिषवराह**मेषकुक्कुट-
वार्तका††लावकान्मुष्टिमल्लांश्च युध्यमानान् परस्परं चाभिघ्नतः
पश्यतां रागद्वेषाभिभूतानामकुशलानुबन्धिपुण्यानां नराणां
परा प्रीतिरुत्पद्यते तथा तेषामसुराणां नारकांस्तथा तानि 10
कारयतामन्योन्यं घ्नतश्च पश्यतां परा प्रीतिरुत्पद्यते । ते हि
दुष्टकन्दर्पास्तथाभूतान् दृष्ट्वाट्टहासं मुञ्चन्ति‡‡ चेलोत्क्षेपान्क्ष्वे-
डिता§§स्फोटितावक्षिते|||तलतालनिपातनांश्च¶¶ कुर्वन्ति महतश्च
सिंहनादान्नदन्ति । तच्च तेषां सत्यपि देवत्वे सत्सु च कामिके-
ष्वन्येषु प्रीतिकारणेषु मायानिदानमिथ्यादर्शनशल्यतीव्रकषा- 15
योपहतस्वभावालोचित***भावदोषस्याप्रत्यवम†††र्षस्याकुशलानुब-

---

* C ०षेषन । † A शूचौ । B वाहनासूचि ।
‡ A श्वाद्वल K साद्वाल । B श्वाङ्गाल ।
§ K adds व्याघ्र । ‖ K adds चाषु । ¶ K कंक for काक ।
** K adds शूषत before मेष and has कुर्कुट for कुक्कुट ।
†† A वार्तक । ‡‡ C मुदन्ति । K अट्टहासान् ।
§§ K स्फेलित । D चेलोत्क्षेपास्फेडित । ||| K वलित । D वलिते ।
¶¶ A निपातांश्च K नियतानांश्च । *** B ०विभाव ।
††† K B प्रत्यवकर्षस्य । D प्रत्यवमर्शस्य ।

न्धिपुण्य*कर्मणो बालतपसश्च भावदोषानुकर्षिणः फलं यत्सत्स्व-
प्यन्येषु प्रीतिहेतुष्वशुभा‡ एव प्रीतिहेतवः समुत्पद्यन्ते ॥

इत्येवमप्रीतिकरं§ निरन्तरं सुतीव्रं दुःखमनुभवतां मरणमेव‖
काङ्क्षतां तेषां न विपत्तिरकाले विद्यते कर्मभिर्धारितायुषाम्।
उक्तं हि। औपपातिकचरमदेहोत्तमपुरुषासङ्ख्येयवर्षायुषो ऽन-
पवर्त्यायुष¶ इति। नैव तत्र शरणं विद्यते नाप्यपक्रमणम्।
ततः कर्मवशादेव दग्धपाटितभिन्न**च्छिन्नचितानि च तेषां सद्य
एव संरोहन्ति शरीराणि†† दण्डराजिरिवाम्भसीति ॥

एवमेतानि त्रिविधानि‡‡ दुःखानि नरकेषु नारकाणां
भवन्तीति ॥

तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरो-
पमा§§ सत्त्वानां परा स्थितिः ॥ ६ ॥

तेषु नरकेषु नारकाणां पराः स्थितयो भवन्ति। तद्यथा।
रत्नप्रभायामेकं सागरोपमम्। एवं त्रिसागरोपमा सप्तसागरो-
पमा दशसागरोपमा सप्तदशसागरोपमा द्वाविंशतिसागरोपमा

---

* B पुण्यस्य। † K omits यत्।
‡ C अशुभभावा एव। K प्रीतिमद्धेतुष्वशुभा। § B अप्रतीकारं।
‖ K सुतिव्रतरदुःखमनुभवतां मरणपि। ¶ II. 53. ** K भग्न for भिन्न।
†† C omits. ‡‡ C त्रिविधानि। §§ K सागरोपमाः।

त्रयस्त्रिंशत्सागरोपमा*। जघन्या तु पुरस्ताद्वक्ष्यते। नारकाणां च द्वितीयादिषु। दशवर्षसहस्राणि प्रथमायामिति[1]॥ [IV.43.44]

तत्रास्रवैर्यथोक्तैर्नारकसंवर्तनीयैः कर्मभिरसंज्ञिनः प्रथमायामुत्पद्यन्ते। सरीसृपा द्वयोरादितः प्रथमद्वितीययोः। एवं पक्षिणस्तिसृषु। सिंहास्तसृषु। उरगाः पञ्चसु। स्त्रियः षट्सु। मत्स्यमनुष्याः सप्तस्विति। न तु देवा नारका वा नरकेषूपपत्तिं प्राप्नुवन्ति। न हि तेषां वक्ष्यमाणपरिग्रहादयो‡ नरकगतिनिर्वर्तका हेतवः सन्ति। नाप्युदर्त्य नारका देवेषूत्पद्यन्ते§। न ह्येषां सरागसंयमादयो‖ देवगतिनिर्वर्तका हेतवः सन्ति। उद्वर्तितास्तु तिर्यग्योनौ मनुष्येषु¶ वोत्पद्यन्ते। मानुषत्वं** प्राप्य केचित्तीर्थकरत्वमपि प्राप्नुवन्ति। आदितस्तिसृभ्यः निर्वाणं चतसृभ्यः संयमं पञ्चभ्यः संयमासंयमं षड्भ्यः सम्यग्दर्शनं सप्तभ्यो ऽपीति॥

द्वीपसमुद्रपर्वत††हृदतडाग‡‡सरांसि[2] ग्रामनगरपत्तनादयो विनिवेशा बादरो वनस्पतिकायो§§ वृक्षतृणगुल्मादिः द्वीन्द्रियादयश्च

---

* K adds इति। † S and K तत्राश्रवेषु। ‡ VI. 16.
§ B नाप्युद्वर्तिता नारकदेवेषूपपद्यन्ते। ‖ VI. 20. ¶ K तिर्यग्योनिमनुष्येषु।
** K adds च। †† A adds. नदी। ‡‡ K तटाक। §§ K कायश्च०।

---

१ S. अनुक्ता तु प्रथमप्रतरादिभेदेन। प्रथमप्रतिप्रतरस्थितिपरिज्ञानाय विनेयार्थिना नरकेन्द्रिका समालोकनीया॥

२ अधस्तनीषु षट्स्वपि भूमिषु रत्नप्रभावत्किं द्वीपादिविनिवेशाः सन्ति न सन्तीत्याह। S.

द्यस्तिर्यग्योनिजा मनुष्या देवाश्चतुर्निकाया अपि न सन्ति । अन्यत्र समुद्घातोपपातविक्रियासाङ्गतिक[1]नरकपालेभ्यः । उपपाततस्तु देवा रत्नप्रभायामेव सन्ति† नान्यासु । गतिस्तृतीयां यावत् ॥

5 यच्च वायव आपो धारयन्ति न च विश्वग्गच्छन्त्यापश्च पृथिवीं धारयन्ति न च प्रस्यन्दन्ते पृथिव्यश्चापसु विलयं न गच्छन्ति तत्तथानादिपारिणामिकस्य नित्यसन्ततेर्लोकविनिवेशस्य लोकस्थितिरेव हेतुर्भवति ॥

अत्राह । उक्तं भवता लोकाकाशे ऽवगाहः‡ । तदनन्तरं 10 ऊर्ध्वं गच्छत्या लोकान्तादिति§ । तच्च लोकः कः कतिविधो वा किंसंस्थितो वेति । अत्रोच्यते ॥

पञ्चास्तिकायसमुदायो लोकः । ते चास्तिकायाः स्वतत्त्वतो विधानतो लक्षणतश्चोक्ता वक्ष्यन्ते च । स‖ लोकः क्षेत्रविभागेन त्रिविधो ऽधस्तिर्यगूर्ध्वं¶ चेति । धर्माधर्मास्तिकायौ लोकव्यवस्था- 15 हेतू । तयोरवगाह**विशेषाल्लोकानुभावनियमात्†† सुप्रतिष्ठक‡‡

---

* K विक्रिय । † K omits this whole ‡ V. 12. § X. 5.
‖ K adds च । ¶ K ऊर्ध्वमेति । ** K अवगाहन ।
†† B नितनात् । ‡‡ B सुप्रतिष्ठकं ।

---

१ S. साङ्गतिकाः पूर्वजन्ममित्रादयः । नरकपालाः परमाधार्मिकाः । एते सर्वे ऽपि द्वितीयादिषु भूमिषु कदाचित्केचित्संभवेयुरपीति ॥

वज्राकृतिर्लोकः[१]। अधोलोको गोकन्धराधरार्धाकृतिः। उक्तं ह्येतत्। भूमयः सप्ताधो ऽधः पृथुतराश्छत्रातिच्छत्रसंस्थिता इति [III. १] ता यथोक्ताः। तिर्यग्लोको झल्लर्याकृतिः। ऊर्ध्वलोको मृदङ्गाकृतिरिति। तत्र तिर्यग्लोकप्रसिद्ध्यर्थमिदमाकृतिमात्र[२]मुच्यते ॥

जम्बूद्वीपलवणादयः शुभनामानो द्वीपसमुद्राः ॥ ७ ॥

जम्बूद्वीपादयो द्वीपा लवणादयश्च समुद्राः शुभनामान इति। यावन्ति लोके शुभानि नामानि तन्नामान इत्यर्थः। शुभान्येव वा नामान्येषामिति ते शुभनामानः। द्वीपादनन्तरः समुद्रः समुद्रादनन्तरो द्वीपो* यथासङ्ख्यम्। तद्यथा। जम्बूद्वीपो द्वीपो लवणोदः समुद्रः धातकीखण्डो द्वीपः कालोदः समुद्रः पुष्करवरो द्वीपः पुष्करोदः समुद्रः वरुणवरो द्वीपो वरुणोदः समुद्रः क्षीरवरो द्वीपः क्षीरोदः† समुद्रो घृतवरो द्वीपो घृतोदः समुद्रः इक्षुवरो द्वीप इक्षुवरोदः समुद्रः नन्दीश्वरो‡ द्वीपो नन्दीश्वर-

* K adds इति। † K क्षीरवरोदः। ‡ K नन्दीश्वरवरो D नन्दश्वरोदः।

१ S. लोकसंस्थानस्य सन्निवेशो ऽमुनैव सूरिणा प्रकरणान्तरे ऽभिहितस्तद्यथा Here quotes verses 210 and 211 of प्रशमरति।

२ S. मात्रशब्दः संक्षेपाभिधानार्थः केनचिल्लेशोद्देशेन न पुनर्विस्तरेणेति। विस्तरो द्वीपसागरप्रज्ञप्त्यादिभ्यो ऽवगन्तव्य इत्यावेदयति ॥

वरोदः समुद्रः अरुणवरो द्वीपो ऽरुणवरोदः समुद्र इत्येवमसङ्ख्येया* द्वीपसमुद्राः स्वयम्भूरमणपर्यन्ता वेदितव्या इति ॥

द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ८ ॥

सर्वे चेते द्वीपसमुद्रा यथाक्रममादितो द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः प्रत्येतव्याः। तद्यथा। योजनशतसहस्रविष्कम्भो जम्बूद्वीपस्य वक्ष्यते‡। तद्द्विगुणो लवणजलसमुद्रस्य। लवणजलसमुद्रविष्कम्भाद्द्विगुणो धातकीखण्डद्वीपस्य। इत्येवमा स्वयम्भूरमणसमुद्रादिति ॥

पूर्वपूर्वपरिक्षेपिणः। सर्वे पूर्वपूर्वपरिक्षेपिणः प्रत्येतव्याः। जम्बूद्वीपो लवणसमुद्रेण§ परिक्षिप्तः। लवणजलसमुद्रो धातकीखण्डेन परिक्षिप्तः। धातकीखण्डद्वीपः कालोदसमुद्रेण परिक्षिप्तः। कालोदसमुद्रः पुष्करवरद्वीपार्धेन परिक्षिप्तः। पुष्करद्वीपार्धं मानुषोत्तरेण पर्वतेन परिक्षिप्तम्। पुष्करवरद्वीपः पुष्करवरोदेन समुद्रेण परिक्षिप्तः। एवमा स्वयम्भूरमणात्समुद्रादिति ॥

वलयाकृतयः। सर्वे च ते वलयाकृतयः सह मानुषोत्तरेणेति ॥

तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः ॥ ९ ॥

---

* K असङ्ख्याता।
† K स्वयम्भु here and elsewhere.
‡ III. 9.
§ K लवणजलसमुद्रेण।

तेषां द्वीपसमुद्राणां मध्ये तन्मध्ये॥ मेरुनाभिः। मेरुरस्य नाभ्यामिति मेरुर्वास्य नाभिरिति मेरुनाभिः। मेरुरस्य मध्य इत्यर्थः॥ सर्वद्वीपसमुद्राभ्यन्तरो वृत्तः* कुलालचक्राकृतिर्योजनशतसहस्रविष्कम्भो जम्बूद्वीपः। वृत्तग्रहणं नियमार्थम्। लवणादयो वलयवृत्ता जम्बूद्वीपस्तु प्रतरवृत्त इति। यथा गम्येत वलयाकृतिभिश्चतुरस्रत्र्यस्रयोरपि परिक्षेपो विद्यते तथा च मा भूदिति॥

मेरुरपि† काञ्चनस्थालनाभिरिव वृत्तो योजनसहस्रमधो धरणितलमवगाढो नवनवत्युच्छ्रितो दशाधो विस्तृतः सहस्रमुपरीति। त्रिकाण्डस्त्रिलोकप्रविभक्तमूर्त्तिश्चतुर्भिर्वनैर्भद्रशाल‡नन्दन सौमनस§पाण्डकैः परिवृत्तः। तत्र शुद्धपृथिव्युपलवज्रगर्करावकुलं योजनसहस्रमेकं प्रथमं काण्डम्। द्वितीयं त्रिषष्टिसहस्राणि रजतजातरूपाङ्कस्फटिकबकुलम्। तृतीयं षट्त्रिंशत्सहस्राणि जम्बूनद‖बकुलम्। वैडूर्यबकुला¶ चास्य चूलिका चत्वारिंशद्योजनान्युच्छ्रायेण मूले द्वादश विष्कम्भेण मध्ये अष्टावुपरि चत्वारीति। मूले वलयपरिक्षेपि भद्रशालवनम्। भद्रशालवनात्पञ्च योजनशतान्यारुह्य तावत्प्रतिक्रान्तिविस्तृतं नन्दनम्। ततो ऽर्धत्रिषष्टिसहस्राण्यारुह्य पञ्चयोजनशतप्रतिक्रान्तिविस्तृतमेव** सौमनसम्। ततो ऽपि षट्त्रिंशत्सहस्राण्यारुह्य चतुर्नवति-

---

* K निवृत्तो। † K adds च। ‡ K भद्रसाल।
§ B सोमनस। ‖ K. S. B. जाम्बू०। ¶ B वैदूर्यपुन्नला।
** K विस्तृतिम्।

चतुःशतप्रतिक्रान्तिविस्तृतं पाण्डकवनमिति । नन्दनसौमनसाभ्यामेकादशैकादशसहस्राण्यारुह्य प्रदेशपरिहाणिर्विष्कम्भस्येति*[१] ॥

तच्च भरतहैमवतहरिविदेहरम्यक†हैरण्यवतैरावतवर्षाः क्षेत्राणि ॥ १० ॥

तच्च जम्बूद्वीपे भरतं हैमवतं हरयो विदेहा रम्यकं हैरण्यवतमैरावतमिति सप्त वंशाः क्षेत्राणि भवन्ति । भरतस्योत्तरतो हैमवतं हैमवतस्योत्तरतो हरय इत्येवं शेषाः । वंशा वर्षा

---

* K omits इति । † P. रम्यक् ।

---

१ S. अयं च मेरुगिरिर्न सर्वत्र समप्रमाणप्रवृद्धः किन्तु प्रदेशपरिहाण्या परिहीयमानः प्रवृद्ध इति तद्दर्शयति × × × × × × नन्दनादूर्ध्वं सौमनसाद्यधः किल मध्ये एकादशैकादशयोजनसहस्राण्यारुह्य योजनसहस्रं परिहीयते विष्कम्भस्येति । ऊर्ध्वं सौमनसान्नन्दनवनाद्यधो न सूत्रिता परिहाणिरुक्ता । × × × एषा च परिहाणिराचार्योक्ता न मनागपि गणितप्रत्यया संगच्छते । यतः सौमनसवने ऽन्तर्विष्कम्भः सहस्रत्रयं शतद्वयं च द्विसप्तत्यधिकमष्टौ चैकादशभागाः बहिर्विष्कम्भः पुनः सहस्रचतुष्टयं शतद्वयं च द्विसप्तत्यधिकमष्टौ चैकादशभागा योजनस्य । तच्चाचार्योक्तपरिहाण्या नैको ऽपि विष्कम्भ आगच्छति न चैतावत्या वागमे ऽधीतत्वात् प्रवृद्धग्राहिकयेति । गणितशास्त्रविदो हि परिहाणिमन्यथा वर्णयन्त्यार्षानुसारिणः । मेरुर्योजनानामूर्ध्वमेका लक्षा । तच्चाधो भूमावदृश्यं योजनसहस्रमपचयरहितम् ।

दक्षा इति चैषां गुणतः पर्यायनामानि भवन्ति। सर्वेषां चैषां व्यवहारनयापेक्षादा*दित्यकृताद्दिग्नियमादुत्तरतो मेरुर्भवति। लोकमध्यावस्थितं[१] चाष्टप्रदेशं रुचकं दिग्नियमहेतुं प्रतीत्य यथासम्भवं भवतीति॥

तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषध-नीलरुक्मिशिखरिणो वर्षधरपर्वताः॥ ११॥

तेषां वर्षाणां विभक्तारो हिमवान् महाहिमवान् निषधो नीलो रुक्मी शिखरी इत्येते षड्वर्षधराः पर्वताः‡। भरतस्य हैमवतस्य च विभक्ता हिमवान् हैमवतस्य हरिवर्षस्य च विभक्ता महाहिमवानित्येवं शेषाः॥

तच्च पञ्च योजनशतानि षड्विंशानि षट् चैकोनविंशतिभागा भरतविष्कम्भः[२]। स द्विर्द्विर्हिमवद्धैमवतादीनामा विदेहेभ्यः। परतो विदेहेभ्यो ऽर्धार्धहीनाः॥ पञ्चविंशतियोजनान्यवगाढो योजनशतोच्छ्रायो हिमवान्। तद्विर्महाहिमवान्। तद्विर्निषध इति॥

भरतवर्षस्य योजनानां चतुर्दशसहस्राणि चत्वारि शतान्येक-

---

* K. S. अपेक्षयादित्य०। † C तु for च। ‡ K वर्षधरपर्वताः।

---

१ अथ नैश्चयिकी दिक्कथं प्रतिपत्तव्येत्यत आह। S.।

२ S. अपरे त्विदमेव भाष्यवाक्यं सूत्रीकृत्याधीयन्ते।

सप्ततानि षट् च भागा* विशेषतो† ज्या। द्वयुर्यथोक्तो विष्कम्भः। धनुःकाष्ठं चतुर्दशसहस्राणि शतानि पञ्चाष्टाविंशान्येकादश च भागाः साधिकाः‡॥

भरतक्षेत्रमध्ये पूर्वापरायत उभयतः समुद्रमवगाढो वैताढ्यपर्वतः§ षड् योजनानि सक्रोशानि धरणिमवगाढः पञ्चाशद्विस्तरतः॥ पञ्चविंशत्युच्छ्रितः॥

विदेहेषु निषधस्योत्तरतो मन्दरस्य दक्षिणतः काञ्चनपर्वतशतेन चित्रकूटेन विचित्रकूटेन चोपशोभिता देवकुरवो विष्कम्भेनैकादश योजनसहस्राण्यष्टौ च शतानि द्विचत्वारिंशानि द्वौ च भागौ। एवमेवोत्तरेणोत्तराः कुरवश्चित्रकूटविचित्रकूटहीना द्वाभ्यां च काञ्चनाभ्यामेव यमक¶पर्वताभ्यां विराजिताः॥

विदेहा मन्दरदेवकुरूत्तरकुरुभिर्विभक्ताः क्षेत्रान्तरवद्व्यवन्ति। पूर्वे चापरे च। पूर्वेषु षोडश चक्रवर्तिविजया नदीपर्वतविभक्ताः परस्परागमाः** अपरे ऽप्येवंलक्षणाः षोडशैव॥

तुल्यायामविष्कम्भावगाहोच्छ्रायौ दक्षिणोत्तरौ वैताढ्यौ तथा हिमवच्छिखरिणौ महाहिमवद्रुक्मिणौ निषधनीलौ चेति॥

क्षुद्रमन्दरास्तु चत्वारो ऽपि धातकीखण्डक††पुष्करार्धका महामन्दरात्पञ्चदशभिर्योजनसहस्रैर्हीनोच्छ्रायाः। षड्भिर्योजन-

---

* C षड्भागा। † K विशेषात् D विशेषोना B षट्चत्वारिंशद्विशेषात्।
‡ K omits साधिकाः। § C वैताढ्य K विजयार्धे। ‖ K विस्तृतः।
¶ B जभक०। ** परस्परस्यागमाः। †† C omits क।

शतैर्धरणितले हीनविष्कम्भाः । तेषां प्रथमं काण्डं महामन्दरतुल्यम् । द्वितीयं सप्तभिर्हीनम् । तृतीयमष्टाभिः । भद्रशालनन्दनवने महामन्दरवत् । ततो अर्धषट्पञ्चाशद्योजनसहस्राणि सौमनसं पञ्चशतं विस्तृतम्* । ततो ऽष्टाविंशतिं†सहस्राणि चतुर्नवतिचतुःशतविस्तृतमेव पाण्डकं भवति । उपरि चाधश्च विष्कम्भो ऽवगाहश्च तुल्यो महामन्दरेण । चूलिका चेति ॥

विष्कम्भकृतेर्दशगुणाया मूलं वृत्तपरिक्षेपः । स विष्कम्भपादाभ्यस्तो गणितम् । दशावगाहोनावगाहाभ्यस्तस्य विष्कम्भस्य चतुर्गुणस्य मूलं ज्या । ज्याविष्कम्भयोर्वर्गविशेषमूलं विष्कम्भाच्छोध्यं शेषार्धमिषुः । दशवर्गस्य षड्गुणस्य ज्यावर्गयुतस्य कृतस्‡ मूलं धनुःकाष्ठम् । ज्यावर्गचतुर्भागयुक्तेषुवर्गमिषुविभक्तं तत्प्रकृतिवृत्तविष्कम्भः । उदग्धनुःकाष्ठाद्दक्षिणं शोध्यं शेषार्धं बाहुरिति ॥

अनेन करणाभ्युपायेन सर्वक्षेत्राणां§ सर्वपर्वतानामायामविष्कम्भज्येषुधनुःकाष्ठपरिमाणानि ज्ञातव्यानि[१] ॥

द्विर्धातकीखण्डे ॥ १२ ॥

---

* K पञ्चशतविस्तृतमेव । † K अष्टाविंशतिः । ‡ A. C omit. § K कृत ।

॥ B क्षेत्रवैदाद्यादिपर्वतानां A. C क्षेत्राणां वैतद्यादिनां K वैताढ्यादिपर्वतानां ।

---

१ H. अपरे पुनर्विद्वांसो ऽतिबहूनि स्वयं विरचय्यास्मिन्प्रस्तावे सूत्राण्यधीयते विस्तरदर्शनाभिप्रायेण तत्त्वयुक्तमयं सङ्क्षेपः सूरिणा संक्षेपः कृत इति अतो ऽत्र विस्तराभिधानमप्राचीनमाचक्षते प्रवचननिपुणाः अथ

ये एते मन्दरवंशवर्षधराः* जम्बूद्वीपे ऽभिहिता एते द्विगुणा धातकीखण्डे द्वाभ्यामिष्वाकारपर्वताभ्यां दक्षिणोत्तरायताभ्यां विभक्ताः। एभिरेव नामभिर्जम्बूद्वीपकसममज्ञाः पूर्वार्धे चापरार्धे च चक्रारकसंस्थिता† निषधसमोच्छ्राया: कालोदलवणजलस्पर्शिनो वंशधराः सेष्वाकाराः। अरविवरसंस्थिता वंशा इति॥

पुष्करार्धे च ॥ १३ ॥

यश्च धातकीखण्डे मन्दरादीनां सेष्वाकारपर्वतानां‡ सङ्ख्याविषयनियमः§ स एव पुष्करार्धे वेदितव्यः ॥

ततः परं मानुषोत्तरो नाम॥ पर्वतो मानुषलोकपरिक्षेपी सुनगरप्राकारवृत्तः पुष्करवरद्वीपार्धविनिविष्टः¶ काञ्चनमयः** सप्तदशैकविंशति††योजनशतान्युच्छ्रितश्चत्वारि त्रिंशानि क्रोशं चाधो धरणीतलमवगाढो योजनसहस्रं द्वाविंश‡‡मधस्ताद्विस्तृतः सप्तशतानि त्रयोविंशानि मध्ये चत्वारि चतुर्विंशान्युपरीति ॥

---

* K मन्दरवंशाः। † K चक्रारसंस्थिता। ‡ K सेष्वाकारमन्दरादीनां पर्वतानां।
§ K विशेषनियमः। ॥ K नामा। ¶ C पं=750.
** D काञ्चनः। †† K विंशानि। ‡‡ C द्वाविंशतिम्।

विस्तरतो विवक्षितस्ततो यत्र्यलक्षापरिभाषिताया जम्बूद्वीपदेशनायाः षट्प्रज्ञैस्त्रिर्विस्तृणद्भिरपि कियदत्र विस्तृतं स्यात् विस्तारार्थिनो वा बऊगुणाः सिद्धान्त एव तत्कृतसूत्रेभ्य इत्यत उपेक्षणीयस्तदभिप्राय इति ॥

Contrast Doctor Bhandarkar's Report in the search for Sanskrit Mss for the year 1883-84 P. 408 and 409.

न कदाचिदस्मात्परतो जन्मतः संहरणतो वा चारणविद्याधरर्द्धिप्राप्ता अपि मनुष्या भूतपूर्वा भवन्ति भविष्यन्ति च । अन्यच्[1] समुद्घातोपपाताभ्याम् । अत एव च मानुषोत्तर इत्युच्यते[2] ॥

तदेवमर्वाङ् मानुषोत्तरस्यार्धतृतीया द्वीपाः समुद्रद्वयं पञ्चमन्दराः पञ्चत्रिंशत्त्वेचाणि त्रिंशद्वर्षधरपर्वताः पञ्च देवकुरवः पञ्चोत्तराः कुरवः शतं षष्ट्यधिकं चक्रवर्तिविजयानां द्वे शते पञ्चपञ्चाशदधिके* जनपदानामन्तरद्वीपाः षट्पञ्चाशदिति ॥

अत्राह । उक्तं भवता मानुषस्य स्वभावमार्दवार्जवत्वं चेति तत्र के मनुष्याः क्व चेति । अत्रोच्यते

प्राग्मानुषोत्तरान्मनुष्याः ॥ १४ ॥

---

* K पञ्चपञ्चाशे इति प्रत्यन्तरेजन० । [VI.18]

---

१ S. मारणान्तिकसमुद्घातेन समुपहृतः कश्चिदर्धतृतीयद्वीपान्तरवर्ती बहिर्वर्तिद्वीपसमुद्रेषूत्पत्स्यते तेन चोत्पत्तिप्रदेशे प्रच्छिन्नमात्मप्रदेशजालमिलिकागतिना पश्चात् म्रियते तत्र व्यवस्थित इति ॥ तथोपपातमङ्गीकृत्य जन्माभिसंबध्यते । बहिर्द्वीपसमुद्रवर्तिना असुमता मनुष्यायुर्निबद्धमर्धतृतीयद्वीपाभ्यन्तरमेवोत्पत्स्यते वक्रगत्या तस्य तन्मनुष्यायुर्वक्रकाले विपच्यते तदैव चासौ मनुष्यो जातस्तदुदयवर्तित्वात् ॥

२ S. ये त्वेतद्भाष्यं गमनप्रतिषेधद्वारेण विद्याधरर्द्धिप्राप्तानामाचक्षते तेषामागमविरोधः । सर्वेषां हि चारणादीनामागमे गमनाभ्यनुज्ञानात् । बहिर्जन्ममरणे न संभाव्येते ॥

प्राग्मानुषोत्तरात्पर्वतात्पञ्चत्रिंशत्सु क्षेत्रेषु सान्तरद्वीपेषु जन्मतो मनुष्या भवन्ति। संहरणविद्यर्द्धियोगात्तु* सर्वेष्वर्धतृतीयेषु द्वीपेषु समुद्रद्वये च समन्दरगिरेरिति॥

भारतका हैमवतका इत्येवमादयः क्षेत्रविभागेन। जम्बूद्वीपका† लवणका इत्येवमादयो द्वीपसमुद्रविभागेनेति॥

आर्या म्लिशश्च‡॥ १५॥

द्विविधा मनुष्या भवन्ति। आर्या म्लिशश्च॥

तत्रार्याः षड्विधाः। क्षेत्रार्याः जात्यार्याः कुलार्याः कर्मार्याः शिल्पार्या भाषार्या इति। तत्र क्षेत्रार्याः पञ्चदशसु कर्मभूमिषु जाताः तद्यथा भरतेष्वर्धषड्विंशतिषु जनपदेषु जाताः शेषेषु§ च चक्रवर्तिविजयेषु। जात्यार्या इक्ष्वाकवो विदेहा हरयो ऽम्बष्ठाः ज्ञाताः कुरवो वुंवुनाला‖ उग्रा भोगा॥ राजन्या इत्येवमादयः। कुलार्याः कुलकराश्चक्रवर्तिनो बलदेवा वासुदेवा ये चान्ये आतृतीयादा पञ्चमादा सप्तमादा कुलकरेभ्यो वा विशुद्धान्वयप्रकृतयः। कर्मार्या यजनयाजनाध्ययनाध्यापनप्रयोग¶क्षषिलिपिवाणिज्ययोनिपोषणवृत्तयः। शिल्पार्यास्तन्तुवाय**कुलालनापितत्नवाय-

---

* K. B omit तु। † K जाम्बूद्वीपका लावणकाः। ‡ B म्लेच्छाश्च।
§ K वुंवुणाला। ‖ K भोजाः। ¶ B प्रयोगे K वनप्रयोग। ** B तन्तुवायु।

---

१ D. Colophon भरतोत्तरार्धजा मनुष्या अपि सुगुरूपदेशादिसामग्रीसद्भावे योग्यत्वेन चारित्राद्यवाप्य सिध्यन्तीति समयः॥

देवटाद्यो* ऽल्पसावद्या आगर्हिता† जीवाः । भाषार्या नाम ये शिष्टभाषानियतवर्ण लोकरूढस्पष्टशब्दं पञ्चविधानामप्यार्याणां संव्यवहारं भाषन्ते ॥

अतो विपरीता‡ म्लिशः । तद्यथा । हिमवतश्च§तसृषु विदिक्षु चीणि योजनशतानि लवणसमुद्रमवगाह्य चतसृणां मनुष्यविजातीनां चत्वारो ऽन्तरद्वीपा॥ भवन्ति त्रियोजनशत-विष्कम्भायामाः । तद्यथा । एकोरुकाणामाभाषकाणां¶ लाङ्गू-लिकानां** वैषाणिकाना††मिति ॥ चत्वारि योजनशतान्यवगाह्य चतुर्योजनशतायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । हय-कर्णानां गजकर्णानां गोकर्णानां शष्कुली‡‡कर्णानामिति ॥ पञ्च शतान्यवगाह्य पञ्चयोजनशतायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । गजमुखानां§§ व्याघ्रमुखानामादर्शमुखानां गोमुखाना-मिति ॥ षड् योजनशतान्यवगाह्य तावदायामविष्कम्भा एवान्तर-द्वीपाः । तद्यथा । अश्वमुखानां हस्तिमुखानां सिंहमुखानां व्याघ्र-मुखानामिति ॥ सप्त योजनशतान्यवगाह्य तावदायामविष्कम्भा

---

* A. C दवदाद्यो K तुल्यवायेत्येवमादयो । † K अगर्हिता । ‡ B वैपरीता ।

§ Perhaps S adds हिमवतः प्राक्पश्चाच्च चत० । ‖ K अनन्तरद्वीपा ।

¶ A अभाषिकाणां K आभाषिका D अभाषिकाणां ।

** B लाङ्गूलिनां लाङ्गुलीनां । †† B विषाणिनां ।

‡‡ S. शष्कलीक B शष्कुलि ।

§§ A. S आदर्शनमेषहयगजमुखनामानः ।

एवान्तरद्वीपाः । तद्यथा । अश्वकर्णसिंहकर्णहस्तिकर्ण*कर्ण-प्रावरणनामानः ॥ अष्टौ योजनशतान्यवगाह्याष्टयोजनशतायामविष्कम्भा एवान्तरद्वीपाः । तद्यथा । उल्का†मुखविद्युज्जिह्व‡-मेष§मुखविद्युद्दन्तनामानः ॥ नवयोजनशतान्यवगाह्य नवयोजनशतायामविष्कम्भा एवान्तरद्वीपा भवन्ति । तद्यथा । घनदन्त-गूढदन्तविशिष्ट‖दन्तशुद्धदन्तनामानः ॥ एकोरुकाणामेकोरुकद्वीपः । एवं शेषाणामपि स्वनामभिस्तुल्यनामानो वेदितव्याः ॥ शिखरिणोऽप्येवमेवेत्येवं षट्पञ्चाशदिति[1] ॥

भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः ॥ १६ ॥

मनुष्यक्षेत्रे भरतैरावतविदेहाः पञ्चदश कर्मभूमयो भवन्ति । अन्यत्र देवकुरूत्तरकुरुभ्यः । संसारदुर्गान्तगमकस्य सम्यग्दर्शन-ज्ञानचारित्रात्मकस्य मोक्षमार्गस्य ज्ञातारः कर्तार उपदेष्टारश्च भगवन्तः परमर्षयस्तीर्थकरा अत्रोत्पद्यन्ते । अत्रैव जाताः

---

* C adds हस्ति। † K उलूका, C उल्का। ‡ D विद्युज्जिह्व।
§ B देष। ‖ C श्रेष्ठ।

---

१ S. H —add at the end of the Sûtra:—

एतच्चान्तरद्वीपकभाष्यं प्रायो विनाग्रितं सर्वत्र कैरपि दुर्विदग्धैर्येन षण्णवतिरन्तरद्वीपका भाष्येषु दृश्यन्ते। अनार्षं चैतदध्यवसीयते जीवाभिगमादिषु षट्पञ्चाशदन्तरद्वीपकाध्ययनात्। नापि वाचकमुख्यः सूत्रोल्लङ्घनेनाभिदध्यसंभाव्यमानत्वात्। तस्मात्सिद्धान्तिकपाग्रैर्विनाग्रितमिदमिति ॥

सिध्यन्ति नान्यत्र। अतो निर्वाणाय कर्मणः सिद्धिभूमयः कर्मभूमय इति। शेषास्तु विंशतिर्विंशाः सान्तरद्वीपा अकर्मभूमयो भवन्ति। देवकुरूत्तरकुरवस्तु कर्मभूम्यभ्यन्तरा अप्यकर्मभूमय इति॥

नृस्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते॥ १७॥

नरो नरा मनुष्या मानुषा इत्यनर्थान्तरम्। मनुष्याणां परा स्थितिस्त्रीणि पल्योपमान्यपरान्तर्मुहूर्तेति॥

तिर्यग्योनीनां च*॥ १८॥

तिर्यग्योनिजानां च परापरे स्थिती त्रिपल्योपमान्तर्मुहूर्ते भवतो यथासङ्ख्यमेव। पृथक्करणं† यथासङ्ख्यदोषविनिवृत्त्यर्थम्। इतरथा इदमेकमेव‡ सूत्रमभविष्यदुभयत्र चोभे यथासङ्ख्यं§ स्यातामिति॥॥

द्विविधा चैषां मनुष्यतिर्यग्योनिजानां स्थितिः। भवस्थितिः कायस्थितिश्च। मनुष्याणां यथोक्ते त्रिपल्योपमान्तर्मुहूर्ते परापरे भवस्थिती। कायस्थितिस्तु परा सप्ताष्टौ वा भवग्रहणानि॥ तिर्यग्योनिजानां च यथोक्ते समासतः परापरे भवस्थिती। व्यासतस्तु क्षुद्रपृथिवीकायस्य परा द्वादश वर्षसहस्राणि। खर-

---

* B तिर्यग्योनिजानां च। Not marked as a separate sûtra either by A or C, and B and K do not number sûtras.

† K पृथग्योगकरणं। ‡ K यद्येकमेव।

§ K यथा for यथासङ्ख्यं। ॥ C omits from इतरथा to उभयत्र।

पृथिवीकायस्य द्वाविंशतिः । अप्कायस्य सप्त । वायुकायस्य त्रीणि । तेजःकायस्य त्रीणि रात्रिंदिनानि* । वनस्पतिकायस्य दश वर्षसहस्राणि । एषां कायस्थितिरसङ्ख्येया अवसर्पिण्युत्सर्पिण्यो वनस्पतिकायस्यानन्ताः । द्वीन्द्रियाणां भवस्थितिर्द्वादश वर्षाणि । त्रीन्द्रियाणामेकोनपञ्चाशद्रात्रिंदिनानि । चतुरिन्द्रियाणां षण्मासाः । एषां कायस्थितिः सङ्ख्येयानि वर्षसहस्राणि । पञ्चेन्द्रियतिर्यग्योनिजाः पञ्चविधाः । तद्यथा । मत्स्या उरगाः परिसर्पाः पक्षिणश्चतुष्पदा इति । तत्र मत्स्यानामुरगाणां भुजगानां च पूर्वकोट्येव पक्षिणां पल्योपमासङ्ख्येयभागश्चतुष्पदानां त्रीणि पल्योपमानि गर्भजानां स्थितिः† । तत्र‡ मत्स्यानां भवस्थितिः पूर्वकोटिस्त्रिपञ्चाशदुरगाणां द्विचत्वारिंशद्§ भुजगानां द्विसप्ततिः पक्षिणां स्थलचराणां चतुरशीतिर्वर्षसहस्राणि संमूर्छिमानां भवस्थितिः । एषां कायस्थितिः सप्ताष्टौ भवग्रहणानि । सर्वेषां मनुष्यतिर्यग्योनिजानां कायस्थितिरप्यपरान्तर्मुहूर्तैवेति ॥

इति तत्त्वार्थाधिगमे लोकप्रज्ञप्तिर्नामा
तृतीयोऽध्यायः समाप्तः ॥

---

* K रात्रिंदिवानि । † K भवस्थिति । ‡ K तथा for तत्र ।

§ B. K, interchange. उरगाणां द्विचत्वारिंशद्वर्षसहस्राणि त्रिपञ्चाशत्परिसर्पाणां ।

अथ चतुर्थोऽध्यायः ।

अत्राह । उक्तं भवता भवप्रत्ययोऽवधिर्नारकदेवानामिति [I. 22] । तथौदयिकेषु भावेषु देवगतिरिति [II. 6] । केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य [VI. 13] । सरागसंयमादयो दैवस्य [VI. 20] । नारकसम्मूर्छिनो नपुंसकानि । न देवाः* [II. 50 & 51] । तत्र के देवाः कतिविधा वेति । अत्रोच्यते ॥

देवाश्चतुर्निकायाः ॥ १ ॥

देवाश्चतुर्निकाया भवन्ति । तान्परस्ताद्वक्ष्यामः ॥

तृतीयः पीतलेश्यः ॥ २ ॥

तेषां चतुर्णां देवनिकायानां तृतीयो देवनिकायः पीतलेश्य एव भवति । कश्चासौ । ज्योतिष्क इति ॥

दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥ ३ ॥

ते च देवनिकाया यथासङ्ख्यमेवंविकल्पा भवन्ति । तद्यथा । दशविकल्पा भवनवासिनोऽसुरादयो वक्ष्यन्ते । अष्टविकल्पा व्यन्तराः किन्नरादयः । पञ्चविकल्पा ज्योतिष्काः सूर्यादयः । द्वादशविकल्पा वैमानिकाः कल्पोपपन्नपर्यन्ताः सौधर्मादिष्विति ॥

* D न देवा इति ।

इन्द्रसामानिकत्रायस्त्रिंशपारिषद्या*त्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः ॥ ४ ॥

एकैकशश्चैतेषु देवनिकायेषु देवा दशविधा भवन्ति । तद्यथा । इन्द्राः सामानिकाः त्रायस्त्रिंशाः पारिषद्याः आत्मरक्षाः† लोकपालाः अनीकानि अनीकाधिपतयः प्रकीर्णकाः आभियोग्याः किल्बिषिकाश्चेति । तत्रेन्द्रा‡ भवनवासिव्यन्तरज्योतिष्कविमानाधिपतयः । इन्द्रसमानाः सामानिका अमात्यपितृगुरूपाध्यायमहत्तरवत् केवलमिन्द्रत्वहीनाः । त्रायस्त्रिंशा मन्त्रिपुरोहितस्थानीयाः । पारिषद्या वयस्यस्थानीयाः । आत्मरक्षाः शिरोरक्षस्थानीयाः । लोकपाला आरक्षिकार्थचरस्थानीयाः§[१] । अनीकाधिपतयो दण्डनायकस्थानीयाः‖[२] । अनीकान्यनीकस्थानीयान्येव । प्रकीर्णकाः पौरजनपदस्थानीयाः । आभियोग्या दासस्थानीयाः । किल्बिषिका¶ अन्तस्थस्थानीया इति ॥

त्रायस्त्रिंशलोकपालवर्ज्याव्यन्तरज्योतिष्काः ॥ ५ ॥**

---

* D पार्षद्य । † D आत्मरक्षकाः । ‡ D तत्रेन्द्रा इति ।
§ S ०र्थचर० ? D अर्थवर । ‖ K om. ¶ H C किल्बिषाः ।
** D त्रायस्त्रिंशलोकपालवर्जा ।

---

१ S स्वविषयसन्धिरक्षणनिरूपिता आरक्षिका अर्थचरास्तौरोडरणिकराजस्थानीयादयस्तत्सदृशा लोकपालाः ॥

२ S सूत्रे वानीकान्येवोपात्तानि सूरिणा नानीकाधिपतयो भाष्ये पुनरुपन्यस्ताः । तदेकत्वमेवानीकानीकाधिपत्योः परिचिन्त्य विवृतमेव भाष्यकारेण । अन्यथा च दशसङ्ख्या भिद्यते ॥

व्यन्तरा ज्योतिष्काश्चाष्टविधा भवन्ति चायस्त्रिंशलोकपालवर्ज्या* इति ॥

पूर्वयोर्द्वीन्द्राः ॥ ६ ॥

पूर्वयोर्द्वनिकाययोर्भवनवासिव्यन्तरयोर्देवविकल्पानां द्वौ द्वाविन्द्रौ भवतः । तद्यथा। भवनवासिषु तावद्वौ असुरकुमाराणामिन्द्रौ भवतश्चमरो बलिश्च । नागकुमाराणां धरणो भूतानन्दश्च । विद्युत्कुमाराणां हरिर्हरिसहश्च । सुपर्णकुमाराणां वेणुदेवो वेणुदारी† च । अग्निकुमाराणामग्निशिखो ऽग्निमाणवश्च । वातकुमाराणां वेलम्बः प्रभञ्जनश्च । स्तनितकुमाराणां सुघोषो महाघोषश्च । उदधिकुमाराणां जलकान्तो जलप्रभश्च‡। द्वीपकुमाराणां पूर्णो ऽवशिष्टश्च । दिक्कुमाराणाममितो§ ऽमितवाहनश्चेति ॥ व्यन्तरेष्वपि द्वौ किन्नराणामिन्द्रौ किन्नरः किम्पुरुषश्च । किम्पुरुषाणां सत्पुरुषो महापुरुषश्च । महोरगाणामतिकायो महाकायश्च । गन्धर्वाणां॥ गीतरतिर्गीतयशाश्च । यक्षाणां पूर्णभद्रो मणिभद्रश्च¶ । राक्षसानां भीमो महाभीमश्च । भूतानां प्रतिरूपो ऽतिरूपश्च**। पिशाचानां काली महाकालश्चेति ॥ ज्योतिष्काणां तु बहवः सूर्याश्चन्द्रमसश्च ॥ वैमानिकानामेकैक एव । तद्यथा । सौधर्मे शक्रः । ऐशाने ईशानः ।

---

* C वर्ज्या ।
† D वेणुदाली ।
‡ C जलप्रभवश्च ।
§ D अमितगतिः ।
॥ D गान्धर्वानां ।
¶ D माणिभद्रश्च
** D अभिरूपश्च ।

सनत्कुमारे सनत्कुमार इति । एवं सर्वकल्पेषु स्वकल्पाङ्काः* । परतस्त्विन्द्रादयो दश विशेषा न सन्ति । सर्व एव स्वतन्त्रा इति ॥

पीतान्तलेश्याः ॥ ७ ॥

पूर्वयोर्निकाययोर्देवानां पीतान्ताश्चतस्रो लेश्या भवन्ति ॥

कायप्रवीचारा आ ऐशानात्† ॥ ८ ॥

भवनवास्यादयो देवा आ ऐशानात्कायप्रवीचारा भवन्ति । कायेन प्रवीचार एषामिति कायप्रवीचाराः । प्रवीचारो नाम मैथुनविषयोपसेवनम् । ते हि संक्लिष्टकर्माणो मनुष्यवन्मैथुनसुखमनुप्रलीयमानास्तीव्रानुभयाः कायसंक्लेशजं सर्वाङ्गीणं स्पर्शसुखमवाप्य प्रीतिमुपलभन्त इति ॥

शेषाः स्पर्शरूपशब्दमनःप्रवीचारा द्वयोर्द्वयोः ॥ ९ ॥

ऐशानादूर्ध्वं शेषाः कल्पोपपन्ना देवा द्वयोर्द्वयोः कल्पयोः स्पर्शरूपशब्दमनःप्रवीचारा भवन्ति यथासङ्ख्यम् । तद्यथा । सनत्कुमारमाहेन्द्रयोर्देवान्मैथुनसुखप्रेषूनुत्पन्नास्थान्विदित्वा देव्य उपतिष्ठन्ते । ताः स्पृष्ट्वैव च ते प्रीतिमुपलभन्ते विनिवृत्तास्थाश्च भवन्ति ॥ तथा ब्रह्मलोकलान्तकयोर्देवानेवंभूतोत्पन्नास्थान्विदित्वा देव्यो दिव्यानि स्वभावभास्वराणि सर्वाङ्गमनोहराणि शृङ्गारोदाराभिजाताकारविलासान्युज्ज्वलचारुवेषाभरणानि स्वानि

---

* C स्वकल्पांकाकाः । † D ईशानात् । ‡ D एवंभूतानेवोत्पन्नास्थान ।

रूपाणि दर्शयन्ति । तानि दृष्ट्वैव ते प्रीतिमुपलभन्ते निवृत्तास्थाश्च भवन्ति ॥ तथा महाशुक्रसहस्रारयोर्देवानुत्पन्नप्रवीचारास्थान्विदित्वा देव्यः श्रुतिविषयसुखानत्यन्तमनोहरान् शृङ्गारोदाराभिजातविलासाभिलाप*च्छेद†तललालाभरणरवमिश्रान्हसितकथितगीतशब्दानुदीरयन्ति । तान्श्रुत्वैव ते प्रीतिमुपलभन्ते निवृत्तास्थाश्च भवन्ति ॥ आनतप्राणतारणाच्युतकल्पवासिनो देवाः प्रवीचारायोत्पन्नास्था देवीः संकल्पयन्ति संकल्पमात्रेणैव ते परां प्रीतिमुपलभन्ते विनिवृत्तास्थाश्च भवन्ति ॥ एभिश्च प्रवीचारैः परतः परतः प्रीतिप्रकर्षविशेषो ऽनुपमगुणो भवति प्रवीचारिणामल्पसंक्लेशत्वात् । स्थितिप्रभावादिभिरधिका इति वक्ष्यते [IV. 21 ।] ॥

परे ऽप्रवीचाराः ॥ १० ॥

कल्पोपपन्नेभ्यः परे देवा अप्रवीचारा भवन्ति । अल्पसंक्लेशत्वात् स्वस्थाः प्रीतीभूताः‡ । पञ्चविधप्रवीचारोद्भवादपि प्रीतिविशेषादपरिमितगुणप्रीतिप्रकर्षाः परमसुखतृप्ता एव भवन्ति ॥

अत्राह । उक्तं भवता देवास्चतुर्निकाया दशाष्टपञ्चद्वादशविकल्पा इत्युक्ते निकायाः के के चैषां§? विकल्पा इति । अत्रोच्यते । चत्वारो देवनिकायाः । तद्यथा । भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिका इति ॥ तत्र

---

* K अभिलाष । † छेक ? ‡ C श्रीतभूताः ।

§ D इति तत्के निकायाः के चैषां ।

Padumawati, Fasc. 1–4 @ 2/	Rs	8	0
Pariçista Parvan, (Text) Fasc. 1–5 @ /6/ each		1	14
Prākrita-Paingalam, Fasc. 1–7 @ /6/ each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Sraddha Kriya Kaumudi, Fasc. 1		0	6
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
Tattvarthadhigama Sutrom, Fasc. 1		0	6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-5 @ /6/ each ...		1	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1–6 @ /6/		2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Vidhano Parigata, Fasc. 1		0	6
Viṣnu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5 @ 1/ each		13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Muqaddasī (English) Vol. I, Fasc. 1–3 @ /12/		2	4
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–8 @ 1/ each		8	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each		13	2
Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each		1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6 each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each ...	...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...	...	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ...	...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	...	0	6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ditto Ditto (English) Fasc. 1–3	...	2	4
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ditto (English) Fasc. 1–14 @ /12/ each ...	...	10	8
Ditto Index	...	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	...	3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	...	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.			
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar „ „	8	0
16.	Kaçmīraçabdāmṛta, Parts I and II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each		29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...		5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

20–6–03.

Books are supplied by V.-P.P.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1079.



तत्त्वार्थाधिगमसूत्रम् ।

TATTVÂRTHÂDHIGAMA.

BY

UMÂSVÂTI

BEING

IN THE ORIGINAL SANSKRIT

WITH THE

BHÂṢYA BY THE AUTHOR HIMSELF.

EDITED BY

MODY KESHAVLAL PREMCHAND, B.A., LL.B.

TEXT AND BHÂṢYA.

VOL. I. FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1904.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46 GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 2–5 @ /6/ each		1	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1		0	6
Baudhayana Srauta Sutra, Fasc. 1–2 @ /6/ each		0	12
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–4		1	8
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1–2		0	12
Catadusani, Fasc. 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–2 ...		3	6
Çatasahasrika-prajnaparamita (Text) Part I, Fasc. 1–6 @ /6/ each ...		2	4
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1–4		3	0
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–17 @ /6/ each ...		5	4
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Dan Kriya Kaumudi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1–6...		2	4
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–6		2	4
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–11 @ /6/ each		7	8
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–8 @ /12 each		6	0
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nyāyavārtika, (Text) Fasc. 1–6 @ /6/		2	4
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. 1–7 (Text) @ /6/		2	10
Nityacarapradiph Fasc. 1–4		1	8
Nyayabinduṭika, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–3 @ /6/ each		3	9

भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ ११ ॥

प्रथमो देवनिकायो भवनवासिनः। इमानि चैषां विधानानि भवन्ति। तद्यथा। असुरकुमारा नागकुमारा विद्युत्कुमाराः सुपर्णकुमारा अग्निकुमारा वातकुमाराः स्तनितकुमारा उदधिकुमारा द्वीपकुमारा दिक्कुमारा इति। कुमारवदेते कान्तदर्शनाः सुकुमारा* मृदुमधुरललितगतयः शृङ्गाराभिजातरूपविक्रियाः कुमारवच्चोद्धतरूपवेषभाषाभरणप्रहरणावरणयान†वाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते। असुरकुमारावासेष्वसुरकुमाराः प्रतिवसन्ति शेषासु भवनेषु। महामन्दरस्य दक्षिणोत्तरयोर्दिग्विभागयोर्बङ्कीषु योजनशतसहस्रकोटीकोटीष्वावासा भवनानि च दक्षिणार्धाधिपतीनामुत्तरार्धाधिपतीनां च यथास्वं भवन्ति। तच्च भवनानि रत्नप्रभायां बाहल्यार्धमवगाह्य मध्ये भवन्ति। भवनेषु वसन्तीति भवनवासिनः॥

भवप्रत्ययाश्चैषामिमा नामकर्मनियमात्स्वजातिविशेषनियता विक्रिया भवन्ति। तद्यथा। गम्भीराः श्रीमन्तः कान्ता महाकाया रत्नोत्कटमुकुटभास्वराश्चूडामणिचिह्ना **असुरकुमारा** भवन्ति। शिरोमुखेष्वधिकप्रतिरूपाः कृष्णश्यामा मृदुललितगतयः शिरसु फणिचिह्ना **नागकुमाराः**। स्निग्धा भ्राजिष्णवो ऽवदाता वज्रचिह्ना **विद्युत्कुमाराः**। अधिक-

* D सुकुमारमृदु०। † C यात।

रूप*ग्रीवोरस्काः श्यामावदाता गरुडचिह्नाः **सुपर्णकुमाराः**। मानोन्मानप्रमाणयुक्ता भास्वन्तो ऽवदाता घटचिह्ना **अग्निकुमारा** भवन्ति। स्थिरपीनवृत्तगात्रा निमग्नोदरा अश्वचिह्ना अवदाता **वातकुमाराः**। स्निग्धाः स्निग्धगम्भीरानुनाद†महास्वनाः‡ कृष्णा वर्धमानचिह्नाः **स्तनितकुमाराः**। ऊरुकट्यधिकप्रतिरूपाः कृष्णश्यामा मकरचिह्ना **उदधिकुमाराः**। उरःस्कन्धबाहुग्रहस्तेष्वधिकप्रतिरूपाः श्यामावदाताः सिंहचिह्ना **द्वीपकुमाराः**। जङ्घाग्रपादेष्वधिकप्रतिरूपाः श्यामा हस्तिचिह्ना **दिक्कुमाराः**। सर्वे विविधवस्त्राभरणप्रहरणावरणा भवन्तीति॥ ॥

व्यन्तराः किन्नरकिम्पुरुषमहोरगगान्धर्वयक्षराक्षसभूतपिशाचाः॥ १२ ॥

अष्टविधो द्वितीयो देवनिकायः। एतानि चास्य विधानानि भवन्ति। [१]अधस्तिर्यगूर्ध्वं च चिष्वपि लोकेषु भवननगरेष्वावासेषु च प्रतिवसन्ति¶। यस्माच्चाधस्तिर्यगूर्ध्वं च चीनपि लोकान् स्पृशन्तः स्वातन्त्र्यात्पराभियोगाच्च प्रायेण प्रतिपत्त्यनियतगतिप्रचारा मनुष्यानपि केचिद्भृत्यवदुपचरन्ति विविधेषु

---

* D प्रतिरूप। † D अनुनादि। ‡ D महास्वराः। § D उदरस्कन्ध°।
|| C has सर्वे ऽपि च विविधवस्त्राभरणा भवन्ति। ¶ B प्रविशन्ति।

---

१ D adds अस्य रत्नप्रभायाः प्रथमस्य रत्नकाण्डस्य योजनसहस्रावगाढस्योर्ध्वमधश्चैकैकं योजनशतं वर्जयित्वा मध्ये ऽसङ्ख्येयानि भौमेयनगरावासशतसहस्राणि भवन्ति॥ तथा

च शैलकन्दरान्तर*वनविवरादिषु प्रतिवसन्त्यतो व्यन्तरा इत्युच्यन्ते ॥

तत्र **किन्नरा दशविधाः** । तद्यथा । किन्नराः किम्पुरुषाः किंपुरुषोत्तमाः† किन्नरोत्तमा हृदयंगमा रूपशालिनो ऽनिन्दिता मनोरमा रतिप्रिया रतिश्रेष्ठा इति ॥ **किम्पुरुषा दशविधाः** । तद्यथा । पुरुषाः सत्पुरुषा महापुरुषाः पुरुषवृषभाः पुरुषोत्तमा अतिपुरुषाः‡ मरुदेवा मरुतो मेरुप्रभाः§ यशस्वन्त इति ॥ **महोरगा दशविधाः** । तद्यथा । भुजगा भोगशालिनो महाकाया अतिकायाः स्कन्धशालिनो मनोरमा महावेगा महेष्वक्षा‖ मेरुकान्ता भास्वन्त¶ इति ॥ **गान्धर्वा द्वादशविधाः** । तद्यथा** । हाहा हूहू तुम्बुरवो नारदा ऋषिवादिकाः†† भूतवादिकाः कादम्बा महाकादम्बा रैवता विश्वावसवो‡‡ गीतरतयो गीतयशस इति ॥ **यक्षास्त्रयोदशविधाः** । तद्यथा । पूर्णभद्रा माणिभद्राः श्वेतभद्रा हरिभद्राः सुमनोभद्रा व्यतिपातिकभद्राः सुभद्राः§§ सर्वतोभद्रा मनुष्ययक्षा वनाधिपतयो‖‖ वनाहारा¶¶ रूपयक्षा यक्षोत्तमा इति ॥ **सप्तविधा राक्षसाः** । तद्यथा** । भीमा महाभीमा विघ्ना विनायका जलराक्षसा राक्षसराक्षसा ब्रह्मराक्षसा इति ॥ **भूता नवविधाः** । तद्यथा** । सुरूपाः प्रतिरूपा अतिरूपा भूतोत्तमा

---

* D कन्दरातरुवन । † B D किन्नरकिम्पुरुषाः । ‡ C अतिपुरुषोत्तमाः ।
§ D मरुत्प्रभाः । ‖ K मरुद्वेष्वक्षा, D मरुद्वृक्षाः ।
¶ D भास्वान्तः । ** Mss. omit. †† D रिविवादिकाः ।
‡‡ D विश्वावसवः । §§ D खभद्राः । ‖‖ D धनाधिपतयः ।
¶¶ D धनाहाराः ।

स्कन्दिका महास्कन्दिका महावेगाः प्रतिच्छन्ना आकाशगा इति ॥ **पिशाचाः** पञ्चदशविधाः । तद्यथा । कूष्माण्डाः पटका* जोषा आह्नकाः† काला महाकालाश्चौचा‡ अचौचास्तालपिशाचा मुखरपिशाचा अधस्तारका देहा महाविदेहा§ हास्त्रणीका वनपिशाचा इति ॥

तत्र **किन्नराः** प्रियङ्गुश्यामाः सौम्याः सौम्यदर्शना मुखेष्वधिकरूपशोभा मुकुटमौलि‖भूषणा अशोकवृक्षध्वजा अवदाताः ॥ **किम्पुरुषा** ऊरु¶बाहुष्वधिकशोभा मुखेष्वधिकभास्वरा विविधाभरणभूषणा**श्चित्रस्रगनुलेपनाश्चम्पकवृक्षध्वजाः ॥ **महोरगाः** श्यामावदाता महावेगाः सौम्याः सौम्यदर्शना महाकायाः पृथुपीनस्कन्धग्रीवा विविधानुविलेपना†† विचित्राभरण‡‡भूषणा नागवृक्षध्वजाः ॥ **गान्धर्वा** रक्तावदाता§§ गम्भीराः प्रियदर्शनाः सुरूपाः सुमुखाकाराः सुखरा मौलिधरा हारविभूषणास्तुम्बरु‖‖‖वृक्षध्वजाः ॥ **यक्षाः** श्यामावदाता गम्भीरा तुन्दिला वृन्दारकाः प्रियदर्शना मानोन्मानप्रमाणयुक्ता रक्तपाणिपादतलनखतालुजिह्वौष्ठा भास्वरमुकुटधरा¶¶ नानारत्नविभूषणा वटवृक्षध्वजाः ॥ **राक्षसा** अवदाता*** भीमा भीमदर्शनाः शिरःकराला रक्तलम्बौष्ठास्तपनीयविभूषणा नानाभक्तिविलेपनाः खट्वाङ्गध्व-

---

* B पिठकाः । † B चंगकाः, K चंडकाः, D आह्नकाः ।
‡ K B सौचौचाः, D चौचाः । § K महाहेहाः, C सहेहाः ।
‖ D मूलि । ¶ D उरो । ** D० भूषणा विचित्र । †† D विविधविलेपनाः ।
‡‡ D आवरण । §§ K B and D place this before गान्धर्वाः ।
‖‖‖ B तुम्बुर । ¶¶ C ०मुकुटधरा । *** K B place this before राक्षसाः

जाः ॥ **भूताः** श्यामाः* सुरूपाः सौम्या आपीवरा† नानाभक्तिविलेपनाः सुलसध्वजाः कालाः ॥ **पिशाचाः** सुरूपाः सौम्यदर्शना हस्तग्रीवासु मणिरत्नविभूषणाः कदम्बवृक्षध्वजाः ॥ इत्येवंप्रकारस्वभावानि वैक्रियाणि रूपचिह्नानि व्यन्तराणां भवन्तीति ॥

तृतीयो देवनिकायः ।

ज्योतिष्काः सूर्याश्चन्द्रमसो ग्रह‡नक्षत्रप्रकीर्णतारका§श्च ॥ १३ ॥

ज्योतिष्काः पञ्चविधा भवन्ति । तद्यथा । सूर्याश्चन्द्रमसो ग्रहा नक्षत्राणि प्रकीर्णतारका इति पञ्चविधा ज्योतिष्का इति । असमासकरणमार्षात्[१] सूर्यचन्द्रमसोः क्रमभेदः कृतः¶ यथा गम्येतैतदेवैषामूर्ध्वनिवेश आनुपूर्व्यमिति । तद्यथा । सर्वाधस्तात्सूर्यास्ततश्चन्द्रमसस्ततो** ग्रहास्ततो नक्षत्राणि ततोऽपि प्रकीर्णताराः । ताराग्रहास्वनियतचारित्वात्सूर्यचन्द्रमसामूर्ध्वमधश्च चरन्ति सूर्येभ्यो दशयोजनावलम्बिनो भवन्तीति । समाद्भूमिभागादृष्टसु योजनशतेषु सूर्यास्ततो योजनानामशीत्यां चन्द्रमसस्ततो विंशत्यां तारा

---

* K B place this before भूताः ।

† *B omits* K आपीनधराः, *D* आपीडधराः ।

‡ C ग्रहा नक्षत्राणि । § P K ताराश्च । || D सूर्याचन्द्रमसः ।

¶ K कृतः । ** D ततस्तारा ग्रहाः ।

---

१ S असमासकरणे पारमर्षप्रवचनक्रममेदे च प्रयोजनमाह । असमासकरणात्तावत्तिर्यङ्मण्डलिकयावस्थानं निषिध्यते । उपर्युपर्यवस्थानम् । × × × आर्षे तु प्राक्चन्द्रः पश्चते पश्चात्सूर्य इति । न चैवमुपरि संनिवेशः ॥

द्दति । द्योतयन्त द्दति द्योतींषि विमानानि तेषु भवा ज्योतिष्का ज्योतिषो वा देवा ज्योतिरेव वा ज्योतिष्काः । मुकुटेषु शिरोमुकुटोपगूहितैः* प्रभामण्डलकल्पैरुज्ज्वलैः सूर्यचन्द्रतारामण्डलैर्यथास्वं चिह्नैर्विराजमाना द्युतिमन्तो ज्योतिष्का भवन्तीति ॥ 5

मेरुप्रदक्षिणानित्यगतयो नृलोके ॥ १४ ॥

मानुषोत्तरपर्यन्तो मनुष्यलोक† द्दत्युक्तम् [III. 14.] । तस्मिन्ज्योतिष्का मेरुप्रदक्षिणानित्यगतयो भ्रमन्ति‡ । मेरोः प्रदक्षिणा नित्या गतिरेषामिति मेरुप्रदक्षिणानित्यगतयः । एकादशस्वेकविंशेषु योजनशतेषु मेरोश्चतुर्दिशं प्रदक्षिणं चरन्ति । तत्र द्वौ 10 सूर्यौ जम्बूद्वीपे लवणजले चत्वारो धातकीखण्डे द्वादश कालोदे द्वाचत्वारिंशत्पुष्करार्धे द्विसप्ततिरित्येवं मनुष्यलोके द्वाचिंशत्सूर्यशतं§ भवति । चन्द्रमसामप्येष एव विधिः । अष्टाविंशतिर्नक्षत्राणि अष्टाशीतिर्ग्रहाः षट्षष्टिः सहस्राणि नव शतानि पञ्चसप्ततानि तारा॥कोटाकोटीनामेकैकस्य चन्द्रमसः परिग्रहः । 15 सूर्याश्चन्द्रमसो ग्रहा नक्षत्राणि च तिर्यग्लोके शेषास्त्वूर्ध्वलोके[1] ज्योतिष्का भवन्ति । अष्टचत्वारिंशद्योजनैकषष्टिभागाः सूर्य-

* D शिरोमुकुटोपगूहिभिः । † D मानुषोत्तरपर्यन्ते मनुष्यलोके द्दत्युक्तम् ।
‡ D भवन्ति । § D द्वाचिंशं सूर्यशंत ।
|| D तारकोटीकोटीनां । B तारकाः कोटाकोटीनां ।

१ S शेषास्तु प्रकीर्णतारका ऊर्ध्वलोके भवन्तीत्याचार्य एवेदमवगच्छति । नत्वार्षमेवमवस्थितं सर्वज्योतिष्काणां तिर्यग्लोकव्यवस्थानादिति । H शेषास्त्वूर्ध्वलोके ज्योतिष्काः तारालक्षणा इति वृत्तिकाराभिप्रायः तद्वाऊश्रुत्यादविरुद्ध एव । अष्टादशयोजनशतोच्छ्रितत्वे ऽपि तिर्यग्लोकस्याध ऊर्ध्वदिग्भावो भयत्वविरोधात् ॥

मण्डलविष्कम्भसूत्रमसः षट्पञ्चाशद् ग्रहाणामर्धयोजनं गव्यूतं नक्षत्राणां सर्वोत्कृष्टायास्तारायाः अर्धक्रोशो जघन्यायाः पञ्चधनुःशतानि । विष्कम्भार्धबाहल्याश्च भवन्ति । सर्वे सूर्यादयो नृलोक इति वर्तते । बहिस्तु विष्कम्भबाहल्याभ्यामतोऽर्धं भवन्ति ॥ एतानि च ज्योतिष्कविमानानि लोकस्थित्या प्रसक्तावस्थितगतीन्यपि ऋद्धि*विशेषार्थमाभियोग्यनामकर्मोदयाच्च नित्यं गतिरतयो देवा वहन्ति । तद्यथा । पुरस्तात्केसरिणो दक्षिणतः कुञ्जरा अपरतो वृषभा उत्तरतो जविनोऽश्वा इति ॥

तत्कृतः कालविभागः ॥ १५ ॥

कालोऽनन्तसमयोवर्तनादिलक्षण इत्युक्तम् [V. 39 and 22]। तस्य विभागो ज्योतिष्काणां गतिविशेषकृतस्तारविशेषेण हेतुना । तैः कृतस्तत्कृतः । तद्यथा । अणुभागास्तारा† अंशाः कला लवा नालिका मुहूर्ता दिवसरात्रयः‡ पक्षा मासा ऋतवोऽयनानि संवत्सरा युगमिति लौकिकसमो विभागः ॥ पुनरन्यो विकल्पः प्रत्युत्पन्नोऽतीतोऽनागत इति त्रिविधः ॥ पुनस्त्रिविधः परिभाष्यते सङ्ख्येयोऽसङ्ख्येयोऽनन्त इति ॥

तत्र परमसूक्ष्मक्रियस्य सर्वजघन्यगतिपरिणतस्य परमाणोः स्वावगाहनक्षेत्रव्यतिक्रमकालः समय इत्युच्यते परमदुरधिगमो[1]

---

* C परिद्धि। † D चरा। ‡ D दिवसाः रात्रयः।

---

१ S परमैः अतिशयसम्पन्नैः दुःखेनाधिगम्यते ॥

ऽनिर्देश्यः। तं हि भगवन्तः परमर्षयः केवलिनो विदन्ति न तु निर्दिशन्ति परमनिरुद्धत्वात्। परमनिरुद्धे हि तस्मिन् भाषाद्रव्याणां ग्रहणनिसर्गयोः करणप्रयोगासम्भव इति। ते त्वसङ्ख्येया आवलिका। ताः सङ्ख्येया उच्छ्वासस्तथा निःश्वासः। तौ बलवतः पट्विन्द्रियस्य कल्यस्य मध्यमवयसः स्वस्थमनसः पुंसः प्राणः। ते सप्त स्तोकः। ते सप्त लवः। ते ऽष्टाचिंशदर्धं च नालिका। ते द्वे मुहूर्तः। ते त्रिंशदहोरात्रम्। तानि पञ्चदश पक्षः। तौ द्वौ शुक्लकृष्णौ मासः। तौ द्वौ मासावृतुः। ते त्रयोः ऽयनम्। ते द्वे संवत्सरः। ते पञ्च चन्द्रचन्द्राभिवर्धितचन्द्राभिवर्धिता*ख्या युगम्। तन्मध्ये ऽन्ते चाधिकमासकौ। सूर्यसवनचन्द्रनक्षत्राभिवर्धितानि युगनामानि†। वर्षशतसहस्रं चतुरशीतिगुणितं पूर्वाङ्गम्। पूर्वाङ्गशतसहस्रं चतुरशीतिगुणितं पूर्वम्‡। एवं ताऽन्ययुतकमलनलिनकुमुदतुट्यटटाववा‖हाहाङ्¶ङ्गचतुरशीतिशतसहस्रगुणाः सङ्ख्येयः कालः। अत ऊर्ध्वमुपमानियतं वक्ष्यामः। तद्यथा हि नाम योजनविस्तीर्णं योजनोच्छ्रायं वृत्तं पल्यमेकरात्राद्युत्कृष्टसप्तरात्रजातानामङ्गुलोत्सांगाढं** पूर्णं स्यादर्षशतादर्षशतादेकैकस्मिन्नुद्धियमाणे यावता

---

* C adds चन्द्र। D omits ख्या।

† B D add विंशतियुगैर्वर्षशतं दशभिर्वर्षशतैर्वर्षसहस्रं वर्षसहस्रं शतगुणं वर्षशतसहस्रं।

‡ D पूर्वाङ्गं चतुरशीतिशतसहस्रगुणितं पूर्वं।

§ C omits तानि। ‖ K ऋडड and ऋवव, B ऋपवा। ¶ D ङ्गाचतु।

** D गाढपर्ण।

कालेन तद्भिन्नं स्यादेतत्पल्योपमम् । तद्दशभिः कोटाकोटि-भिर्गुणितं सागरोपमम् । तेषां कोटाकोट्यश्चतस्रः सुषमसुषमा* । तिस्रः सुषमा । द्वे सुषमदुःषमा । द्विचत्वारिंशद्वर्षसहस्राणि हित्वा एका दुःषमसुषमा । वर्षसहस्राणि एकविंशतिर्दुःषमा । तावत्येव दुःषमदुःषमा । ता अनुलोमप्रतिलोमा अवसर्पिण्युत्सर्पिण्यौ भरतैरावतेष्वनाद्यनन्तं परिवर्तेते ऽहोरात्रवत् । तयोः शरीरायुःशुभपरिणामानामनन्तगुणहानिवृद्धी अशुभ†परिणामवृद्धिहानी । अवस्थितावस्थितगुणा‡श्चैकैकान्यत्र । तद्यथा । कुरुषु सुषमसुषमा हरिरम्यकवासेषु सुषमा हैमवतहैरण्यवतेषु सुषमदुःषमा§ विदेहेषु सान्तरद्वीपेषु दुःषमसुषमा इत्येवमादिर्मनुष्यचेत्रे पर्यापन्नः कालविभागो ज्ञेय इति ॥

बहिरवस्थिताः ॥ १६ ॥

नृलोकाद्बहिर्ज्योतिष्का अवस्थिताः । अवस्थिता इत्यविचारिणो ऽवस्थितविमानप्रदेशा अवस्थितलेश्याप्रकाशा इत्यर्थः । सुखशीतोष्णरश्मयश्चेति ॥

वैमानिकाः ॥ १७ ॥

चतुर्थो देवनिकायो वैमानिकाः । ते ऽत ऊर्ध्वं वक्ष्यन्ते । विमानेषु भवा वैमानिकाः ॥

कल्पोपपन्नाः कल्पातीताश्च ॥ १८ ॥

---

* D has plural in all these in this connection.

† B अशुभानाम् वृद्धिहानी । ‡ B गुणाश्चैकैकान्यत्र ।

§ K सुषमदुःषमानभावो ।

द्विविधा वैमानिका देवाः कल्पोपपन्नाः कल्पातीताश्च । तान् परस्ताद्वक्ष्याम इति ॥

उपर्युपरि ॥ १९ ॥

उपर्युपरि च यथानिर्देशं वेदितव्याः । नैकक्षेत्रे नापि तिर्यगधो वेति ॥

सौधर्मैशानसनत्कुमारमाहेन्द्रब्रह्मलोकलान्तकमहाशुक्रसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धे च ॥ २० ॥

एतेषु सौधर्मादिषु कल्पविमानेषु वैमानिका देवा भवन्ति । तद्यथा । सौधर्मस्य कल्पस्योपर्यैशानः कल्पः । ऐशानस्योपरि सनत्कुमारः । सनत्कुमारस्योपरि माहेन्द्र इत्येवमा सर्वार्थसिद्धादिति ॥ सुधर्मा नाम* शक्रस्यां देवेन्द्रस्य सभा । सा तस्मिन्नस्तीति सौधर्मः कल्पः । ईशानस्य देवराजस्य निवास ऐशान इत्येवमिन्द्राणां निवासयोग्याभिख्याः सर्वे कल्पाः ॥ ग्रैवेयास्तु लोकपुरुषस्य ग्रीवाप्रदेशविनिविष्टा ग्रीवाभरणभूता ग्रैवा ग्रीव्या ग्रैवेया ग्रैवेयका इति ॥ अनुत्तराः पञ्च देवनामान एव । विजिता अभ्युदयविघ्नहेतव एभिरिति विजयवैजयन्तजयन्ताः । तैरेव विघ्नहेतुभिर्न पराजिता अपराजिताः । सर्वेष्वभ्युदयार्थेषु सिद्धाः सर्वार्थैश्च सिद्धाः सर्वे चैषामभ्युदयार्थाः

* D सुधर्मनामा । † C om. ‡ D योगाभिख्याः । § C interchange.

सिद्धा इति सर्वार्थसिद्धाः । विजितप्रायाणि वा कर्माण्येभिरुपस्थितभद्राः परीषहैरपराजिताः सर्वार्थेषु सिद्धाः सिद्धप्रायोत्तमार्था इति विजयाद्य इति ॥

स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः ॥ २१ ॥

यथाक्रमं चैतेषु सौधर्मादिषूपर्युपरि देवाः पूर्वतः पूर्वत एभिः स्थित्यादिभिरर्थैरधिका भवन्ति ॥ तत्र **स्थिति**रुत्कृष्टा जघन्या च परस्ताद्वक्ष्यते । इह तु वचने प्रयोजनं येषामपि समा भवति तेषामप्युपर्युपरि गुणा*धिका भवतीति यथा प्रतीयेत† ॥ **प्रभावतो** ऽधिकाः । यः प्रभावो निग्रहानुग्रहविक्रियापराभियोगादिषु सौधर्मकाणां सो ऽनन्तगुणाधिक उपर्युपरि । मन्दाभिमानतया ह्यल्पतरसंक्लिष्टत्वादेते‡ न प्रवर्तन्त इति ॥ चेचस्वभावजनिताच्च शुभपुद्गलपरिणामात्**सुखतो द्युति**तश्चानन्तगुणप्रकर्षेणाधिकाः ॥ **लेश्याविशुद्धा**धिकाः । लेश्यानियमः§ परस्तादेषां वक्ष्यते । इह तु वचने प्रयोजनं‖ यथा गम्येत यत्रापि विधानतस्तुल्यास्तत्रापि विशुद्धितो ऽधिका भवन्तीति । कर्मविशुद्धित एव वाधिका भवन्तीति ॥ **इन्द्रिय**-**विषयतो** ऽधिकाः । यदिन्द्रियपाटवं दूरादिष्टविषयोपलब्धौ सौधर्मदेवानां तत्प्रकृष्टतरगुणत्वादल्पतरसंक्लेशत्वाच्चाधिकमुपर्यु-

---

* C गुणतो ऽधिका । † D प्रतीयेत । ‡ D त्वाच्च ।

§ C नियमं वक्ष्यति । IV. 23. ‖ Some Mss. omit प्रयोजनं ।

परीति ॥ **अवधिविषयतो** ऽधिकाः सौधर्मैशानयोर्देवा अवधिविषयेणाधो रत्नप्रभां पश्यन्ति तिर्यगसङ्ख्येयानि योजन*सहस्राण्यूर्ध्वमाखभवनात् । सनत्कुमारमाहेन्द्रयोः शर्कराप्रभां पश्यन्ति तिर्यगसङ्ख्येयानि योजनशतसहस्राण्यूर्ध्वमाखभवनात् । द्वत्येवं शेषाः क्रमशः । अनुत्तरविमानवासिनस्तु कृत्स्नां लोकनाडिं† पश्यन्ति। येषामपि क्षेत्रतस्तुल्यो ऽवधिविषयः तेषामप्युपर्युपरि विशुद्धितो ऽधिको भवतीति‡ ॥

गतिशरीरपरिग्रहाभिमानतो हीनाः ॥ २२ ॥

गतिविषयेण शरीरमहत्त्वेन महापरिग्रहत्वेनाभिमानेन चोपर्युपरि हीनाः । तद्यथा । द्विसागरोपमजघन्यस्थितीनां देवानामासप्तम्यां **गतिविषयस्तिर्यगसङ्ख्येयानि** योजनकोटीकोटीसहस्राणि ततः परतो जघन्यस्थितीनामेकैकहीना भूमयो यावत्तृतीयेति । गतपूर्वास्§ गमिष्यन्ति च द्वतीयां‖ देवाः परतस्तु सत्यपि गतिविषये न गतपूर्वा नापि गमिष्यन्ति । महानुभावक्रियातः औदासीन्याच्चोपर्युपरि देवा न गतिरतयो भवन्ति ॥ सौधर्मैशानयो कल्पयोर्देवानां **शरीरोच्छ्रायः** सप्तारत्नयः । उपर्युपरि द्वयोर्द्वयोरेकारत्निर्हीना यावत्सहस्रारात् । आनतादिषु तिस्रः । ग्रैवेयकेषु द्वे । अनुत्तरे ¶एका द्वति ॥ सौधर्मे विमानानां द्वात्रिंशच्छतसहस्राणि । ऐशाने ऽष्टाविंशतिः ।

---

* C has शतसहस्र । † D लोकनाडीं । ‡ C पं. १००० ।
§ B गतिपूर्वास्च । ‖ C D द्वतीयायां । ¶ B अनुत्तरेष्वेका ।

सनत्कुमारे द्वादश । माहेन्द्रे ऽष्टौ । ब्रह्मलोके चत्वारि शतसहस्राणि । लान्तके पञ्चाशत्सहस्राणि । महाशुक्रे चत्वारिंशत् । सहस्रारे षट् । आनतप्राणतारणाच्युतेषु* सप्त शतानि । अधो ग्रैवेयकाणां† शतमेकादशोत्तरम् । मध्ये सप्तोत्तरम् । उपर्येकमेव शतम् । अनुत्तराः पञ्चैवेति । एवमूर्ध्वलोके वैमानिकानां सर्वविमानपरिसङ्ख्या चतुरशीतिः शतसहस्राणि सप्तनवतिश्च सहस्राणि त्रयोविंशानीति ॥ स्थानपरिवारशक्तिविषयसंपत्स्थितिष्वल्पाभिमानाः परमसुखभागिन उपर्युपरीति ॥

उच्छ्वासाहारवेदनोपपातानुभावतश्च साध्याः[१] ॥

उच्छ्वासः सर्वजघन्यस्थितीनां देवानां सप्तसु‡ स्तोकेषु **आहार** चतुर्थकालः । पल्योपमस्थितीनामन्तर्दिवसस्योच्छ्वासो दिवसपृथक्त्वस्याहारः । यस्य यावन्ति सागरोपमानि स्थितिस्तस्य तावत्पक्षार्धमासेषूच्छ्वासस्तावत्स्वेव वर्षसहस्रेष्वाहारः ॥ देवानां **सद्वेदनाः** प्रायेण भवन्ति न कदाचिदसद्वेदनाः । यदि चासद्वेदना‖ भवन्ति ततो ऽन्तर्मुहूर्तमेव भवन्ति न परतो ऽनुबद्धाः सद्वेदनास्तत्क्षणेन षण्मासान् भवन्ति ॥ **उपपातः** । आरणाच्युतादूर्ध्वमन्यतीर्थिकानां§ नोपपातो न भवति । स्वलिङ्गिनां भिन्नदर्शनानामा-

---

* B and C omit आरण । † B ग्रैवेयाणां ।

‡ Probably considers this to be a sūtra. C सप्तस्तोका ।

§ K D अन्यतीर्थिकानाम् । ‖ S यदासद्वेदना० ।

---

१ S सूत्रेणानुपात्तमुपर्युपरिहीनमुच्छ्वासाद्युपन्यस्यति भाष्यकारः ॥

Some Mss. give this as a separate sūtra.

ग्रैवेयकेभ्य उपपातः । अन्यस्य सम्यग्दृष्टेः संयतस्य भजनीयं आसर्वार्थसिद्धात् । ब्रह्मलोकादूर्ध्वमासर्वार्थसिद्धाच्चतुर्दशपूर्वधराणामिति ॥ **अनुभावो** विमानानां सिद्धि*क्षेत्रस्य चाकाशे निरालम्बस्थितौ लोकस्थितिरेव हेतुः । लोकस्थितिर्लोकानुभावो लोकस्वभावो जगद्धर्मो ऽनादिपरिणामसन्ततिरित्यर्थः† । सर्वे च देवेन्द्रा ग्रैवेयादिषु च देवा भगवतां परमर्षीणामर्हतां जन्माभिषेकनिःक्रमणज्ञानोत्पत्तिमहासमवसरणनिर्वाणकालेष्वासीनाः शयिताः स्थिता वा ‡सहसैवासनशयनस्थानाश्रयैः प्रचलन्ति । शुभकर्मफलोदयाल्लोकानुभावत एव वा । ततो जनितोपयोगास्तां भगवतामनन्यसदृशीं तीर्थकरनामकर्मोद्भवां धर्मविभूतिमवधिनालोच्य§ संजातसंवेगाः सद्धर्मबहुमाना‖स्केचिदागत्य भगवत्पादमूलं स्तुतिवन्दनोपासनहितश्रवणैरात्मानुग्रहमाप्नुवन्ति¶ । केचिदपि तत्रस्था एव प्रत्युपस्थापनाञ्जलि-**प्रणिपातनमस्कारोपहारैः ††परमसंविग्नाः सद्धर्मानुरागोत्फुल्लनयनवदनाः समभ्यर्चयन्ति ॥

अत्राह । चयाणां देवनिकायानां लेश्यानियमो ऽभिहितः । अथ वैमानिकानां केषां का लेश्या इति । अत्रोच्यते ॥

पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु ॥ २३ ॥

उपर्युपरि वैमानिकाः सौधर्मादिषु द्वयोस्त्रिषु शेषेषु च

---

* B C सिद्धक्षेत्रस्य । † D अनादिपरिणामः सन्ततिरित्यर्थः । ‡ C सहस व ।
§ C आलोक्य । ‖ C सद्धर्मबहुमानाः । ¶ D अवाप्नुवन्ति ।
** D प्रत्युत्थानाञ्जलि । †† B adds परम ।

पीतपद्मशुक्ललेश्या भवन्ति यथासङ्ख्यम् । द्वयोः पीतलेश्याः सौधर्मैशानयोः*। त्रिषु पद्मलेश्याः सनत्कुमारमाहेन्द्रब्रह्मलोकेषु। शेषेषु लान्तकादिष्वासर्वार्थसिद्धाच्छुक्ललेश्याः । उपर्युपरि तु विशुद्धतरेत्युक्तम्[१] ॥

अत्राह । उक्तं भवता द्विविधा वैमानिका देवाः कल्पोपपन्नाः कल्पातीताश्चेति । तत्† के कल्पा इति अत्रोच्यते ॥

प्राग्ग्रैवेयकेभ्यः कल्पाः ॥ २४ ॥

प्राग्ग्रैवेयकेभ्यः कल्पा भवन्ति सौधर्मादय आरणाच्युतपर्यन्ता इत्यर्थः । अतोऽन्ये कल्पातीताः ॥

अत्राह । किं देवाः सर्व एव सम्यग्दृष्टयो यद्भगवतां परमर्षीणामर्हतां जन्मादिषु प्रमुदिता भवन्ति इति। अत्रोच्यते। न सर्वे सम्यग्दृष्टयः किं तु सम्यग्दृष्टयः सद्धर्मबहुमानादेव‡ तत्र प्रमुदिता भवन्त्यभिगच्छन्ति च। मिथ्यादृष्टयोऽपि च

---

* KD पीतलेश्याः सौधर्मैशानयोः । † C तत । ‡ B सद्धर्मबहुमाना देवा ।

---

१ मलयगिरि in his commentary on बृहत्संग्रहणी by जिनभद्रगणिक्षमाश्रमण says:—आह च तत्त्वार्थटीकाकारो हरिभद्रसूरिः । भावलेश्याः षडपीष्यन्ते देवानां प्रतिनिकायमिति ॥ The same author in his commentary on प्रज्ञापनासूत्र (Calcutta Edition, p. 365 A), says:—यथा च प्रमाणबाधितत्वं तथा तत्त्वार्थटीकायां भावितमिति ततोऽवधार्यः । From this it is clear that मलयगिरि also composed a commentary on तत्त्वार्थ ।

लोकचित्तानुरोधादिन्द्रानुवृत्त्या परस्परदर्शनात् पूर्वानुचरितमिति च प्रमोदं भजन्ते ऽभिगच्छन्ति च। लोकान्तिकास्तु सर्व एव विशुद्धभावाः सद्धर्मवर्द्धमानात्संसारदुःखार्त्तानां च सत्त्वानामनुकम्पया भगवतां परमर्षीणामर्हतां जन्मादिषु विशेषतः प्रमुदिता भवन्ति। अभिनिःक्रमणाय* च कृतसंकल्पान्भगवतो ऽभिगम्य प्रहृष्टमनसः स्तुवन्ति सभाजयन्ति चेति ॥

अत्राह। कै† पुनर्लोकान्तिकाः कतिविधा वेति। अत्रोच्यते

ब्रह्मलोकालया लोकान्तिकाः‡ ॥ २५ ॥

ब्रह्मलोकालया एव लोकान्तिका भवन्ति नान्यकल्पेषु नापि परतः। ब्रह्मलोकं परिवृत्त्याष्टासु दिक्षु अष्टविकल्पा भवन्ति। तद्यथा।

सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधमरुतः§ (अरिष्टाश्च) ॥ २६ ॥

एते सारस्वतादयो ऽष्टविधा देवा ब्रह्मलोकस्य पूर्वोत्तरादिषु दिक्षु प्रदक्षिणं भवन्ति यथासङ्ख्यम्। तद्यथा। पूर्वोत्तरस्यां दिशि सारस्वताः पूर्वस्यामादित्या इत्येवं शेषाः ॥

---

* D अभिनिःक्रमणे। † D का।

‡ D here and elsewhere लौकान्तिकाः।

§ C °नाव्याबाधारिष्टमरुतः, ।

विजयादिषु द्विचरमाः ॥ २७ ॥

विजयादिष्वनुत्तरेषु विमानेषु देवा द्विचरमा भवन्ति । द्विचरमा इति ततश्च्युताः परं द्विर्जनित्वा सिध्यन्तीति । सप्तत्सर्वार्थसिद्धमहाविमानवासिनः* । शेषास्तु भजनीयाः ॥

अत्राह । उक्तं भवता जीवस्यौदयिकेषु भावेषु तिर्यग्योनिगतिरिति [II. 6] तथा स्थितौ तिर्यग्योनीनां चेति [III. 126] । आस्रवेषु च माया तैर्यग्योनस्येति [VI. 17] । तत्के तिर्यग्योनय इति । अत्रोच्यते

औपपातिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ॥ २८ ॥

औपपातिकेभ्यश्च नारकदेवेभ्यो मनुष्येभ्यश्च यथोक्तेभ्यः शेषा एकेन्द्रियादयस्तिर्यग्योनयो भवन्ति ॥

अत्राह । †तिर्यग्योनिमनुष्याणां स्थितिरुक्ता । अथ देवानां का स्थितिरिति । अत्रोच्यते

स्थितिः ॥ २९ ॥

स्थितिरित्यत ऊर्ध्वं वक्ष्यते ॥

भवनेषु दक्षिणार्धाधिपतीनां पल्योपममध्यर्धम् ॥३०॥

भवनेषु तावद्भवनवासिनां दक्षिणार्धाधिपतीनां पल्योपम-

---

* D omits. † D adds नारक ।

मध्यं परा स्थितिः । द्वयोर्द्वयोर्यथोक्तयोर्भवनवासीन्द्रयोः पूर्वो* दक्षिणार्धाधिपतिः पर उत्तरार्धाधिपतिः ॥

शेषाणां पादोने ॥ ३१ ॥

शेषाणां† भवनवासिष्वधिपतीनां द्वे पल्योपमे पादोने परा स्थितिः । के च शेषा उत्तरार्धाधिपतय इति ॥

असुरेन्द्रयोः सागरोपममधिकं च ॥ ३२ ॥

असुरेन्द्रयोस्तु दक्षिणार्धाधिपत्युत्तरार्धाधिपत्योः सागरोपममधिकं च यथासङ्ख्यं परा स्थितिर्भवति ॥

सौधर्मादिषु यथाक्रमम् ॥ ३३ ॥

सौधर्ममादिं कृत्वा यथाक्रममित ऊर्ध्वं परा स्थितिर्वक्ष्यते ॥

सागरोपमे ॥ ३४ ॥

सौधर्मे कल्पे देवानां परा स्थितिर्द्वे सागरोपमे इति ॥

अधिके च ॥ ३५ ॥

ऐशाने द्वे एव सागरोपमे अधिके परा स्थितिर्भवति ॥

सप्त सनत्कुमारे ॥ ३६ ॥

सनत्कुमारे कल्पे सप्त सागरोपमाणि परा स्थितिर्भवति ॥

---

* B पूर्वेषां D °पूर्वेनिर्दिष्टौ यः स दक्षिणार्धाधिपतिरपर उत्तराधिपतिरिति ।

† C omits.

विशेषत्रिसप्तदशैकादशत्रयोदशपञ्चदशभिरधिकानि च ॥ ३७ ॥

एभिर्विशेषादिभिरधिकानि सप्त माहेन्द्रादिषु परा स्थितिर्भवति। सप्तेति वर्तते । तद्यथा । माहेन्द्रे सप्त विशेषाधिकानि । ब्रह्मलोके त्रिभिरधिकानि सप्त दशेत्यर्थः। लान्तके सप्तभिरधिकानि सप्त चतुर्दशेत्यर्थः। महाशुक्रे दशभिरधिकानि सप्त सप्तदशेत्यर्थः। सहस्रारे एकादशभिरधिकानि सप्त अष्टादशेत्यर्थः। आनतप्राणतयोस्त्रयोदशभिरधिकानि सप्त विंशतिरित्यर्थः। *आरणाच्युतयोः पञ्चदशभिरधिकानि सप्त द्वाविंशतिरित्यर्थः ॥

आरणा†च्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धे च[१] ॥ ३८ ॥

आरणाच्युतादूर्ध्वमेकैकेनाधिका स्थितिर्भवति नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धे च। आरणाच्युते द्वाविंशतिर्ग्रैवेयकेषु पृथगेकैकेनाधिका त्रयोविंशतिरित्यर्थः। एवमेकैकेनाधिका सर्वेषु नवसु यावत्सर्वार्थासुपरि नवमे एकत्रिंशत्। सा

---

* C आरणा०। † C चारण।

---

१ H विजयादिष्विति तु द्व्यधिकसङ्ख्यानियमार्थः सर्वार्थसिद्ध इति चाजघन्योत्कृष्टसङ्ख्यानियमार्थः।

विजयादिषु चतुर्ष्वेकेनाधिका द्वाचिंशत् । सप्तैकेनाधिका सर्वार्थसिद्धे* त्रयस्त्रिंशदिति ॥

अत्राह । मनुष्यतिर्यग्योनिजानां परापरे स्थिती व्याख्याते । अथौपपातिकानां किमेकैव स्थितिः परापरे न विद्यते इति । अत्रोच्यते

अपरा पल्योपममधिकं च ॥ ३९ ॥

सौधर्मादिष्वेव यथाक्रममपरा स्थितिः पल्योपममधिकं च । अपरा जघन्या निकृष्टेत्यर्थः । परा प्रकृष्टा† उत्कृष्टेत्यनर्थान्तरम् । तत्र सौधर्मे ऽपरा स्थितिः पल्योपममैशाने पल्योपममधिकं च ॥

सागरोपमे ॥ ४० ॥

सनत्कुमारे‡ ऽपरा स्थितिर्द्वे सागरोपमे ॥

अधिके च ॥ ४१ ॥

माहेन्द्रे जघन्या स्थितिरधिके द्वे सागरोपमे ॥

परतः परतः§ पूर्वा पूर्वानन्तरा ॥ ४२ ॥

माहेन्द्रात्परतः पूर्वा परा॥नन्तरा जघन्या स्थितिर्भवति । तद्यथा । माहेन्द्रे परा स्थितिर्विशेषाधिकानि सप्त सागरोपमाणि सा ब्रह्मलोके जघन्या भवति । ब्रह्मलोके दश सागरोपमाणि

---

* C लजघन्योत्कृष्टा † C कृष्टा । ‡ C सानत्कुमारे ।
§ B D only परतः once । ॥ C पूर्वा D पूर्वा पूर्वा परानन्तरा ।

परा स्थितिः सा लान्तके जघन्या। एवमा सर्वार्थसिद्धादिति[1]। (विजयादिषु चतुर्षु परा स्थितिस्त्रयस्त्रिंशत्सागरोपमाणि सा ल*जघन्योत्कृष्टा सर्वार्थसिद्ध इति)॥

नारकाणां च द्वितीयादिषु ॥ ४३ ॥

नारकाणां च द्वितीयादिषु भूमिषु पूर्वा पूर्वा परा स्थितिरनन्तरा परतः परतो ऽपरा भवति। तद्यथा। रत्नप्रभायां नारकाणामेकं सागरोपमं परा स्थितिः सा जघन्या शर्कराप्रभायाम्। त्रीणि सागरोपमाणि परा स्थितिः शर्कराप्रभायां सा जघन्या वालुकाप्रभायामिति। एवं सर्वासु। तमःप्रभायां द्वाविंशतिः सागरोपमाणि परा स्थितिः सा जघन्या महातमःप्रभायामिति॥

दश वर्षसहस्राणि प्रथमायाम् ॥ ४४ ॥

प्रथमायां भूमौ नारकाणां दश वर्षसहस्राणि जघन्या स्थितिः॥

---

* B omits.

---

१ S तत्र विजयादिषु चतुर्षु जघन्येनैकत्रिंशदुत्कर्षेण द्वात्रिंशत् सर्वार्थसिद्धे त्रयस्त्रिंशत्सागरोपमाण्यजघन्योत्कृष्टा स्थितिः। भाष्यकारेण तु सर्वार्थसिद्धे ऽपि जघन्या द्वात्रिंशत्सागरोपमाण्यधीता तन्न विद्मः केनाप्यभिप्रायेण॥ The passage in bracket does not form part of the text according to S. Mss., and H give it.

भवनेषु च ॥ ४५ ॥

भवनवासिनां च दश वर्षसहस्राणि जघन्या स्थितिः ॥

व्यन्तराणां च ॥ ४६ ॥

*व्यन्तराणां च देवानां दश वर्षसहस्राणि जघन्या स्थितिः ॥

परा पल्योपमम् ॥ ४७ ॥

व्यन्तराणां परा स्थितिः पल्योपमं भवति ॥

ज्योतिष्काणामधिकम् ॥ ४८ ॥

ज्योतिष्काणां देवानामधिकं पल्योपमं परा स्थितिर्भवति ॥

ग्रहाणामेकम्† ॥ ४९ ॥

ग्रहाणामेकं पल्योपमं परा स्थितिर्भवति ॥

नक्षत्राणामर्धम् ॥ ५० ॥

नक्षत्राणां देवानां पल्योपमार्धं‡ परा स्थितिर्भवति ॥

तारकाणां चतुर्भागः ॥ ५१ ॥

तारकाणां च§ पल्योपमचतुर्भागः परा स्थितिः ॥

---

* D adds भवनवासिदेववत् ।

† D ग्रहाणामेकं ।

‡ D अर्धपल्योपमं ।

§ D omits.

जघन्या त्वष्टभागः ॥ ५२ ॥

तारकाणां तु जघन्या स्थितिः पल्योपमाष्टभागः ॥

चतुर्भागः शेषाणाम् ॥ ५३ ॥

तारकाभ्यः शेषाणां ज्योतिष्काणां चतुर्भागः पल्योपमस्या-
5 परा स्थितिः ॥

इति तत्त्वार्थाधिगमाख्ये ऽर्हत्प्रवचनसङ्ग्रहे देवगतिप्रदर्शनो
नाम चतुर्थो ऽध्यायः समाप्तः ॥

अथ पञ्चमोऽध्यायः ॥

उक्ता जीवाः । अजीवान्वक्ष्यामः ॥

अजीवकाया धर्माधर्माकाशपुद्गलाः ॥ १ ॥

धर्मास्तिकायो ऽधर्मास्तिकाय आकाशास्तिकायः पुद्गलास्तिकाय इत्यजीवकायाः । तान् लक्षणतः परस्ताद्वक्ष्यामः । काय*ग्रहणं प्रदेशावयवबहुत्वार्थमद्धासमयप्रतिषेधार्थं च ॥

द्रव्याणि जीवाश्च ॥ २ ॥

†एते धर्मादयश्चत्वारो प्राणिनश्‡ पञ्च द्रव्याणि च§ भवन्तीति । उक्तं हि मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु सर्वद्रव्यपर्यायेषु केवलस्येति [I. 27. 30] ॥

नित्यावस्थितान्यरूपाणि॥ ॥ ३ ॥

एतानि द्रव्याणि नित्यानि भवन्ति । तद्भावाव्ययं नित्यमिति¶ [V. 31] वक्ष्यते** ॥ अवस्थितानि च††। न हि कदाचित्पञ्चत्वं भूतार्थत्वं‡‡ च व्यभिचरन्ति ॥ अरूपाणि च। नैषां रूपमस्तीति। रूपं मूर्तिर्मूर्त्याश्रयाश्च स्पर्शादय इति ॥

---

* B कायसंग्रहणं। † D adds ये। ‡ C जीवाश्च।
§ D omits. || Var. S अरूपीणि। ¶ S adds च।
** B वक्ष्यति। †† C omits. ‡‡ D भूतार्थं।

रूपिणः पुद्गलाः ॥ ४ ॥

पुद्गला एव रूपिणो भवन्ति। रूपमेषामस्त्येषु वास्तीति रूपिणः ॥

*आकाशादेकद्रव्याणि ॥ ५ ॥

आ आकाशाद्धर्मादीन्येकद्रव्याण्येव भवन्ति। पुद्गलाजीवास्त्वनेकद्रव्याणीति ॥

निष्क्रियाणि च† ॥ ६ ॥

आ आकाशादेव धर्मादीनि निष्क्रियाणि भवन्ति। पुद्गलजीवास्तु क्रियावन्तः। क्रियेति गतिकर्माह[1] ॥

---

* K B आ आकाशा०। † B पुद्गला।

‡ All except D. P. निःक्रि०।

---

१ While commenting on this Sûtra S. says तथा चावश्यकसिद्धान्तह्रदयेन विशेषावश्यककारेण नमस्कारनिर्युक्तौ ज्ञानक्रियात्मकप्रतिपादनेऽप्युक्तत्वात् and then quotes three verses उवगाहणादयो, &c. In passing I may state that Professor Jacobi (Sacred Books of the East, XXII., p. 268) and Dr. Klatt (Specimen of Jain Onomasticon, p. 14), are mistaken in supposing that सिद्धान्तह्रदय is the name of a book in which जिनभद्रगणिक्षमाश्रमण says that knowledge and intuition functionate alternately. आवश्यकसिद्धान्तह्रदय is an attribute of जिनभद्रगणि meaning सिद्धान्तवादी. The name of the book, in which the opinion of सिद्धसेनदिवाकर is dissented from, is विशेषणवती ॥

अत्राह । उक्तं भवता प्रदेशावयववद्द्रव्यं कायसंज्ञमिति । तस्मात्क* एषां† धर्मादीनां प्रदेशावयवनियम इति । अत्रोच्यते । सर्वेषां प्रदेशाः[१] सन्त्यन्यच‡ परमाणोः । अवयवास्तु[२] स्कन्धानामेव । वक्ष्यते द्व्यणुकः स्कन्धाश्च संघातभेदेभ्य उत्पद्यन्त इति [V. 25. 26] ॥ तच्च 5

असंख्येयाः प्रदेशा धर्माधर्मयोः ॥ ७ ॥

प्रदेशो नामापेक्षिकः सर्वसूक्ष्मस्तु§ परमाणोरवगाह इति ॥

जीवस्य च ॥ ८ ॥

एकजीवस्य चासंख्येयाः प्रदेशा भवन्तीति ॥

आकाशस्यानन्ताः ॥ ९ ॥ 10

लोकालोकाकाशस्यानन्ताः प्रदेशाः । लोकाकाशस्य तु धर्माधर्मैकजीवैस्तुल्याः ॥

संख्येयासंख्येयाश्च पुद्गलानाम् ॥ १० ॥

संख्येया असंख्येया अनन्ताश्च पुद्गलानां प्रदेशा भवन्ति । अनन्ता इति वर्तते ॥ 15

---

* B तत्क। † C एष। ‡ C अन्य पर०। § D सर्वसूक्ष्मस्य।

---

१ S ये न जातुचिदस्त्यतिरेकेणोपलभ्यन्ते ते प्रदेशाः । ये तु विप्रकलिताः परिकलितमूर्तयः प्रज्ञापथमवतरन्ति ते ऽवयवा इत्यादि विशेषः ॥

२ S धर्माधर्माकाशजीवानां न सन्त्यवयवाः ॥

नाणोः ॥ ११ ॥

अणोः प्रदेशा न भवन्ति*। अनादिरमध्योऽप्रदेशो हि परमाणुः ॥

लोकाकाशेऽवगाहः ॥ १२ ॥

अवगाहिनामवगाहो लोकाकाशे भवति ॥

धर्माधर्मयोः कृत्स्ने ॥ १३ ॥

धर्माधर्मयोः कृत्स्ने लोकाकाशेऽवगाहो भवतीति ॥

एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥ १४ ॥

अप्रदेशसङ्ख्येयासङ्ख्येयानन्तप्रदेशानां पुद्गलानामेकादिष्वाकाशप्रदेशेषु भाज्योऽवगाहः। भाज्यो विभाज्यो विकल्प इत्यनर्थान्तरम्। तद्यथा। परमाणोरेकस्मिन्नेव प्रदेशे। द्व्यणुकस्यैकस्मिन् द्वयोश्च। त्र्यणुकस्यैकस्मिन् द्वयोस्त्रिषु च। एवं चतुरणुकादीनां सङ्ख्येयासङ्ख्येयप्रदेशस्यैकादिषु सङ्ख्येयेष्वसङ्ख्येयेषु च। अनन्तप्रदेशस्य च ॥

असङ्ख्येयभागादिषु जीवानाम् ॥ १५ ॥

लोकाकाशप्रदेशानामसङ्ख्येयभागादिषु जीवानामवगाहो भवति। आ सर्वलोकादिति ॥

अत्राह। को हेतुरसङ्ख्येयभागादिषु जीवानामवगाहो भवतीति। अत्रोच्यते

---

* D सन्ति। † D एकप्रदेशादिष।

प्रदेशसंहारविसर्गाभ्यां प्रदीपवत् ॥ १६ ॥

जीवस्य हि प्रदेशानां संहारविसर्गावित्यौ प्रदीपस्येव । तद्यथा । तैलवर्त्यग्न्युपादानप्रवृद्धः प्रदीपो महतीमपि कूटागा*-रशालां प्रकाशयत्यल्पीमपि माणिकावृतः माणिकां द्रोणावृतो द्रोणमाढकावृतश्चाढकं प्रस्थावृतः प्रस्थं पाणावृतो पाणिमिति । एवमेव प्रदेशानां संहारविसर्गाभ्यां जीवो महान्तमणुं वा पञ्च-विधं शरीरस्कन्धं धर्माधर्माकाशपुद्गलजीवप्रदेशसमुदायं† व्याप्नो-तीत्यवगाहत इत्यर्थः । धर्माधर्माकाशजीवानां परस्परेण पुद्गलेषु च वृत्तिर्न विरुध्यते ऽमूर्तत्वात् ॥

अत्राह । सति प्रदेशसंहारविसर्गसंभवे कस्मादसङ्ख्येयभागा-दिषु जीवानामवगाहो भवति नैकप्रदेशादिष्विति । अत्रोच्यते । सयोगत्वात्संसारिणां चरमशरीरत्रिभागहीनावगाहित्वाच्च सिद्धा-नामिति ॥

अत्राह । उक्तं भवता धर्मादीनस्तिकायान् परस्परलक्षणतो वक्ष्याम इति [V. 1] । तत्किमेषां लक्षणमिति । अत्रोच्यते

गतिस्थित्युपग्रहो‡ धर्माधर्मयोरुपकारः ॥ १७ ॥

गतिमतां गतेः स्थितिमतां च स्थितेरुपग्रहो धर्माधर्मयो-रुपकारो यथासङ्ख्यम् । उपग्रहो निमित्तमपेक्षा कारणं हेतु-रित्यनर्थान्तरम् । उपकारः प्रयोजनं गुणो ऽर्थ इत्यनर्थान्तरम्§ ॥

---

* B कूटाकार । † A. B समुदयं ।
‡ D उपपद्यो । § C omits this clause.

आकाशस्यावगाहः ॥ १८ ॥

अवगाहिनां धर्माधर्मपुद्गलजीवानामवगाह आकाशस्योपकारः। धर्माधर्मयोरन्तःप्रवेशसंभवेन पुद्गलजीवानां संयोगविभागैश्चेति ॥

शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् ॥ १९ ॥

पञ्चविधानि शरीराण्यौदारिकादीनि वाङ्मनः प्राणापानाविति पुद्गलानामुपकारः। तच्च शरीराणि यथोक्तानि [II. 37]। प्राणापानौ च नामकर्मणि व्याख्यातौ [IVII. 10]। द्वीन्द्रियादयो जिह्वेन्द्रिय*योगाद्भाषालेन गृह्णन्ति नान्ये। संज्ञिनश्च मनस्केन गृह्णन्ति नान्य इति। वक्ष्यते हि सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्त इति [VIII. 2] ॥

किं चान्यत्

सुखदुःखजीवितमरणोपग्रहाश्च ॥ २० ॥

सुखोपग्रहो दुःखोपग्रहो जीवितोपग्रहो मरणोपग्रहश्चेति पुद्गलानामुपकारः। तद्यथा। इष्टाः स्पर्शरसगन्धवर्णशब्दाः सुखस्योपकारः। अनिष्टा दुःखस्य। स्नानाच्छादनानुलेपन†भोजनादीनि विधिप्रयुक्तानि जीवितस्यानपवर्तनं चायुष्कस्य। विषशस्त्राग्न्यादीनि मरणस्यापवर्तनं चायुष्कस्य ॥

---

* C °संयोगा°। † D अनुलेपनापानभोजनादीनि।

---

१ S चशब्दादन्तःप्रवेशसंभवेनोपकारः संयोगविभागैश्चेति योजनीयम् ॥

अत्राह । उपपन्नं तावदेतत्सोपक्रमाणामपवर्तनीयायुषाम् । अथानपवर्त्यायुषां कथमिति । अत्रोच्यते । तेषामपि जीवितमरणोपग्रहः पुद्गलानामुपकारः । कथमिति चेदुच्यते । कर्मणः स्थितिक्षयाभ्याम् । कर्म हि पौद्गलमिति* । आहारश्च त्रिविधः[१] सर्वेषामेवोपकुरुते । किंकारणम् । शरीरस्थित्युपचयबलवृद्धिप्रीत्यर्थं ह्याहार इति ॥

अथाह । यष्टीमस्तावद्धर्माधर्माकाशपुद्गला जीवद्रव्याणामुपकुर्वन्तीति । अथ जीवानां क उपकार इति । अत्रोच्यते

परस्परोपग्रहो जीवानाम् ॥ २१ ॥

परस्परस्य हिताहितोपदेशाभ्यामुपग्रहो जीवानामिति ।

अत्राह । अथ कालस्योपकारः क इति । अत्रोच्यते

वर्तना परिणामः क्रिया परत्वापरत्वे च कालस्य[२] ॥ २२ ॥

तद्यथा । सर्वभावानां वर्तना† कालाश्रया वृत्तिः । वर्तना

---

* C पुद्गलस्य । † H वर्तमानकाला ।

---

१ S ओजोलोमप्रक्षेपलक्षणादिस्त्रिविधः । सर्वेषामित्यनेन संसारिणः परिगृह्यन्ते बाऽल्पमधिकृत्येदमुक्तम् ॥

२ S अत्र केचिदाचक्षते विरोधासंभवाद्वर्तनादिपदत्रयसमासः । अपरे पुनरसमस्तान्येवाधियते परत्वापरत्वयोः पुनः समास एवान्योन्यापेक्षत्वात् ॥

उत्पत्तिः स्थितिः* प्रथमसमयाश्रया इत्यर्थः ॥ परिणामो द्विविधः । अनादिरादिमांश्च । तं परस्तादक्ष्यामः [V. 42.] ॥ क्रिया गतिः । सा त्रिविधा । †प्रयोगगतिर्विस्रसागतिर्मिश्रिकेति ॥ परत्वापरत्वे‡ त्रिविधे प्रशंसाकृते क्षेत्रकृते कालकृते इति । तत्र प्रशंसाकृते परो धर्मः परं§ ज्ञानं§ अपरो§ धर्मः§ अपरमज्ञानमिति । क्षेत्रकृते एकदिक्कालावस्थितयोर्विप्रकृष्टः परो भवति सन्निकृष्टो ऽपरः । कालकृते द्विरष्टवर्षादूर्ध्वगतिकः परो भवति वर्षगतिकाद्द्विरष्टवर्षो॥ ऽपरो भवति ॥ तदेवं प्रशंसाक्षेत्रकृते परत्वापरत्वे वर्जयित्वा वर्तनादीनि कालकृतानि कालस्योपकार इति ॥

अत्राह । उक्तं भवता शरीरादीनि पुद्गलानामुपकार इति । पुद्गलानिति¶ च तन्त्रान्तरीया[1] जीवान्परिभाषन्ते । स्वर्गादिरहितास्त्वन्ये** । तत्कथमेतदिति । अत्रोच्यते । एतदादिविप्रतिपत्तिप्रतिषेधार्थं विशेषवचनविवक्षया चेदमुच्यते ॥

---

* B. K. omit स्थितिः । H has अधिगतिः for स्थितिः which is the reading in S.

† D विस्रसागतिर्मिश्रकेति ।

‡ K परापरत्वे and here and hereafter.

§ S interchanges.

॥ D द्विरष्टवर्षा ।

¶ D पुद्गला इति ।

** D adds इति प्रत्यन्तरे ।

---

१ S मायासूत्रवीयाः Bauddhas.

स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥ २३ ॥

स्पर्शः रसः गन्धः वर्ण इत्येवंलक्षणाः पुद्गला भवन्ति । तत्र स्पर्शो ऽष्टविधः कठिनो मृदुर्गुरुर्लघुः शीत उष्णः स्निग्धः रूक्ष इति । रसः पञ्चविधस्तिक्तः कटुः* कषायो ऽम्लो मधुर इति । गन्धो द्विविधः सुरभिरसुरभिश्च । वर्णः पञ्चविधः कृष्णो नीलो लोहितः पीतः शुक्ल इति ॥

किं चान्यत्

शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छाया-तपोद्योतवन्तश्च ॥ २४ ॥

तत्र शब्दः षड्विधः ततो विततो घनः शुषिरो घर्षो भाषा† इति ॥ बन्धस्त्रिविधः । प्रयोगबन्धो विस्रसाबन्धो मिश्र इति । स्निग्धरूक्षत्वाद्भवतीति वक्ष्यते [V. 32.] ॥ सौक्ष्म्यं द्विविधमन्त्यमापेक्षिकं च । अन्त्यं परमाणुष्वेव । आपेक्षिकं‡ द्व्यणुकादिषु संघातपरिणामापेक्षं भवति । तद्यथा । आमलकाद्बदरमिति ॥ स्थौल्यमपि द्विविधमन्त्यमापेक्षिकं च । संघातपरिणामापेक्षमेव भवति । तत्रान्त्यं सर्वलोकव्यापिनि महास्कन्धे भवति । आपेक्षिकं बदरादिभ्य आमलकादिष्विति ॥ संस्थानमनेकविधम् । दीर्घह्रस्वादिनित्यत्व[१]पर्यन्तम् ॥ भेदः पञ्चविधः ।

---

* K कटुकः । † D भाष्य । ‡ C adds च ।

---

१ S निरूपयितुं यन्न शक्यं तदनित्यं तद्भावो ऽनित्यत्वं तत्पर्यन्तमनेकधा संस्थानमिति ॥

औत्कारिकः चौर्णिकः खण्डः प्रतरः अनुतट[1]* इति ॥ तमस्छायातपोद्योताश्च परिणामजाः॥ सर्व एवैते स्पर्शादयः पुद्गलेष्वेव भवन्तीति । अतः पुद्गलास्तदन्तः ॥

अचाह । किमर्थं स्पर्शादीनां शब्दादीनां च पृथक्सूत्रकरणमिति । अचोच्यते । स्पर्शादयः परमाणुषु स्कन्धेषु च परिणामजा एव भवन्तीति । शब्दादयस्तु स्कन्धेष्वेव भवन्त्यनेकनिमित्तास्येत्यतः पृथक्करणम् ॥

त एते पुद्गलाः समासतो द्विविधा भवन्ति । तद्यथा

अणवः स्कन्धाश्च ॥ २५ ॥

उक्तं च

कारणमेवा[†] तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च ॥ इति ।

तचाणवोऽबद्धाः स्कन्धास्तु बद्धा एव[‡]॥

अचाह । कथं पुनरेतद्द्वैविध्यं भवतीति । अचोच्यते । स्कन्धास्तावत्

संघातभेदेभ्य उत्पद्यन्ते ॥ २६ ॥

संघातात्भेदात्संघातभेदादिति । एभ्यस्त्रिभ्यः कारणेभ्यः

---

* K B D अनुचटः अनुवटः । † D कारणमच ।
‡ D स्कन्धाच ।

---

१ S अनुतटभेदस्तु वंशेक्षुयष्टिवगुत्पाटनम् ॥

स्कन्धा उत्पद्यन्ते द्विप्रदेशादयः । तद्यथा । द्वयोः परमाण्वोः संघाताद्द्विप्रदेशः । द्विप्रदेशस्याणोश्च संघातात्त्रिप्रदेशः । एवं सङ्ख्येयानामसङ्ख्येयानामनन्तामनन्तानन्तानां* च प्रदेशानां संघातात्तावत्प्रदेशाः ॥ एषामेव भेदाद्द्विप्रदेशपर्यन्ताः ॥ एत एव† संघातभेदाभ्यामेकसामयिकाभ्यां‡ द्विप्रदेशादयः स्कन्धा उत्पद्यन्ते । अन्यस्य संघातेनान्यतो भेदेनेति ॥

अत्राह । अथ परमाणुः कथमुत्पद्यत इति । अत्रोच्यते ।

भेदादणुः ॥ २७ ॥

भेदादेव परमाणुरुत्पद्यते न संघातादिति ॥

भेदसंघाताभ्यां चाक्षुषाः ॥ २८ ॥

भेदसंघाताभ्यां चाक्षुषाः स्कन्धा उत्पद्यन्ते । अचाक्षुषास्तु यथोक्तात्संघाताद्भेदात्संघातभेदाच्चेति ॥

अत्राह । धर्मादीनि सन्तीति कथं गृह्यत इति । अत्रोच्यते । लक्षणतः ॥

§किं च सतो लक्षणमिति । अत्रोच्यते ।

उत्पादव्ययध्रौव्ययुक्तं सत् ॥ २९ ॥

उत्पादव्ययौ ध्रौव्यं च युक्तं सतो लक्षणम्‖ । यदुत्पद्यते

---

* K B अनन्तामानन्तानाम् ।

† C त एव च ।

‡ Var S एकसमयिकाभ्यां ।

§ B adds अत्राह ।

‖ C has उत्पादव्ययाभ्यां ध्रौव्येण च युक्तं सतो लक्षणम् ॥

यद्योति यच्च ध्रुवं तत्सत्। अतोऽन्यदसदिति॥

[उत्पादव्ययौ ध्रौव्यं च सतो लक्षणम्। यदिह मनुष्यत्वादिना पर्यायेणाव्ययत* आत्मनो देवत्वादिना पर्यायेणोत्पादः। एकान्तध्रौव्ये आत्मनि तत्त्वयैकस्वभावतया-वस्थाभेदानुपपत्तेः। एवं च संसारापवर्गभेदाभावः। कल्पितत्वेऽस्य निःस्वभावतयानुपलब्धिप्रसङ्गात्। सत्स्वभावत्वे त्वेकान्त-ध्रौव्याभावरूपत्वेव तथाभवनादिति। तत्तत्स्वभावतया विरो-धाभावात्तथोपलब्धिसिद्धेः। तद्भ्रान्तत्वे प्रमाणाभावः। योगि-ज्ञानप्रमाणाभ्युपगमे त्वभ्रान्तस्तदवस्थाभेदः। इत्थं चैतत् अन्यथा न मनुष्यादेर्देवत्वादीति एवं यमादिपालनानर्थक्यम्। एवं च सति अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः शौचसंतोषतपः-स्वाध्यायेश्वरप्रणिधानानि नियमा इति आगमवचनं वचन-मात्रम्। एवमेकान्ताध्रौव्येऽपि सर्वथा तदभावापत्तेः। तत्त्वतो हेतुकत्वमेवावस्थान्तरमिति सर्वदा तद्भावाभावप्रसङ्गः अहेतु-कत्वाविशेषात्। न हेतुस्वभावतयोर्ध्वं तद्भावः तत्स्वभावतयैका-न्तेन ध्रौव्यसिद्धेः। यदा हि हेतोरेवासौ स्वभावो यत्तदनन्तरं तद्भावस्तदा ध्रुवोऽन्वयस्तस्यैव तथाभवनात्। एवं च तुल्यो-त्पादनामावद्धेतुफलयोर्युगपद्व्ययोत्पादसिद्धिरन्यथा तत्तद्व्यति-रिक्तेतरविकल्पाभ्यामयोगात्। तच्च। मनुष्यादेर्देवत्वमित्यायातं मार्गवैफल्यमागमस्येति एवं सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्वाग् सम्यग्मार्गः सम्यगार्जवः सम्यग्व्यायामः सम्यक्स्मृतिः सम्यक्स-

* D पर्यायेणाव्ययत।

माधिरिति वाग्वैचर्थ्यम्। एवं घटव्ययवत्या मृदः कपालो-त्पादभावात् उत्पादव्ययध्रौव्ययुक्तं सदिति। एकान्तध्रौव्ये तत्त्वैकस्वभावतयावस्थाभेदानुपपत्तेः। समानं पूर्वेण। एवमेत-द्व्यवहारतः तथा मनुष्यादिस्थितिद्रव्यमधिकृत्य दर्शितम्। निश्चयतस्तु प्रतिसमयमुत्पादादिमत्तथा भेदसिद्धेः। अन्यथा तदयोगात्। यथाह*।

सर्वव्यक्तिषु नियतं क्षणे क्षणे ऽन्यत्वमथ च न विशेषः।
सत्योस्त्रित्यपचित्योराकृतिजातिव्यवस्थानात् ॥ १ ॥
नरकादिगतिविभेदो भेदः संसारमोक्षयोस्त्वेव।
हिंसादिहेतुः सम्यक्त्वादिश्च मुख्य इति ॥ २ ॥
उत्पादादियुते खलु वस्तुन्येतदुपपद्यते सर्वम्।
तद्रहिते तदभावात् सर्वमपि न युज्यते नीत्या ॥ ३ ॥
निरुपादानो न भवत्युत्पादो नापि तादवस्थ्ये ऽस्य।
तद्विक्रियापि तथा चिन्तयितुं ऽस्मिन् भवत्येषः ॥ ४ ॥
सिद्धसेनोत्पादो व्ययो ऽस्य संसारभावतः ज्ञेयः।
जीवत्वेन ध्रौव्यं चिन्तयितुं सर्वमेवं तु ॥ ५ ॥

(1D H एतच्च भाष्यं हरिभद्रवृत्तौ व्याख्यातमस्ति न च सिद्धसेनीयायामिति) तदित्थं उत्पादव्ययौ ध्रौव्यं चैतच्चित्तय-

* H यदाह। † D निरुपादो न भवति।

The Manuscript D has the following marginal notes.

१ D एतत्सूत्रस्य द्विधा भाष्यपाठः। एक "उत्पादव्ययौ ध्रौव्यं चैतच्चिंतययुक्तमित्यादिरयं च सिद्धसेनीयवृत्तौ व्याख्यातः"। द्वितीयस्तु

युक्तं सतो लक्षणं । अथवा युक्तं समाहितं चित्रभावं सत् । यदुत्पद्यते यद्द्योति यच्च ध्रुवं तत्सत् अतो ऽन्यदसदिति ॥]

अत्राह । गृहीतमस्तावदेवंलक्षणं सदिति । इदं तु वाच्यं तत्किं नित्यमाहोस्विदनित्यमिति । अत्रोच्यते ।

तद्भावाव्ययं नित्यम् ॥ ३० ॥

अतद्भावाद्यन्न व्येति न व्येष्यति* तन्नित्यमिति ॥

अर्पितानर्पितसिद्धेः ॥ ३१ ॥

सच्च† त्रिविधमपि नित्यं चोभे[१] अपि अर्पितानर्पितसिद्धेः । अर्पितं व्यावहारिकमनर्पितमव्यावहारिकं चेत्यर्थः । तच्च§ चतुर्विधम् । तद्यथा । द्रव्यास्तिकं मातृकापदास्तिकमुत्पन्नास्तिकं पर्यायास्तिकमिति । एषामर्थपदानि द्रव्यं वा द्रव्ये वा द्रव्याणि वा सत् । अस्माभिर्नास्त्येव द्रव्यास्तिकस्य ॥ मातृकापदास्तिकस्यापि । मातृकापदं वा मातृकापदे वा मातृकापदानि वा सत् । अमातृकापदं वा अमातृकापदे वा

---

* B विनश्यति । † B K तच्च, D तच्च त्रिविधमपि सत् ।
‡ K व्यवहारिकं । § D तच ।

"उत्पादव्ययौ ध्रौव्यं च सतो लक्षणं यदिहेत्यादिरयं च हारिभद्रवृत्तौ व्याख्यातः ।

H The Commentary begins : — उत्पादव्ययध्रौव्ययुक्तं सदिति सूत्रं उत्पादादिमदेव सदिति सूत्रसमुदायार्थः अवयवार्थं त्वाह यदिहेत्यादिना प्रवचनगर्भसूत्रमेतदिति ।

---

१ S उभे अपि उत्पादव्ययध्रौव्ययुक्तं सद् तद्भावाव्ययं नित्यं चोभयसूत्रोक्तमपि ॥

अमाट्टकापदानि वा असत्॥ उत्पन्नास्तिकस्य। उत्पन्नं वोत्पन्ने वोत्पन्नानि वा सत्। अनुत्पन्नं वानुत्पन्ने वानुत्पन्नानि वासत्॥ अर्पिते ऽनुपनीते न वाच्यं सदित्यसदिति वा। पर्यायास्तिकस्य सद्भावपर्याये वा सद्भावपर्याययोर्वा सद्भावपर्यायेषु वा आदिष्टं द्रव्यं वा द्रव्ये वा द्रव्याणि वा सत्। असद्भावपर्याये वा असद्भावपर्याययोर्वा असद्भावपर्यायेषु वा आदिष्टं द्रव्यं वा द्रव्ये वा द्रव्याणि वासत्। तदुभयपर्याये वा तदुभयपर्याययोर्वा तदुभयपर्यायेषु वा आदिष्टं द्रव्यं वा द्रव्ये वा द्रव्याणि वा न वाच्यं सदित्यसदिति वा। देशादेशेन विकल्पयितव्यमिति॥

अचाह। उक्तं भवता संघातभेदेभ्यः स्कन्धा उत्पद्यन्त इति। तत्किं संयोगमात्रादेव संघातो भवति। आहोस्विदस्ति* कश्चिद्विशेष इति। अचोच्यते। सति संयोगे बद्धस्य संघातो भवतीति॥

अचाह। अथ कथं बन्धो भवतीति। अचोच्यते।

स्निग्धरूक्षत्वाद्बन्धः॥ ३२॥

स्निग्धरूक्षयोः पुद्गलयोः सृष्टयोर्बन्धो भवतीति।

अचाह। किमेष एकान्त इति। अचोच्यते।

न जघन्यगुणानाम्॥ ३३॥

जघन्यगुणस्निग्धानां जघन्यगुणरूक्षाणां च परस्परेण बन्धो न भवतीति॥

* D अहोस्विदस्ति।

अत्राह। उक्तं भवता जघन्यगुणवर्जानां स्निग्धानां रूक्षेण रूक्षाणां च स्निग्धेन सह बन्धो भवतीति। अथ तुल्यगुणयोः किमत्यन्तप्रतिषेध इति। अत्रोच्यते। न जघन्यगुणानामित्यधिकृत्येदमुच्यते॥

गुणसाम्ये सदृशानाम्॥ ३४॥

गुणसाम्ये सति सदृशानां बन्धो न भवति। तद्यथा। तुल्यगुणस्निग्धस्य तुल्यगुणस्निग्धेन तुल्यगुणरूक्षस्य तुल्यगुणरूक्षेणेति।

अत्राह। सदृशग्रहणं किमपेक्षत इति। अत्रोच्यते। गुणवैषम्ये सदृशानां बन्धो भवतीति॥

अत्राह। किमविशेषेण* गुणवैषम्ये सदृशानां बन्धो भवतीति। अत्रोच्यते।

द्व्यधिकादिगुणानां तु॥ ३५॥

द्व्यधिकादिगुणानां तु सदृशानां बन्धो भवति। तद्यथा। स्निग्धस्य द्विगुणाद्यधिकस्निग्धेन। द्विगुणाद्यधिकस्निग्धस्य †स्निग्धेन। रूक्षस्यापि द्विगुणाद्यधिकरूक्षेण। द्विगुणाद्यधिकरूक्षस्य रूक्षेण। एकादिगुणाधिकयोस्तु सदृशयोर्बन्धो न भवति। अत्र तुशब्दो व्यावृत्तिविशेषणार्थः प्रतिषेधं व्यावर्तयति बन्धं च विशेषयति॥

अत्राह। परमाणुषु स्कन्धेषु च ये स्पर्शादयो गुणास्ते किं

---

* C अविशेषगुण।

† C एकगुणस्निग्धेन।

व्यवस्थितास्तेष्वाहोस्विदव्यवस्थिता इति। अत्रोच्यते। अव्यवस्थिताः। कुतः। परिणामात्॥

अत्राह। द्वयोरपि बध्यमानयोर्गुणवत्त्वे* सति कथं परिणामो भवतीति। उच्यते।

बन्धे समाधिकौ पारिणामिकौ॥ ३६॥

बन्धे सति समगुणस्य समगुणः परिणामको भवति। अधिकगुणो हीनस्येति‡॥

अत्राह। उक्तं भवता द्रव्याणि जीवाश्चेति [V. 2]। तल्किमुद्देशत§ एव द्रव्याणां प्रसिद्धिराहोस्विल्लक्षणतोऽपीति। अत्रोच्यते। लक्षणतोऽपि प्रसिद्धिः तदुच्यते—

गुणपर्यायवद् द्रव्यम्॥ ३७॥

गुणान् लक्षणतो वक्ष्यामः। भावान्तरं संज्ञान्तरं च पर्यायः। तदुभयं यच्च विद्यते तद्द्रव्यम्। गुणपर्याया अस्य सन्त्यस्मिन्वा सन्तीति गुणपर्यायवत्॥

कालश्चेत्येके॥ ३८॥

एके त्वाचार्या व्याचक्षते कालोऽपि द्रव्यमिति॥

सोऽनन्तसमयः॥ ३९॥

स चैष कालोऽनन्तसमयः। तत्रैक एव वर्तमानसमयः। अतीतानागतयोस्त्वानन्त्यम्॥

---

* D K B गुणत्वे।

‡ D हीनगुणस्येति

§ K उद्दिश्य।

अत्राह। उक्तं भवता गुणपर्यायवद्द्रव्यमिति [V. 37]। तत्र के गुणा इति। अत्रोच्यते

द्रव्याश्रया निर्गुणा गुणाः ॥ ४० ॥

द्रव्यमेषामाश्रय इति द्रव्याश्रयाः। नैषां गुणाः सन्तीति निर्गुणाः।

अत्राह। उक्तं भवता बन्धे समाधिकौ पारिणामिकौ* इति [V. 36]। तत्र कः परिणाम इति। अत्रोच्यते

तद्भावः परिणामः ॥ ४१ ॥

धर्मादीनां द्रव्याणां यथोक्तानां च गुणानां स्वभावः† स्वतत्त्वं परिणामः। स द्विविधः।

अनादिरादिमांश्च ॥ ४२ ॥

तत्रानादिररूपिषु धर्माधर्माकाशजीवेष्विति।

रूपिष्वादिमान् ॥ ४३ ॥‡

रूपिषु तु द्रव्येषु आदिमान्। परिणामोऽनेकविधः स्कन्धपरिणामादिरितिꝰ§ ॥

---

* C परि० † B स्वोः भाव D स्वाभाव।

‡ C Does not mark this and the next one as sûtras but considers this whole to be a part of ~~भाष्य of 42nd~~ sûtra.

§ B परिणामादिभिरिति।

योगोपयोगौ जीवेषु ॥ ४४ ॥

जीवेष्वरूपिष्वपि सत्सु योगोपयोगौ परिणामादिमन्तौ भवतः । तत्रोपयोगः पूर्वोक्तः [II. 19] । योगस्तु परस्ताद्वक्ष्यते [VI. 1] ॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसङ्ग्रहे
पञ्चमोऽध्यायः समाप्तः ॥

अथ षष्ठोऽध्यायः ।



अत्राह । उक्ता जीवाजीवाः । अथास्रवः क इत्यास्रव-प्रसिद्ध्यर्थमिदं प्रक्रम्यते*

कायवाङ्मनःकर्म योगः ॥ १ ॥

कायिकं कर्म वाचिकं कर्म मानसं कर्म इत्येष त्रिविधो योगो भवति । स एकशो द्विविधः । शुभश्चाशुभश्च । तत्राशुभो हिंसास्तेयाब्रह्मादीनि कायिकः । सावद्यानृतपरुषपिशुनादीनि वाचिकः । अभिध्या[१]व्यापादे[२]र्ष्यासूयादीनि मानसः† ॥ अतो विपरीतः‡ शुभ इति ॥

स आस्रवः ॥ २ ॥

स एष त्रिविधोऽपि योग आस्रवसंज्ञो भवति । शुभाशुभयोः कर्मणोरास्रवणादास्रवः सरःसलिलावाहिनिर्वाहि[३]स्रोतोवत् ॥

शुभः पुण्यस्य ॥ ३ ॥

शुभो योगः पुण्यस्यास्रवो भवति ॥

---

* DS प्रक्रियते । † C मानसिकः । ‡ D विपरीतं । § B द्विविधो ।

१ अभिध्या = coveting another's property.

२ व्यापाद = malice.

३ निर्वाहिन् = discharging.

अशुभः पापस्य ॥ ४ ॥

तच्च सद्वेद्यादि पुण्यं वक्ष्यते [VIII. 26] । शेषं पापमिति ॥

सकषायाकषाययोः साम्परायिकेर्यापथयोः ॥ ५ ॥

स एष त्रिविधो ऽपि योगः सकषायाकषाययोः साम्परायिकेर्यापथयोरास्रवो भवति यथासङ्ख्यं यथासम्भवं च । सकषायस्य योगः साम्परायिकस्य । अकषायस्येर्यापथस्यैवैकसमयस्थितेः ॥

अव्रतकषायेन्द्रियक्रियाः पञ्चचतुःपञ्चपञ्चविंशतिसङ्ख्याः पूर्वस्य भेदाः ॥ ६ ॥

पूर्वस्येति सूत्रक्रमप्रामाण्यात्साम्परायिकस्याह । साम्परायिकस्यास्रवभेदाः पञ्च चत्वारः पञ्च पञ्चविंशतिरिति भवन्ति ॥ पञ्च हिंसानृतस्तेयाब्रह्मपरिग्रहाः । प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा [VII. 8] इत्येवमाद्यो वक्ष्यन्ते ॥ चत्वारः क्रोधमानमायालोभा अनन्तानुबन्ध्यादयो वक्ष्यन्ते [VIII. 10] ॥ पञ्च प्रमत्तस्येन्द्रियाणि ॥ पञ्चविंशतिः क्रियाः । तत्रेमे क्रियाप्रत्यया यथासङ्ख्यं प्रत्येतव्याः । तद्यथा । सम्यक्त्वमिथ्यात्वप्रयोगसमादानेर्यापथाः कायाधिकरणप्रद्वेषपरितापनप्राणातिपाताः दर्शनस्पर्शनप्रत्ययसमन्तानुपातानाभोगाः स्वहस्तनिसर्गविदारणानयनानवकाङ्क्षा आरम्भपरिग्रहमायामिथ्यादर्शनाप्रत्याख्यान* क्रिया इति ॥

---

* D अप्रत्याख्यान ।

तीव्रमन्दज्ञाताज्ञातभाववीर्याधिकरणविशेषेभ्यस्तद्विशेषः ॥ ७ ॥

सांपरायिकास्रवाणां* †एषामेकोनचत्वारिंशत्सांपरायिकाणां तीव्रभावात् मन्दभावाज्ज्ञातभावादज्ञातभावा‡द्वीर्यविशेषादधिकरणविशेषाच्च विशेषो भवति । लघुर्लघुतरो लघुतमस्तीव्रस्तीव्रतरस्तीव्रतम इति । तद्विशेषाच्च बन्धविशेषो भवति ॥

अत्राह । तीव्रमन्दाद्योा भावा लोकप्रतीताः । वीर्यं च जीवस्य क्षायोपशमिकः क्षायिको वा भाव इत्युक्तम् [II. 4. 5] । अथाधिकरणं किमिति । अत्रोच्यते

अधिकरणं जीवाजीवाः ॥ ८ ॥

अधिकरणं द्विविधम् । द्रव्याधिकरणं भावाधिकरणं च । तत्र द्रव्याधिकरणं छेदनभेदनादि शस्त्रं च द्रव्यविधम् । भावाधिकरणमष्टोत्तरशतविधम् [VI. 9] । एतदुभयं जीवाधिकरणमजीवाधिकरणं च ॥ तत्र

आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमत§कषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ९ ॥

आद्यमिति सूचक्रमप्रामाण्याज्जीवाधिकरणमाह । तत्समासतस्त्रिविधम् । संरम्भः समारम्भ आरम्भ इति ॥ एतत्पुनरेकशः

---

* Some MSS. omit.

† D एषामेकोनचत्वारिंशतः ।

‡ B adds भावविशेषात् ।

§ CDS अनुमति here and throughout this सूत्र ।

कायवाङ्मनोयोगविशेषात्त्रिविधं भवति । तद्यथा । कायसंरम्भः वाक्संरम्भः मनःसंरम्भः कायसमारम्भः वाक्समारम्भः मनःसमारम्भः कायारम्भः वागारम्भः मनआरम्भ इति ॥ एतद्येकशः* कृत-कारितानुमतविशेषात्त्रिविधं भवति । तद्यथा । कृतकायसंरम्भः कारितकायसंरम्भः अनुमतकायसंरम्भः कृतवाक्संरम्भः कारितवाक्-संरम्भः अनुमतवाक्संरम्भः कृतमनःसंरम्भः कारितमनःसंरम्भः अनुमतमनःसंरम्भः । एवं समारम्भारम्भावपि ॥ तदपि पुनरेकशः कषायविशेषाच्चतुर्विधम्† । तद्यथा । क्रोधकृतकायसंरम्भः मान-कृतकायसंरम्भः मायाकृतकायसंरम्भः लोभकृतकायसंरम्भः क्रोध-कारितकायसंरम्भः मानकारितकायसंरम्भः मायाकारितकाय-संरम्भः लोभकारितकायसंरम्भः क्रोधानुमतकायसंरम्भः मानानु-मतकायसंरम्भः मायानुमतकायसंरम्भः लोभानुमतकायसंरम्भः‡ । एवं वाङ्मनोयोगाभ्यामपि§ वक्तव्यम् । तथो समारम्भारम्भौ ॥ तदेवं जीवाधिकरणं समासेनैकशः षट्त्रिंशद्विकल्पं भवति । त्रिविधमष्टोत्तरशतविकल्पं भवतीति ॥

संरम्भः सकषायः‖ परितापनया भवेत्समारम्भः ।
आरम्भः प्राणिवधः¶ त्रिविधो योगस्तेतो ज्ञेयः** ॥

अत्राह । अथाजीवाधिकरणं किमिति । अत्रोच्यते

---

* C तदप्ये० । † D adds भवति । ‡ D adds इति । § C मिति ।
‖ CD. संकल्पः । ¶ C प्राणिवधस्त्वारम्भः ।
** MSS. give this verse, but neither S or H comment on this verse, which is very strange when we remember that S mostly comments on every word of भाष्य ।

निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परम् ॥ १० ॥

परमिति सूत्रक्रमप्रामाण्यादजीवाधिकरणमाह। तत्समासतश्चतुर्विधम्। तद्यथा। निर्वर्तना निक्षेपः संयोगो निसर्ग इति ॥ तत्र **निर्वर्तनाधिकरणं** द्विविधम्। मूलगुणनिर्वर्तनाधिकरणमुत्तरगुणनिर्वर्तनाधिकरणं च। तत्र* मूलगुणनिर्वर्तना पञ्च शरीराणि वाङ्मनःप्राणापानाश्च†। उत्तरगुणनिर्वर्तना काष्ठपुस्तचित्रकर्मादीनि ॥ **निक्षेपाधिकरणं** चतुर्विधम्। तद्यथा। अप्रत्यवेक्षित‡निक्षेपाधिकरणं दुःप्रमार्जितनिक्षेपाधिकरणं सहसानिक्षेपाधिकरणमनाभोगनिक्षेपाधिकरणमिति ॥ **संयोगाधिकरणं** द्विविधम्। भक्तपानसंयोजनाधिकरणमुपकरणसंयोज§नाधिकरणं च ॥ **निसर्गाधिकरणं** त्रिविधम्। कायनिसर्गाधिकरणं वाङ्निसर्गाधिकरणं मनोनिसर्गाधिकरणमिति ॥

अत्राह। उक्तं भवता सकषायाकषाययोर्योगः साम्परायिकेर्यापथयोरास्रव इति [VI. 5]। साम्परायिकं चाष्टविधं वक्ष्यते [VI. 26]। तत् किं सर्वस्याविशिष्ट आस्रव आहोस्वित्प्रतिविशेषोऽस्तीति। अत्रोच्यते। सत्यपि योगत्वाविशेषे प्रकृतिं कृतिं प्राप्यास्रवविशेषो भवति। तद्यथा

---

* D omits. † ~~D~~ प्राणापानश्च।

‡ D अप्रत्यपेक्षित K अप्रत्यपेक्षित। § K संयोग।

तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥ ११ ॥

आस्रवो* ज्ञानस्य ज्ञानवतां ज्ञानसाधनानां च प्रदोषो निह्नवो मात्सर्यमन्तराय आसादन उपघात इति ज्ञानावरण†-स्रवा भवन्ति । एतैर्हि ज्ञानावरणं कर्म बध्यते ॥ एवमेव दर्शनावरणस्येति ॥

दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभय-स्थान्यसद्वेद्यस्य ॥ १२ ॥

दुःखं शोकस्ताप आक्रन्दनं वधः परिदेवनमित्यात्मसंस्थानि परस्थ क्रियमाणान्युभयोश्च क्रियमाणान्यसद्वेद्यस्यास्रवा भवन्तीति ॥

भूतव्रत्यनुकम्पा‡ दानं सरागसंयमादि योगः क्षान्तिः शौचमिति सद्वेद्यस्य ॥ १३ ॥

सर्वभूतानुकम्पा अगारिष्वनगारिषु च व्रतिष्वनुकम्पाविशेषो दानं सरागसंयमः संयमासंयमो ऽकामनिर्जरा बालतपो योगः[१] क्षान्तिः शौचमिति सद्वेद्यस्यास्रवा भवन्ति ॥

---

* H omits आस्रवः । † C ज्ञानावरण कर्म D ज्ञानावरणस्य । ‡ K जसभूत ।

---

१ S योग = लोकाभिमतनिरवद्यक्रियानुष्ठानं योगः दण्डभावनिवृत्त्यर्थं योगाभिधानम् ॥

केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य ॥१४॥

भगवतां परमर्षीणां केवलिनामर्हत्प्रोक्तस्य* च साङ्गोपाङ्गस्य श्रुतस्य चातुर्वर्ण्यस्य सङ्घस्य पञ्चमहाव्रतसाधनस्य† धर्मस्य चतुर्विधानां च देवानामवर्णवादो दर्शनमोहस्यास्रवा‡ इति ॥

कषायोदयात्तीव्रात्मपरिणामश्चारित्रमोहस्य ॥ १५ ॥

कषायोदयात्तीव्रात्मपरिणाम§श्चारित्रमोहस्यास्रवो भवति ॥

बह्वारम्भपरिग्रहत्वं च नारकस्यायुषः ॥ १६ ॥

बह्वारम्भता बह्वपरिग्रहता च नारकस्यायुष आस्रवो भवति ॥

माया तैर्यग्योनस्य ॥ १७ ॥

माया तैर्यग्योनस्यायुष आस्रवो भवति ॥

अल्पारम्भपरिग्रहत्वं स्वभावमार्दवार्जवं॥ च मानुषस्य ॥ १८ ॥

अल्पारम्भपरिग्रहत्वं स्वभावमार्दवार्जवं¶ च मानुषस्यायुष आस्रवो भवति ॥

---

* K adds वचनस्य।

† B साधकस्य K श्रावकस्य।

‡ D आस्रव।

§ D तीव्र आत्मपरिणामः।

॥ C ०र्जवत्वं।

¶ D स्वभावमार्दवं स्वभावार्जवं।

निःशीलव्रतत्वं च सर्वेषाम् ॥ १९ ॥

निःशीलव्रतत्वं च सर्वेषां नारकतैर्यग्योनमानुषाणामायुषा*-मास्रवो भवति । यथोक्तानि च ।

अथ दैवस्यायुषः क आस्रव इति । अत्रोच्यते

सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य ॥ २० ॥

संयमो विरतिर्व्रतमित्यनर्थान्तरम् । हिंसानृतस्तेयाब्रह्म-परिग्रहेभ्यो विरतिर्व्रतमिति [VII. 1] वक्ष्यते ॥ संयमासंयमो देशविरतिरणुव्रतमित्यनर्थान्तरम् । देशसर्वतो ऽणुमहती [VII.2] इत्यपि† वक्ष्यते‡ ॥ अकामनिर्जरा परापीडनतयानुरोधाच्चा-कुशलनिवृत्तिराहारादिनिरोधश्च ॥ बालतपः । बालो मूढ इत्यनर्थान्तरम् तस्य तपो बालतपः । तच्चाग्निप्रवेशमरुत्प्रपात-जलप्रवेशादि ॥ तदेवं सरागसंयमः संयमासंयमादीनि च॥ दैवस्यायुष आस्रवा भवन्तीति ॥

¶अथ नाम्नः क आस्रव इति । अत्रोच्यते

योगवक्रता विसंवादनं चाशुभस्य नाम्नः ॥ २१ ॥

कायवाङ्मनोयोगवक्रता विसंवादनं चाशुभस्य नाम्न आस्रवो भवतीति ॥

---

* DS तिर्यग्योनमानुषाणामायुषा ।
† D omits अपि ।
‡ K वक्ष्यति ।
§ B निरोधाच्च for अनुरोधाच्च ।
|| C सम्यक्त्वं च ।
¶ HDC add अथाह ।

विपरीतं शुभस्य ॥ २२ ॥

एतदुभयं विपरीतं शुभस्य नाम्न आस्रवो भवतीति ॥

किं चान्यत्

दर्शनविशुद्धिर्विनयसंपन्नता शीलव्रतेष्वनतिचारो ऽभीक्ष्णं ज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी सङ्घ-साधुसमाधिवैयावृत्यकरणमर्हदाचार्यबहुश्रुतप्रवचन-भक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सल-त्वमिति तीर्थकृत्त्वस्य ॥ २३ ॥

परमप्रकृष्टा दर्शनविशुद्धिः। विनयसंपन्नता च। शील-व्रतेष्वात्यन्तिको ऽगममप्रमादो ऽनतिचारः। अभीक्ष्णं ज्ञानोप-योगः संवेगश्च। यथाशक्ति*त्यागस्तपश्च। सङ्घस्य साधूनां च समाधिवैयावृत्यकरणम्[1]। अर्हत्याचार्येषु बहुश्रुतेषु प्रवचने च परमभावविशुद्धियुक्ता भक्तिः। सामायिकादीनामावश्यकानां भावतो ऽनुष्ठानस्यापरिहाणिः। सम्यग्दर्शनादेर्मोक्षमार्गस्य निह्नव मानं करणोपदेशाभ्यां प्रभावना। अर्हच्छासनानुष्ठायिनां श्रुतधराणां† बालवृद्धतपस्विशैक्ष्यग्लानादीनां च सङ्गृहोपग्रहानु-ग्रहकारित्वं प्रवचनवत्सलत्वमिति। एते गुणाः समस्ता व्यस्ता वा तीर्थकरनाम्न आस्रवा भवन्तीति ॥

---

* D यथाशक्तितस्त्यागः। † B श्रुतपराणां। ‡ D तपस्विनां शैक्षकग्लानादीनां।

---

१ S संघस्य समाधिकरणम्। साधूनां वैयावृत्यकरणम्। or समाधि and वैयावृत्य to be applied to both.

परात्मनिन्दाप्रशंसे सदसद्गुणाच्छादनोद्भावने च नीचैर्गोत्रस्य ॥ २४ ॥

परनिन्दात्मप्रशंसा सद्गुणाच्छादनमसद्गुणोद्भावनं* चात्मपरोभयस्य नीचैर्गोत्रस्यास्रवा भवन्ति ॥

तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥ २५ ॥

उत्तरस्येति सूत्रक्रमप्रामाण्यादुच्चैर्गोत्रस्याह । नीचैर्गोत्रास्रवविपर्ययो नीचैर्वृत्तिरनुत्सेक[1]श्चोच्चैर्गोत्रस्यास्रवा भवन्ति ॥

विघ्नकरणमन्तरायस्य ॥ २६ ॥

दानादीनां विघ्नकरणमन्तरायस्यास्रवो भवतीति । एते सामान्याधिकृत्याष्टविधस्य पृथक् पृथगास्रवविशेषा भवन्तीति ॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसङ्ग्रहे
भाष्यतः षष्ठोऽध्यायः समाप्तः ॥

---

* B adds तच्च ।

१ S नीचैर्वर्तनं विनयप्रवणवाक्कायचित्तता । उत्सेको गर्वः । वृत्ति = respectful treatment.

अथ सप्तमोऽध्यायः ।



अत्राह । उक्तं भवता सद्वेद्यस्यास्रवेषु भूतव्रत्यनुकम्पेति [VI. 13] । तच्च किं व्रतं को वा व्रतीति । अत्रोच्यते

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥ १ ॥

हिंसाया अनृतवचनात्स्तेयादब्रह्मतः परिग्रहाच्च कायवाङ्मनोभिर्विरतिर्व्रतम् । विरतिर्नाम ज्ञात्वाभ्युपेत्याकरणम् । अकरणं निवृत्तिरूपरमो विरतिरित्यनर्थान्तरम् ॥

देशसर्वतो ऽणुमहती ॥ २ ॥

एभ्यो हिंसादिभ्य एकदेशविरतिरणुव्रतं सर्वतो विरतिर्महाव्रतमिति ॥

तत्स्थैर्यार्थं भावनाः पञ्च पञ्च* ॥ ३ ॥

तस्य पञ्चविधस्य व्रतस्य स्थैर्यार्थमेकैकस्य पञ्च पञ्च भावना भवन्ति । तद्यथा । अहिंसायास्तावदीर्यासमितिर्मनोगुप्तिरेषणासमितिरादाननिक्षेपणासमितिरालोकितपानभोजनमिति ॥

---

* Var. S. पञ्चमः पञ्च ।

सत्यवचनस्यानुवीचि*भाषणं क्रोधप्रत्याख्यानं लोभप्रत्याख्यानमभीरुत्वं हास्यप्रत्याख्यानमिति ॥ **अस्तेयस्या**नुवीच्यवग्रहयाचनमभीक्ष्णावग्रहयाचनमेतावदित्यवग्रहावधारणं समानधार्मिकेभ्योऽवग्रहयाचनमनुज्ञापितपानभोजनमिति ॥ **ब्रह्मचर्यस्य** स्त्रीपशुषण्डकसंसक्तशयनासन†वर्जनं रागसंयुक्तस्त्रीकथावर्जनं स्त्रीणां मनोहरेन्द्रियालोकन‡वर्जनं पूर्वरतानुस्मरणवर्जनं प्रणीतरसभोजनवर्जनमिति ॥ **आकिञ्चनस्य** पञ्चानामिन्द्रियार्थानां स्पर्शरसगन्धवर्णशब्दानां मनोज्ञानां प्राप्तौ गार्द्धवर्जनममनोज्ञानां प्राप्तौ द्वेषवर्जनमिति ॥ किं चान्यदिति

हिंसादिष्विहामुत्र चापायावद्यदर्शनम् ॥ ४ ॥

हिंसादिषु पञ्चस्वास्रवेष्विहामुत्र चापायदर्शनमवद्यदर्शनं च भावयेत् । तद्यथा । हिंसायास्तावत् **हिंस्रो** हि नित्योद्वेजनीयो नित्यानुबद्धवैरश्च । दृष्टैव वधबन्धपरिक्लेशादीन्प्रतिलभते प्रेत्य चाशुभां गतिं॥ गर्हितश्च भवतीति हिंसाया व्युपरमः श्रेयान् ॥ **तथानृतवाद्य**श्रद्धेयो भवति। दृष्टैव जिह्वाछेदादी¶न्प्रतिलभते मिथ्याभ्याख्यानदुःखितेभ्यश्च बद्धवैरेभ्यस्तदधिकान्दुःखहेतून्प्राप्नोति प्रेत्य चाशुभां गतिं गर्हितश्च भवतीत्यनृतवचनाद्व्युपरमः श्रेयान्॥ **तथा स्तेनः** परद्रव्यहरणप्रसक्तमतिः सर्वस्योद्वेजनीयो भवतीति**।

---

* D वीची। † C ग्रवग्रहधारणं। ‡ D ग्रण्यासन। § H ग्रालोचन।

|| Here, and in the following sentences except the last, the word प्राप्नोति seems to have been left out.

¶ SD छेदनादीनि। ** C omits इति।

दृष्टैव चाभिघातवधबन्ध*नहस्तपादकर्णनासो†त्तरौष्ठच्छेदनभेदन-सर्वस्वहरणवध्यघात‡नमारणादीन्प्रतिलभते प्रेत्य चाशुभां गतिं गर्हितश्च भवतीति स्तेयाद्व्युपरमः श्रेयान्॥ **तथाब्रह्मचारी** विभ्रमोद्भ्रान्तचित्तः विप्रकीर्णेन्द्रियो महान्धो गज इव निरङ्कुशः श्रमं नो लभते। मोहाभिभूतश्च कार्याकार्यानभिज्ञो न किंचिदकुशलं नारभते। परदाराभिगमनकृतांश्च[1] दृष्टैव वैरानुबन्धलिङ्गच्छेदनवधबन्धनद्रव्यापहारादीन्प्रतिलभते ऽपायान्प्रेत्य चाशुभां गतिं गर्हितश्च भवतीत्यब्रह्मणो व्युपरमः श्रेयानिति॥ तथा **परिग्रहवान्**§ शकुनिरिव मांसपेशीहस्तो ऽन्येषां क्रव्यादशकुनानामिहैव तस्करादीनां गम्यो भवति। अर्जनरक्षणक्षयकृतांश्च दोषान्प्राप्नोति। न चास्य तृप्तिर्भवतीन्धनैरिवाग्नेर्लोभाभिभूतत्वाच्च कार्याकार्यानपेक्षो भवति। प्रेत्य चाशुभां गतिं प्राप्नोति लुब्धो ऽयमिति च गर्हितो भवतीति परिग्रहाद्व्युपरमः श्रेयान्॥ किं चान्यत्

दुःखमेव वा॥ ५॥

दुःखमेव वा हिंसादिषु भावयेत्॥ यथा ममाप्रियं दुःखमेवं सर्वसत्त्वानामिति हिंसाया व्युपरमः श्रेयान्॥ यथा मम मिथ्याभ्याख्यानेनाभ्याख्यातस्य तीव्रं दुःखं भूतपूर्वं भवति च तथा सर्वसत्त्वानामिति अनृतवचनाद्व्युपरमः श्रेयान्॥ यथा ममेष्टद्रव्यवियोगे दुःखं भूतपूर्वं भवति च तथा सर्वसत्त्वानामिति

* D बन्ध for बन्धन। † K नासो। ‡ S वध्यपान। § D adds च।

१ कृतान् = जनितान् S.

स्रेयाद्व्युपरमः श्रेयान् ॥ तथा रागद्वेषात्मकत्वान्मैथुनं दुःखमेव । स्यादेत[1]त्स्पर्शन*सुखमिति तच्च[2] न । कुतः । व्याधिप्रतीकारत्वात्कण्डूपरिगतवच्चाबह्व्याधिप्रतीकारत्वादसुखे ह्यस्मिन्सुखाभिमानो मूढस्य । तद्यथा । तीव्रया स्वकृच्छोणितमांसानुगतया कण्ड्वा परिगतात्मा काष्ठशकलाङ्गोष्ठशर्करानखशुक्तिभिर्विच्छिन्नगात्रो रुधिराक्तः कण्डूयमानो दुःखमेव सुखमिति मन्यते । तद्वन्मैथुनोपसेवीति मैथुनाद्व्युपरमः श्रेयान् ॥ ‡तथा परिग्रहवानप्राप्तप्राप्तनष्टेषु काङ्क्षारक्षण§शोकोद्भवं दुःखमेव प्राप्नोतीति॥ परिग्रहाद्व्युपरमः श्रेयान् ।[3] इत्येवं भावयतो व्रतिनो व्रतं स्थैर्यं भवति ॥ किं चान्यत् 10

* D स्पर्श । † C शिखा for शकल ।

‡ D adds परिग्रहेषु अप्राप्तनष्टेषु कांक्षाशोकौ प्राप्तेषु च रक्षणं उपभोगे चाविद्वन्निः ।

§ K adds after रक्षण । उपभोगरोधाद्वन्निः B adds उपभोगरोधाद्वन्नि H कांक्षारक्षणोपभोगाविद्वन्निशोकोद्भवं ।

॥ C adds after प्राप्नोतीति । उपभोगे वा विद्वन्निरिति ।

१ S स्यादेतदित्यादिना ग्रन्थेनाशंकते ।

२ S तदित्यनेन स्पर्शनसुखमभिसंबध्यते ।

३ S अतः परिग्रहाद्व्युपरमः श्रेयान् इत्येवं भावयत इत्यादिना दुःखमेवेत्यस्य सूत्रस्य परिसमाप्तिमादर्शयति । ततश्च ये भाष्यमेव कथमपि बुद्ध्या सूत्रीकृत्याधीयते "व्याधिप्रतीकारत्वात्कण्डूपरिगतवच्चाब्रह्मेति । तथा परिग्रहे प्राप्तनष्टेषु कांक्षाशोकौ प्राप्तेषु च रक्षणमुपभोगेष्वविद्वन्निरिति" । तदनार्षं सूत्रकरणमिति विज्ञायते । यदि च सूत्रं स्यात्तत उपभोगे चाविद्वन्निरित्यावयवस्य विवरणं स्यात् । न चास्ति । तस्मादनार्षं सूत्रद्वयमन्तरालकमिति । एवमित्युक्तेन प्रकारेण भावयतो वासयतः स्थैर्यं व्रतिनो व्रतानां भवति ॥

मैत्रीप्रमोदकारुण्यमाध्यस्थानि सत्त्वगुणाधिकक्लिश्यमानाविनेयेषु ॥ ६ ॥

भावयेद्यथासङ्ख्यम्। **मैत्रीं*** सर्वसत्त्वेषु। क्षमे ऽहं सर्वसत्त्वानाम्। क्षमये ऽहं सर्वसत्त्वान्। मैत्री मे सर्वसत्त्वेषु। वैरं मम न केनचिदिति ॥ **प्रमोदं†** गुणाधिकेषु। प्रमोदो नाम विनयप्रयोगो‡ वन्दनस्तुतिवर्णवादवैयावृत्यकरणादिभिः सम्यक्ज्ञानचारित्रतपोधिकेषु साधुषु परात्मोभयकृतपूजाजनितः सर्वेन्द्रियाभिव्यक्तो मनःप्रहर्ष इति ॥ **कारुण्यं** क्लिश्यमानेषु। कारुण्यमनुकम्पा दीनानुग्रह इत्यर्थः। तन्महामोहाभिभूतेषु मतिश्रुतविभङ्गाज्ञानपरिगतेषु विषयतर्षाग्निना दह्यमान§मानसेषु हिताहितप्राप्तिपरिहारविपरीतप्रवृत्तिषु विविधदुःखार्दितेषु दीनकृपणानाथबालमोमुह्यद्वेषु सत्त्वेषु भावयेत्। तथा हि भावयन् हितोपदेशादिभिस्तानुद्गृह्णातीति ॥ **माध्यस्थ्यमविनेयेषु**। माध्यस्थ्यमौदासीन्यमुपेक्षेत्यनर्थान्तरम्। अविनेया नाम मृत्पिण्डकाष्ठकुड्यभूता ग्रहणधारणविज्ञानेहापोहवियुक्ता महामोहाभिभूता दुष्टावग्राहिताश्च। तेषु माध्यस्थ्यं भावयेत्। न हि तत्र वक्तुर्हितोपदेशस्य साफल्यं भवति ॥ किं चान्यत्

जगत्कायस्वभावौ च संवेगवैराग्यार्थम् ॥ ७ ॥

---

* H मैत्री। † H प्रमोदो। ‡ D विनयप्रयोगवन्दन।
§ DS दह्यमान।

जगत्कायस्वभावौ च भावयेत् संवेगवैराग्यार्थम् । तत्र **जगत्स्वभावो** द्रव्याणामनाद्यादिम*त्परिणामयुक्ताः प्रादुर्भावतिरोभावस्थित्यन्यतानुग्र[1]हविनाशाः । **कायस्वभावो** ऽनित्यता दुःखहेतुत्वं निःसारताशुचित्वमिति ॥ एवं ह्यस्य भावयतः संवेगो वैराग्यं च भवति। तत्र **संवेगो** नाम संसारभीरुत्वमारम्भपरिग्रहेषु दोषदर्शनादरतिर्धर्मे बहुमानो धार्मिकेषु च धर्मश्रवणे धार्मिकदर्शने च मनःप्रसाद उत्तरोत्तरगुणप्रतिपत्तौ च श्रद्धेति ॥ **वैराग्यं** नाम शरीरभोगसंसारनिर्वेदोपशान्तस्य बाह्याभ्यन्तरेषूपाधिष्वनभिष्वङ्ग इति ॥

अत्राह । उक्तं भवता हिंसादिभ्यो विरतिर्व्रतमिति[VII. 1]। तत्र का हिंसा नामेति । अत्रोच्यते

प्रमत्तयोगात्प्राण†व्यपरोपणं हिंसा ॥ ८ ॥

प्रमत्तो यः कायवाङ्मनोयोगै:‡ प्राणव्यपरोपणं करोति सा हिंसा । हिंसा मारणं प्राणातिपातः प्राणवधः देहान्तरसंक्रामणं§ प्राणव्यपरोपणमित्यनर्थान्तरम् ॥

अत्राह । अथानृतं किमिति । अत्रोच्यते

असदभिधानमनृतम् ॥ ९ ॥

---

* D adds जगत्स्वभावतो ।
† K प्राणि ।
‡ B योगव्यापारैः प्राण० ।
§ C क्रमणं ।

---

१ S अनुग्रहः परस्परोपकारादिलक्षणः ।

असदिति सद्भावप्रतिषेधो ऽर्थान्तरं गर्हा च ॥ तत्र **सद्भाव-प्रतिषेधो** नाम सद्भू*तनिह्नवो ऽभूतोद्भावनं च । तद्यथा । नास्त्यात्मा नास्ति परलोक इत्यादि भूतनिह्नवः । श्यामाक-तण्डुलमात्रो ऽयमात्मा अङ्गुष्ठपर्वमात्रो ऽयमात्मा आदित्यवर्णो निःक्रिय इत्येवमाद्यभूतोद्भावनम् ॥ **अर्थान्तरं** यो गां ब्रवीत्य-श्वमश्वं च गौरिति ॥ **गर्हेति** हिंसापारुष्यपैशून्यादियुक्तं वचः सत्यमपि गर्हितमनृतमेव† भवतीति ॥

अत्राह । अथ स्तेयं किमिति । अत्रोच्यते

अदत्तादानं स्तेयम् ॥ १० ॥

स्तेयकृद्भा परैरदत्तस्य परिगृहीतस्य‡ तृणादेर्द्रव्यजातस्या-दानं स्तेयम् ॥

अत्राह । अथाब्रह्म किमिति । अत्रोच्यते

मैथुनमब्रह्म ॥ ११ ॥

स्त्रीपुंसयोर्मिथुनभावो§ मिथुनकर्म वा मैथुनं तदब्रह्म ।

अत्राह । अथ परिग्रहः क इति । अत्रोच्यते

मूर्छा परिग्रहः ॥ १२ ॥

चेतनावत्स्वचेतनेषु च बाह्याभ्यन्तरेषु द्रव्येषु मूर्छा परिग्रहः । इच्छा प्रार्थना कामो ऽभिलाषः कांक्षा गार्द्धं मूर्छेत्यनर्थान्तरम् ॥

---

* A भूतनिह्नवः for सद्भूत० । † C omits अनृतं ।

‡ C adds वा । § D मिथुनभाववोमिथुनभावो ।

अत्राह । गृहीमस्तावद्व्रतानि । अथ व्रती क इति । अत्रोच्यते

निःशल्यो व्रती ॥ १३ ॥

मायानिदानमिथ्यादर्शनशल्यैस्त्रिभिर्वियुक्तो निःशल्यो व्रती भवति । व्रतान्यस्य सन्तीति व्रती । तदेवं निःशल्यो व्रतवान् व्रती भवतीति ॥

अगार्यनगारश्च ॥ १४ ॥

स एष व्रती द्विविधो भवति । अगारी अनगारश्च । आवकः श्रमणश्चेत्यर्थः ॥

अत्राह । को ऽनयोः प्रतिविशेष इति । अत्रोच्यते

अणुव्रतो ऽगारी ॥ १५ ॥

अणून्यस्य व्रतानीत्यणुव्रतः । तदेवमणुव्रतधरः आवको ऽगारी व्रती* भवति ॥

किं चान्यत्

दिग्देशानर्थदण्डविरतिसामायिकपौषधोपवासोपभोगपरिभोगातिथिसंविभागव्रतसंपन्नश्च ॥ १६ ॥

एभिश्च दिग्व्रतादिभिरुत्तरव्रतैः संपन्नो ऽगारी व्रती भवति ।

---

* C omits this । † B पोषध everywhere ।

‡ B adds परिमाण, H probably does the same ।

तत्र **दिग्व्रतं** नाम तिर्यगूर्ध्वमधो वा दशानां दिशां यथाशक्ति गमनपरिमाणाभिग्रहः । तत्परतश्च सर्वभूतेष्वर्थतो ऽनर्थतश्च सर्वसावद्ययोगनिक्षेपः ॥ **देशव्रतं** नामापवरकगृहग्रामसीमादिषु यथाशक्ति प्रविचाराय* परिमाणाभिग्रहः । तत्परतश्च सर्वभूतेष्वर्थतो ऽनर्थतश्च सर्वसावद्ययोगनिक्षेपः ॥ **अनर्थदण्डो** नामोपभोगपरिभोगावस्थागारिणो व्रतिनो ऽर्थः । तद्व्यतिरिक्तो ऽनर्थः । तदर्थो दण्डो ऽनर्थदण्डः । तद्विरतिर्व्रतम् ॥ **सामायिकं** नामाभिगृह्य कालं सर्वसावद्ययोगनिक्षेपः ॥ **पौषधोपवासो** नाम पौषधे उपवासः पौषधोपवासः† । पौषधः पर्वेत्यनर्थान्तरम् । सो ऽष्टमीं चतुर्दशीं पञ्चदशीमन्यतमां वा तिथिमभिगृह्य चतुर्थाद्युपवासिना व्यपगतस्नानानुलेप‡नगन्धमाल्यालंकारेण न्यस्तसर्वसावद्ययोगेन कुशसंस्तारफलकादीनामन्यतमं संस्तारमास्तीर्य स्थानं§ वीरासननिषद्यानां वान्यतममास्थाय§ धर्मजागरिकापरेणानुष्ठेयो भवति ॥ **उपभोगपरिभोगव्रतं** नामाशनपानखाद्य‖—खाद्यगन्धमाल्यादीनामाच्छाद¶नप्रावरणालंकारशयनासनगृहयानवाहनादीनां च बहुसावद्यानां वर्जनम् । अल्पसावद्यानामपि परिमाणकरणमिति ॥ **अतिथिसंविभागो** नाम न्यायागतानां

---

* D प्रतिचाराय । † D omits ।

‡ K चनुलेप ।

§ D निषद्यानामन्यतमदास्थाय धर्मजागरिकापरिणामेन ।

‖ BK खाद्याखाद्य । ¶ C omits आच्छादन ।

कल्पनीयानामन्नपानादीनां द्रव्याणां देशकालश्रद्धा*सत्कार-क्रमोपेतं †परयात्मानुग्रहबुद्धया संयतेभ्यो दानमिति ॥

किं चान्यदिति

मारणान्तिकीं संलेखनां‡ जोषिता ॥ १७ ॥

कालसंहननदौर्बल्योपसर्गदोषाद्धर्मावश्यकपरिहाणिं वाभितो ज्ञात्वावमौदर्य§चतुर्थषष्ठाष्टमभक्तादिभिरात्मानं संलिख्य‖ संयमं प्रतिपद्योत्तमव्रतसंपन्नश्चतुर्विधाहारं प्रत्याख्याय यावज्जीवं भावनानुप्रेक्षापरः स्मृतिसमाधिबहुलो मारणान्तिकीं संलेखनां जोषिता उत्तमार्थस्याराधको भवतीति ॥

एतानि दिग्व्रतादीनि शीलानि भवन्ति । निःशल्यो व्रतीति वचनादुक्तं भवति व्रती नियतं सम्यग्दृष्टिरिति ॥

तच्च

शङ्काकांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः¶ ॥ १८ ॥

शङ्का कांक्षा विचिकित्सा अन्यदृष्टिप्रशंसा संस्तवः इत्येते पञ्च सम्यग्दृष्टेरतीचारा भवन्ति । **अतिचारो** व्यतिक्रमः स्खलन**-

---

* H शुद्धा for श्रद्धा ।

† BK परात्मानुग्रह D परमयात्मानुग्रह० ।

‡ B संलेखिनां ।

§ D अवमोदय ।

‖ B संलेख्य ।

¶ KCD omit ।

** C स्खलित ।

मित्यनर्थान्तरम् ॥ अधिगतजीवाजीवादितत्त्वस्यापि भगवतः* शासनं भावतोऽभिप्रपन्नस्यासंहार्यमतेः† सम्यग्दृष्टेरर्हत्प्रोक्तेषु अत्यन्तसूक्ष्मेष्वतीन्द्रियेषु केवलागमगम्येष्वर्थेषु यः संदेहो भवति एवं स्यादेवं न स्यादिति सा शंका ॥ ऐहलौकिकपारलौकिकेषु विषयेष्वाशंसा कांक्षा। सो ऽतिचारः सम्यग्दृष्टेः। कुतः। कांक्षिता ह्यविचारितगुणदोषः समयमतिक्रामति ॥ विचिकित्सा नाम दृदमप्यस्तीदमपीति मतिविप्लुतिः ॥ अन्यदृष्टिरित्यर्हच्छासनव्यतिरिक्तां दृष्टिमाह। सा द्विविधा। अभिगृहीता‡ अनभिगृहीता च। तत्रोक्तानां क्रियावादिनामक्रियावादिनामज्ञानि‖कानां वैनयिकानां च प्रशंसासंस्तवौ सम्यग्दृष्टेरतिचार¶ इति। आह। प्रशंसासंस्तवयोः कः प्रतिविशेष इति। उच्यते। ज्ञानदर्शनगुणप्रकर्षोद्भावनं भावतः प्रशंसा। संस्तवस्तु सोपधं निरुपधं भूताभूतगुणवचनमिति** ॥

व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥ १९ ॥

व्रतेषु पञ्चसु शीलेषु च सप्तसु पञ्च पञ्चातीचारा भवन्ति यथाक्रममिति ऊर्ध्वं यदक्ष्यामः। तद्यथा ॥

---

* DBK भगवच्छासनं। † D असंहार्यमतेः।
‡ B केवलगम C केवलीगम। § C adds वा।
‖ V-ar. S अज्ञानिकानां। ¶ C omits।
** B सत्यं परगुणवचनमिति। C भूतगुण० and omits सत्यं।

बन्धवधच्छविच्छेदातिभारारोपणान्नपाननिरोधाः ॥ २० ॥

त्रसस्थावराणां जीवानां बन्धवधौ त्वक्छेदः काष्ठादीनां पुरुषहस्त्यश्वगोमहिषादीनां चातिभारारोपणं तेषामेव चान्नपाननिरोधः अहिंसाव्रतस्यातिचारा भवन्ति ॥

मिथ्योपदेशरहस्याभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ॥ २१ ॥

एते पञ्च मिथ्योपदेशादयः सत्यवचनस्यातिचारा भवन्ति । तत्र **मिथ्योपदेशो** नाम प्रमत्तवचनमयथार्थवचनोपदेशो विवादेष्व*तिसंधानोपदेश इत्येवमादिः ॥ **रहस्याभ्याख्यानं** नाम स्त्रीपुंसयोः परस्परेणान्यस्य वा रागसंयुक्तं हास्यक्रीडासङ्गादिभी रहस्येनाभिगंसनम् ॥ **कूटलेखक्रिया** लोकप्रतीता ॥ **न्यासापहारो** विस्मरणकृतपरनिक्षेपग्रहणम् ॥ **साकारमन्त्रभेदः** पैशुन्यं गुह्यमन्त्रभेद†श्च ॥

स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥ २२ ॥

एते पञ्चास्तेयव्रतस्यातिचारा भवन्ति । तत्र स्तेनेषु हिरण्यादिप्रयोगः ॥ स्तेनैराहृतस्य‡ द्रव्यस्य मुधा क्रयेण वा ग्रहणं

---

* D विवादादिष्वतिसं । † BK प्रभेदश्च ।

‡ C ०हृतद्र० ।

तदाहृतादानम् ॥ **विरुद्धराज्यातिक्रमश्चास्तेयव्रतस्यातिचारः**। विरुद्धे हि राज्ये सर्वमेव स्तेययुक्तमादानं भवति ॥ **हीनाधिकमानोन्मानप्रतिरूपकव्यवहारः** कूटतुलाकूटमानवच्च*नादियुक्तः क्रयो विक्रयो वृद्धिप्रयोगश्च। **प्रतिरूपकव्यवहारो** नाम सुवर्णरूप्यादीनां द्रव्याणां प्रतिरूपकक्रिया व्याजीकरणानि चेत्येते पञ्चास्तेयव्रतस्यातिचारा भवन्ति ॥

परविवाहकरणेत्वरपरिगृहीतापरिगृहीतागमनानङ्गक्रीडातीव्रकामाभिनिवेशाः ॥ २३ ॥

परविवाहकरणमित्वर†परिगृहीतागमनमपरिगृहीतागमनमनङ्गक्रीडा तीव्र‡कामाभिनिवेश इत्येते पञ्च ब्रह्मचर्यव्रतस्यातिचारा भवन्ति ॥

क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥ २४ ॥

क्षेत्रवास्तुप्रमाणातिक्रमः हिरण्यसुवर्णप्रमाणातिक्रमः धनधान्यप्रमाणातिक्रमः दासीदासप्रमाणातिक्रमः कुप्यप्रमाणातिक्रम इत्येते पञ्चेच्छापरिमाणव्रतस्यातिचारा भवन्ति ॥

---

* B प्रवचनादि।

† K adds पर here, B °करणमन्यरपरपरि°।

‡ C तीव्रातिकामा°।

ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यन्तर्धानानि ॥ २५ ॥

ऊर्ध्वव्यतिक्रमः अधोव्यतिक्रमः तिर्यग्व्यतिक्रमः क्षेत्रवृद्धिः स्मृत्यन्तर्धानमित्येते पञ्च दिग्व्रतस्यातिचारा भवन्ति । स्मृत्यन्तर्धानं नाम स्मृतेर्भ्रंशो ऽन्तर्धानमिति ॥

आनयन*प्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः† ॥ २६ ॥

द्रव्यस्यानयनं प्रेष्यप्रयोगः शब्दानुपातः रूपानुपातः पुद्गलक्षेप इत्येते पञ्च देशव्रतस्यातिचारा भवन्ति ॥

कन्दर्पकौकुच्यमौखर्यासमीक्ष्याधिकरणोपभोगाधिकत्वानि‡ ॥ २७ ॥

कन्दर्पः कौकुच्यं§ मौखर्यमसमीक्ष्याधिकरणमुपभोगाधिकत्वमित्येते पञ्चानर्थदण्डविरतिव्रतस्यातिचारा भवन्ति । तत्र **कन्दर्पो** नाम रागसंयुक्तो ऽसभ्यो वाक्प्रयोगो हास्यं च ॥ **कौकुच्यं**‖ नाम एतदेवोभयं दुष्टकायप्रचार¶संयुक्तम् ॥ **मौखर्यं**-मसंबद्धबहुप्रलापित्वम् ॥ **असमीक्ष्याधिकरणं** लोकप्रतीतम् ॥ **उपभोगाधिकत्वं** चेति ॥

---

* V-ar. S आनायन । † K प्रक्षेपाः । ‡ C adds इति ।

§ V-ar. S. कोल्कुच्यं । ‖ B कोल्क्ष्यो ।

¶ D प्रतोचार S perhaps प्रवोचार or प्रकार ।

योगदुःप्रणिधानानादरस्मृत्यनुपस्थापनानि ॥ २८ ॥

कायदुःप्रणिधानं वाग्दुःप्रणिधानं मनोदुःप्रणिधानमनादरः स्मृत्यनुपस्थापनमित्येते पञ्च सामायिकव्रतस्यातिचारा भवन्ति ॥

अप्रत्यवे*क्षिताप्रमार्जितोत्सर्गादाननिक्षेपसंस्तारोपक्रम†णानादरस्मृत्यनुपस्थापनानि ॥ २९ ॥

अप्रत्यवेक्षिताप्रमार्जिते उत्सर्गः अप्रत्यवेक्षिताप्रमार्जितस्यादाननिक्षेपौ‡ अप्रत्यवेक्षिताप्रमार्जितः संस्तारोपक्रमः अनादरः स्मृत्यनुपस्थानमित्येते पञ्च पौषधोपवासस्यातिचारा भवन्ति ॥

सचित्तसंबद्धसंमिश्राभिषवदुःपक्वाहाराः ॥ ३० ॥

सचित्ताहारः सचित्तसंबद्धाहारः सचित्तसंमिश्राहारः अभिषवाहारः दुःपक्वाहार इत्येते पञ्चोपभोगव्रतस्यातिचारा भवन्ति ॥

सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ॥ ३१ ॥

अन्नादेर्द्रव्यजातस्य सचित्ते निक्षेपः§ सचित्तापि॥धानं परस्वेदमिति परव्यपदेशः मात्सर्यं कालातिक्रम इत्येते पञ्चातिथिसंविभागस्यातिचारा भवन्ति ॥

---

* BK अप्रत्यवेक्षित। † Probably S has उपक्रम।
‡ D आदानं निक्षेपः। § C सचित्तनिक्षेपः
|| C सचित्तापिधानः D सचित्तापिधानं।

जीवितमरणाशंसामित्रानुरागसुखानुबन्धनिदान-करणानि* ॥ ३२ ॥

जीविताशंसा मरणाशंसा मित्रानुरागः सुखानुबन्धो निदानकरण†मित्येते मारणान्तिकसंलेखनायाः पञ्चातिचारा भवन्ति ॥

तदेतेषु सम्यक्त्वव्रतशीलव्यतिक्रमस्थानेषु पञ्चषष्टिष्वतिचार-स्थानेषु अप्रमादो न्याय इति ॥

अत्राह । उक्तानि व्रतानि व्रतिनश्च । अथ दानं किमिति । अत्रोच्यते

अनुग्रहार्थं स्वस्यातिसर्गो दानम् ॥ ३३ ॥

आत्मपरानुग्रहार्थं स्वस्य द्रव्यजातस्यान्नपानवस्त्रादेः पात्रे‡ऽतिसर्गो दानम् । किं च

विधिद्रव्यदातृपात्रविशेषात्तद्§विशेषः ॥ ३४ ॥

विधिविशेषाद् द्रव्यविशेषाद् दातृविशेषात्पात्रविशेषाच्च तस्य दानधर्मस्य विशेषो भवति । तद्विशेषाच्च फलविशेषः ॥ तत्र **विधिविशेषो** नाम देशकालसंपच्छ्रद्धासत्कारक्रमाः‖ कल्पनीयत्वमित्येवमादिः¶ ॥ **द्रव्यविशेषो** ऽन्नादीनामेव सारजातिगुणोत्कर्षयोगः ॥ **दातृविशेषः** प्रतिगृहीत**र्थनसूया, त्यागे

---

* H निदानानि not करणानि।
† K omits करणम्।
‡ K पात्रातिसर्गः।
§ K omits तद्।
‖ D क्रमः।
¶ BK त्वादि।
** दातृर्गृहीतर्थनसूया।

ऽविषादः, अपरिभाविता, दित्सतो ददतो दत्तवतश्च प्रीतियोगः, कुशलाभिसंधिता, दृष्टफलानपेक्षिता, निरुपधत्वमनिदानत्वमिति ॥ **पात्रविशेषः** सम्यग्दर्शनज्ञानचारित्रतपःसंपन्नता इति* ॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसङ्ग्रहे
सप्तमो ऽध्यायः समाप्तः ॥

---

* B संपन्नतामिति।

अष्टमोऽध्यायः ॥

उक्त आस्रवः* । बन्धं वक्ष्यामः । तत्प्रसिद्ध्यर्थमिदमुच्यते ।

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः ॥ १ ॥

मिथ्यादर्शनं अविरतिः प्रमादः कषाया योगाः‡ इत्येते पञ्च बन्धहेतवो भवन्ति । तत्र सम्यग्दर्शनाद्विपरीतं **मिथ्यादर्शनम्** । तद् द्विविधं§ मनभिगृहीतमभिगृहीतं च । तत्राभ्युपेत्यासम्यग्दर्शनपरिग्रहो ऽभिगृहीतमज्ञानिकादीनां त्रयाणां त्रिषष्टानां‖ कुवादिशतानाम् । शेषमनभिगृहीतम् ॥ यथोक्ताया विरतेर्विपरीताविरतिः ॥ **प्रमादः** स्मृत्यनवस्थानं¶ कुशलेष्वनादरो योगदुःप्रणिधानं चैष** प्रमादः ॥ **कषाया** मोहनीये वक्ष्यन्ते [VIII. 10] ॥ **योगस्त्रिविधः** पूर्वोक्तः ॥ एषां मिथ्यादर्शनादीनां बन्धहेतूनां पूर्वस्मिन्पूर्वस्मिन्सति नियतमुत्तरेषां भावः । उत्तरोत्तरभावे तु पूर्वेषामनियम इति ॥

---

* DC उक्ता आस्रवाः । † K प्रसिद्धार्थं• ।

‡ K कषाय योग इ० ।

§ KB विविध K adds मिथ्यादर्शनं ।

‖ D चिषष्ठादीनां । ¶ D स्मृत्यवस्थानं । ** D omits एष ।

सकषायत्वाज्जीवः कर्मणो योग्यान्पुद्गला-
नादत्ते ॥ २ ॥

सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलान् आदत्ते। कर्मयोग्यानिति* अष्टविधो† पुद्गलग्रहण कर्मशरीरग्रहणयोग्या-
5 नित्यर्थः। नामप्रत्ययाः सर्वतो योगविशेषादिति वक्ष्यते [VIII. 25] ॥

स बन्धः ॥ ३ ॥

स एष कर्मशरीरपुद्गलग्रहणकृतो बन्धो भवति।

स पुनश्चतुर्विधः।

प्रकृतिस्थित्यनुभावप्रदेशास्तद्विधयः ॥ ४ ॥

10 प्रकृतिबन्धः स्थितिबन्धः अनुभावबन्ध. प्रदेशबन्ध इति। तच्च

आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीया-
युष्कनामगोत्रान्तरायाः ॥ ५ ॥

आद्य इति सूत्रक्रमप्रामाण्यात्प्रकृतिबन्धमाह। सो ऽष्टविधः। तद्यथा। ज्ञानावरणं दर्शनावरणं वेदनीयं मोहनीयं आयुष्कं
15 नाम गोत्रं अन्तरायमिति। किं चान्यत्

पञ्चनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्वि-
पञ्चभेदा यथाक्रमम् ॥ ६ ॥

---

* S perhaps omits this. C कर्मणो योग्यानिति।

† B अष्टविधपुद्गलग्रहणे।

स एष प्रकृतिबन्धो ऽष्टविधो ऽपि पुनरेकशः पञ्चभेदः नवभेदः द्विभेदः अष्टाविंशतिभेदः चतुर्भेदः द्विचत्वारिंशद्भेदः द्विभेदः पञ्चभेद इति यथाक्रमं प्रत्येतव्यम्। इत उत्तरं यदक्ष्यामः। तद्यथा।

मत्यादीनाम्[1] ॥ ७ ॥

ज्ञानावरणं पञ्चविधं भवति[2]। मत्यादीनां ज्ञानानामावरणानि पञ्च। विकल्पांश्चैकश इति ॥

चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धि[3]वेदनीयानि च ॥ ८ ॥

चक्षुर्दर्शनावरणं अचक्षुर्दर्शनावरणं अवधिदर्शनावरणं केवलदर्शनावरणं निद्रावेदनीयं निद्रानिद्रावेदनीयं प्रचलावेदनीयं प्रचलाप्रचलावेदनीयं स्त्यानगृद्धिवेदनीयमिति दर्शनावरणं नवभेदं भवति।

सदसद्वेद्ये ॥ ९ ॥

सद्वेद्यं असद्वेद्यं च वेदनीयं द्विभेदं भवति।

---

१ Var S. Var H. मतिश्रुतावधिमनःपर्यायकेवलानाम्।

२ K मत्यादीनां ज्ञानावरणं पञ्चविधम्। मतिज्ञानावरणं श्रुतज्ञानावरणं अवधिज्ञानावरणं मनःपर्यायज्ञानावरणं केवलज्ञानावरणम्। मत्यादीनां ज्ञानानामावरणानि पञ्च भवन्ति॥ D as in text, but भवति for इति।

३ Var S. स्त्यानर्द्धि।

दर्शनचारित्रमोहनीयकषायनोकषायवेदनीयाख्यास्त्रिद्विषोडशनवभेदाः* सम्यक्त्वमिथ्यात्वतदुभयानि कषायनोकषायाः†वनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः हास्यरत्यरतिशोकभयजुगुप्सा‡स्त्रीपुंनपुंसकवेदाः ॥ १० ॥

त्रिद्विषोडशनवभेदा यथाक्रमम्§ । मोहनीयबन्धो द्विविधो दर्शनमोहनीयाख्यश्चारित्रमोहनीयाख्यश्च । तत्र दर्शनमोहनीयाख्यस्त्रिभेदः । तद्यथा । मिथ्यात्ववेदनीयं सम्यक्त्ववेदनीयं सम्यग्मिथ्यात्ववेदनीयमिति । चारित्रमोहनीयाख्यो द्विभेदः कषायवेदनीयं नोकषायवेदनीयं चेति । तत्र कषायवेदनीयाख्यः षोडशभेदः । तद्यथा । अनन्तानुबन्धी क्रोधो मानो माया लोभ एवमप्रत्याख्यानकषायः प्रत्याख्यानावरणकषायः संज्वलनकषाय‖ इत्येकशः क्रोधमानमायालोभाः षोडश भेदाः ॥ नोकषायवेदनीयं नवभेदम् । तद्यथा । हास्यं रतिः अरतिः शोकः भयं जुगुप्सा पुरुषवेदः स्त्रीवेदः नपुंसकवेद इति नोकषायवेदनीयं नवप्रकारम्¶ । तत्र पुरुषवेदादीनां**

---

* K adds यथाक्रमम् । † DC कषायाकषायौ and K omits it.

‡ K and C separate जुगुप्साः स्त्रीपुं० । § BK omit this whole.

‖ C संज्वलनकषायवेदनीयं चेति and omits from इत्येक० to भेदाः ।

¶ S probably omits from नोकषाय to प्रकारम् ।

** C पुरुषवेदनादीनां ।

दृष्टकाष्ठकरीषाग्नयो निदर्शनानि भवन्ति। दृष्ट्येवं मोहनीयमष्टाविंशतिभेदं भवति॥

*अनन्तानुबन्धी सम्यग्दर्शनोपघाती। तस्योदयाद्धि† सम्यग्दर्शनं नोत्पद्यते पूर्वोत्पन्नमपि च प्रतिपतति। अप्रत्याख्यानकषायोदयाद्विरतिर्न भवति। प्रत्याख्यानावरणकषायोदयाद्विरताविरतिर्भवत्युत्तमचारित्रलाभस्तु न भवति। संज्वलनकषायोदयाद्यथाख्यातचारित्रलाभो न भवति॥

क्रोधः कोपो रोषो द्वेषो भण्डनं‡ भाम इत्यनर्थान्तरम्। तस्यास्य क्रोधस्य तीव्रमध्यविमध्यमन्दभावाश्रितानि निदर्शनानि भवन्ति। तद्यथा। पर्वतराजिसदृशः भूमिराजिसदृशः वालुकाराजिसदृशः उदकराजिसदृश इति। तत्र **पर्वतराजिसदृशो** नाम। यथा प्रयोगविस्रसामिश्रकाणामन्यतमेन हेतुना पर्वतराजिरुत्पन्ना नैव कदाचिदपि संरोहति एवमिष्टवियोजनानिष्टयोजनाभिलषितालाभादीनामन्यतमेन हेतुना यस्योत्पन्नः क्रोध आ मरणान्न व्यय§ गच्छति जात्यन्तरानुबन्धी निरनुनयस्तीव्रानुशयोऽप्रत्यवमर्शश्च भवति स पर्वतराजिसदृशः। तादृशं क्रोधमनुश्रुता॥ नरकेषूपपत्तिं प्राप्नुवन्ति॥ **भूमिराजिसदृशो** नाम। यथा भूमे¶र्भास्कररश्मिजालात्तप्तेहाया वाय्वभिहताया

---

* DK add तच। † C omits हि। ‡ D adds कलिः।

§ C व्यपगच्छति D आमरणान्नाव्यपगच्छति।

|| DC here and hereafter अनुश्रुता।

¶ B भूमौ भा.....स्नेहायां वायुभिर्हतायां।

राजिरुत्पन्ना वर्षापेक्षसंरोहा परमप्रकृष्टाष्टमास*स्थितिर्भवति एवं यथोक्तनिमित्तो यस्य क्रोधो ऽनेकविधस्थानीयो† दुरनुनयो भवति स भूमिराजिसदृशः। तादृशं क्रोधमनुमृतास्तिर्यग्योनावुपपत्तिं प्राप्नुवन्ति॥ **वालुकाराजिसदृशो** नाम। यथा वालुकायां काष्ठशलाकाशर्करादीनामन्यतमेन हेतुना राजिरुत्पन्ना वाय्वीरणाद्यपेक्षसंरोहार्वाग्मासस्य‡ रोहति॥ एवं यथोक्तनिमित्तोत्पन्नो यस्य क्रोधो ऽहोरात्रं पक्षं मासं चातुर्मास्यं संवत्सरं वावतिष्ठते स वालुकाराजिसदृशो नाम क्रोधः¶। तादृशं क्रोधमनुमृता मनुष्येषूपपत्तिं प्राप्नुवन्ति॥ **उदकराजिसदृशो** नाम। यथोदके दण्डशलाकाङ्गुल्यादीनामन्यतमेन हेतुना राजिरुत्पन्ना द्रवत्वादपामुत्पत्त्यनन्तरमेव संरोहति एवं यथोक्तनिमित्तो** यस्य क्रोधो विदुषो ऽप्रमत्तस्य प्रत्यवमर्शनोत्पत्त्यनन्तरमेव व्यपगच्छति स उदकराजिसदृशः। तादृशं क्रोधमनुमृता देवेषूपपत्तिं प्राप्नुवन्ति। येषां त्वेष चतुर्विधो ऽपि न भवति ते निर्वाणं प्राप्नुवन्ति††॥

मानः स्तम्भो गर्व उत्सेको ऽहंकारो दर्पो मदः स्मय इत्यनर्थान्तरम्। तस्यास्य मानस्य तीव्रादिभावाश्रितानि निदर्शनानि भवन्ति। तद्यथा। शैलस्तम्भसदृशः अस्थिस्तम्भ-

---

* C ० ष्टमासं स्थिति०।

† C अनेकवर्षस्थायी B अनेकवर्षस्थायी D वर्षस्थायी only.

‡ C षाय्वी०। § K अर्धात्मासस्य। ‖ CD संरोहति।

¶ C omits. ** DC यथोक्तनिमित्तोत्पन्नो। †† D प्राप्नुवन्तीति।

सदृशः दारुस्तम्भसदृशः* लतास्तम्भसदृश† इति । एषामुपसंहारो निगमनं च क्रोधनिदर्शनैर्व्याख्यातम् ॥

माया प्रणिधिरुपधिर्निकृतिरावरणं‡ वञ्चना दम्भः कूटमतिसन्धानमनार्जवमित्यनर्थान्तरम् । तस्या मायायास्तीव्रादिभावाश्रितानि निदर्शनानि भवन्ति । तद्यथा । वंशकुण§सदृशी मेषविषाणसदृशी गोमूत्रिकासदृशी‖ निर्लेखनसदृशीति । अत्राप्युपसंहारनिगमने क्रोधनिदर्शनैर्व्याख्याते ॥

लोभो रागो गार्द्धमिच्छा मूर्छा स्नेहः कांक्षाभिष्वङ्ग इत्यनर्थान्तरम् । तस्यास्य लोभस्य तीव्रादिभावाश्रितानि निदर्शनानि भवन्ति । तद्यथा । लाक्षारागसदृशः कर्दमरागसदृशः कुसुम्भरागसदृशः हरिद्रारागसदृश¶ इति । अत्राप्युपसंहारनिगमने क्रोधनिदर्शनैर्व्याख्याते ॥

एषां क्रोधादीनां चतुर्णां कषायाणां प्रत्यनीकभूताः प्रतिघातहेतवो भवन्ति । तद्यथा । क्षमा क्रोधस्य मार्दवं मानस्यार्जवं मायायाः संतोषो लोभस्येति ।

नारकतैर्यग्योनमानुषदैवानि ॥ ११ ॥

आयुष्कं चतुर्भेदं नारकं तैर्यग्योनं** मानुषं दैवमिति ।

---

* D काष्ठस्तम्भसदृशः । † C om. ‡ KD प्रणधिः K उपधिम् C आवरणीं
§ K कुडंङ्ग । ‖ D gives this as 4th and निर्लेखन as 3rd.
¶ C m. ** B तिर्यग्योनिं K तैर्यग्योनिं K मानुषं ।

गतिजातिशरीराङ्गो*पाङ्गनिर्माणबन्धनसङ्घात-संस्थानसंहनन†स्पर्शरसगन्धवर्णानुपूर्व्य‡गुरुलघूपघात-पराघाता§तपोद्योतोच्छ्वासविहायोगतयः प्रत्येकशरीर-त्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तस्थिरादेययशांसि से-तराणि तीर्थकृत्त्वं च ॥ १२ ॥

गतिनाम जातिनाम शरीरनाम अङ्गोपाङ्गनाम निर्माणनाम बन्धननाम संघातनाम संस्थाननाम संहननाम स्पर्शनाम रसनाम गन्धनाम वर्णनाम आनुपुर्वीनाम अगुरुलघुनाम उपघातनाम पराघातनाम आतपनाम उद्योतनाम उच्छ्वासनाम विहायोगतिनाम । प्रत्येकशरीरादीनां सेतराणां नामानि । तद्यथा । प्रत्येकशरीरनाम साधारणशरीरनाम त्रसनाम स्थावरनाम सुभगनाम दुर्भगनाम सुखरनाम दुःखरनाम‖ शुभनाम अशुभनाम सूक्ष्मनाम बादरनाम पर्याप्तनाम अपर्याप्तनाम स्थिरनाम अस्थिरनाम आदेयनाम अनादेयनाम यशोनाम अयशोनाम तीर्थकरनाम इत्येतद्द्विचत्वारिंशद्विधं मूलभेदतो नामकर्म भवति । उत्तरनामानेकविधम् । तद्यथा । **गतिनाम** चतुर्विधं नरकगतिनाम तिर्यग्योनिगतिनाम मनुष्यगतिनाम देवगतिनाम॥ **जातिनाम्नो** मूलभेदाः

---

* K omits अङ्ग everywhere. † K संहन everywhere.

‡ Var. S नुपूर्व्यागु० । § K परघात everywhere. ‖ K दुखरनाम ।

पञ्च । तद्यथा । एकेन्द्रियजातिनाम द्वीन्द्रियजातिनाम त्रीन्द्रियजातिनाम चतुरिन्द्रियजातिनाम पञ्चेन्द्रियजातिनामेति* ॥ एकेन्द्रियजातिनामानेकविधम् । तद्यथा । पृथिवीकायिकजातिनाम अप्कायिकजातिनाम तेजःकायिकजातिनाम वायुकायिकजातिनाम वनस्पतिकायिकजातिनामेति ॥ तत्र पृथिवीकायिकजातिनामानेकविधम् । तद्यथा । शुद्धपृथिवी-शर्करा-वालुकोपल—शिला-लवणायस्त्रपु-ताम्र-सीसक-रूप्य-सुवर्ण-वज्र-हरिताल—हिङ्गुलक†-मनःशिला-सस्यकाञ्जनप्रवालकाभ्रपटलाभ्रवालिका‡जातिनामादि गोमेदक-रुचकाङ्क-स्फटिक§-लोहितांक—जलाकवभास-वैडूर्य-चन्द्रप्रभ¶-चन्द्रकान्त-सूर्यकान्त-जलकान्त—मसारगल्ला**अगर्भ-सौगन्धिक-पुलकारिष्ट-काञ्चनमणिजातिनामादि च ॥ अप्कायिकजातिनामानेकविधम् । तद्यथा । उपक्लेदावश्याय-नीहार-हिम-घनोदक-शुद्धोदकजातिनामादि ॥ तेजःकायिकजातिनामानेकविधम् । तद्यथा । अङ्गार-ज्वाला-ज्वातार्चिर्मुर्मुर-शुद्धाग्निजातिनामादि ॥ वायुकायिकजातिनामानेकविधम् । तद्यथा। उत्कलिका-मण्डलिका-झञ्झकाथन††-संवर्तकजातिनामादि ॥ वनस्पतिकायिकजातिनामानेकविधम् । तद्यथा । कन्द‡‡-मूल-स्कन्ध-त्वक्-काष्ठ-

---

* K omits इति। † D हिङ्गुलुकं। ‡ C अभ्रवालुका।
§ DA and C स्फटिक। ‖ K जाला°। ¶ K omits चन्द्रप्रभ।
** C गल्ल। †† D घन। ‡‡ D स्कन्द for कन्द।

पत्र*-प्रवाल-पुष्प-फल-गुल्म-गुच्छ†-लता-वल्ली-तृण-पर्वकायशेवाल-पनक-वलक-कुहन‡जातिनामादि ॥ एवं द्वीन्द्रियजातिनामानेकविधम् । एवं त्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियजातिनामादीन्यपि ॥

शरीरनाम पञ्चविधम् । तद्यथा । औदारिकशरीरनाम वैक्रियशरीरनाम आहारकशरीरनाम तैजसशरीरनाम कार्मणशरीरनामेति§॥ **अङ्गोपाङ्गनाम** त्रिविधम्। तद्यथा। औदारिकाङ्गोपाङ्गनाम वैक्रियशरीराङ्गोपाङ्गनाम आहारकशरीराङ्गोपाङ्गनाम । पुनरेकैकमनेकविधम् । तद्यथा । अङ्गनाम तावत् शिरोनाम उरोनाम पृष्ठनाम बाहुनाम उदरनाम पादनाम ॥ उपाङ्गनामानेकविधम् । तद्यथा । स्पर्शनाम रसनाम घ्राणनाम चक्षुर्नाम॥ श्रोत्रनाम। तथा मस्तिष्ककपालललाटकाटिकाशङ्खललाटतालुकपोलहनुचिबुकदशनौष्ठभ्रूनयनकर्णनासाद्युपाङ्ग¶नामानि शिरसः । एवं सर्वेषामङ्गानामुपाङ्गानां नामानि ॥ जातिलिङ्गाकृतिव्यवस्थानियामकं **निर्माणनाम** ॥ सत्यां प्राप्तौ निर्मितानामपि शरीराणां बन्धकं **बन्धननाम** । अन्यथा हि वालुकापुरुषवदबद्धानि शरीराणि स्युरिति ॥ बद्धानामपि च संघातविशेषजनकं प्रचयविशेषात्मकं **संघातनाम** दारुसृत्पिण्डायःसंघातवत्**। **संस्थाननाम** षड्विधम्। तद्यथा। समचतुरस्रनाम

---

* ACK पर for पत्र D puts त्वक् । † C गच्छ ।
‡ KD कुहिन । § K omits इति । ‖ K चक्षुनाम ।
¶ KP omit उपांग । ** Vars दारुसृत्पिण्डसंघात० ।

न्यग्रोधपरिमण्डलनाम साचिनाम* कुब्जनाम वामननाम हुण्ड-नामेति॥ **संहननानाम** षड्विधम्। तद्यथा। वज्रर्षभनाराचनाम अर्धवज्रर्षभनाराचनाम† नाराचनाम अर्धनाराचनाम कीलि-कानाम सृपाटिकानामेति॥ **स्पर्शनामाष्टविधं** कठिनना-मादि॥ **रसनामानेकविधं** तिक्तनामादि॥ **गन्धनामा-नेकविधं** सुरभिगन्धनामादि॥ **वर्णनामानेकविधं** कालक-नामादि॥ गतावुत्पत्तुकामस्यान्तर्गतौ वर्तमानस्य तदभिमुख-मानुपूर्व्या तत्रापणसमर्थ**मानुपूर्वीनामेति**। निर्माणनिर्मितानां शरीराङ्गोपाङ्गानां विनिवेशक्रमनियामक**मानुपूर्वीनामेत्यपरे**॥ **अगुरुलघुपरिणामनियामकमगुरुलघुनाम**॥ शरीराङ्गोपा-ङ्गोपघातक**मुपघातनाम** स्वपराक्रमविजयाद्युपघातजनकं वा॥ परशस्त्रप्रतिघातादिजनकं **पराघातनाम**॥ आतपसामर्थ्यज-नक**मातपनाम**॥ प्रकाशसामर्थ्यजनक**मुद्योतनाम**॥ प्राणा-पानपुद्गलग्रहणसामर्थ्यजनक**मुच्छ्वासनाम**॥ लब्धिनिमित्तर्द्धि-प्रत्ययस्याकाशगमनस्य जनकं **विहायोगतिनाम**॥

पृथक्शरीरनिर्वर्तकं **प्रत्येकशरीरनाम**। अनेकजीवसाधा-रणशरीरनिर्वर्तकं **साधारणशरीरनाम**। त्रसभावनिर्वर्तकं **त्रसनाम**। स्थावरभावनिर्वर्तकं **स्थावरनाम**। सौभाग्यनिर्वर्तकं **सुभगनाम**। दौर्भाग्यनिर्वर्तकं **दुर्भगनाम**। सौस्वर्यनिर्वर्तकं

---

* D सादि।

† नाराच only in CD omits अर्धवज्र। D सृपादिकानामेति।

‡ C विनिवेशन। § K adds आकर्षण।

सुस्वरनाम । दौस्वर्यनिर्वर्तकं दुःस्वरनाम । शुभभावशोभामाङ्गल्य निर्वर्तकं शुभनाम । तद्विपरीतनिर्वर्तकमशुभनाम । सूक्ष्मशरीरनिर्वर्तकं सूक्ष्मनाम । बादरशरीरनिर्वर्तकं बादरनाम ॥ पर्याप्तिः पञ्चविधा । तद्यथा । आहारपर्याप्तिः शरीरपर्याप्तिः इन्द्रियपर्याप्तिः प्राणापानपर्याप्तिः भाषापर्याप्तिरिति । पर्याप्तिः क्रियापरिसमाप्तिरात्मनः । शरीरेन्द्रियवाङ्मनःप्राणापानयोग्यदलिकद्रव्याहरणक्रियापरिसमाप्तिराहारपर्याप्तिः । गृहीतस्य शरीरतया संस्थापनक्रियापरिसमाप्तिः शरीरपर्याप्तिः । संस्थापनं रचना घटनमित्यर्थः । त्वगादीन्द्रियनिर्वर्तनक्रियापरिसमाप्तिरिन्द्रियपर्याप्तिः । प्राणापानक्रियायोग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्तनक्रियापरिसमाप्तिः प्राणापानपर्याप्तिः । भाषायोग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्तनक्रियापरिसमाप्तिर्भाषापर्याप्तिः। मनस्क*योग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्तनक्रियासमाप्तिर्मनःपर्याप्तिरित्येके । आसां युगपदारब्धानामपि क्रमेण समाप्तिरुत्तरोत्तरसूक्ष्मत्वात् सूचदार्वादिकर्तनघटनवत् । यथासङ्ख्यं च निदर्शनानि गृहदलिकग्रहणस्तम्भस्थूणाद्वारप्रवेशनिर्गमस्थानशयनादिक्रियानिर्वर्तनानीति । पर्याप्तिनिर्वर्तकं पर्याप्तिनाम ‡अपर्याप्तिनिर्वर्तकमपर्याप्तिनाम अपर्याप्तिनाम§ तत्परिणामयोग्यदलिकद्रव्यमात्मनानोपात्तमित्यर्थः॥ ॥ स्थिरत्वनिर्वर्तकं

---

* K मनस्क । † K and C omit कर्तन । ‡ D omits अपर्याप्तिनाम ।

§ S probably omits from अपर्याप्तिनाम to त्तमित्यर्थः ।

|| D द्रव्यमात्मनोपात्तमित्यर्थः ।

स्थिरनाम । विपरीतमस्थिरनाम । आदेयभाव*निर्वर्तकमादेयनाम । विपरीतमनादेयनाम । यशोनिर्वर्तकं यशोनाम । विपरीतमयशोनाम । तीर्थकरत्वनिर्वर्तकं तीर्थकरनाम । तांस्तान्भावान्नामयतीति नाम। एवं सोत्तरभेदो नामकर्मभेदोऽनेकविधः प्रत्येतव्यः ॥ 5

उच्चैर्नीचैश्च ॥ १३ ॥

उच्चैर्गोत्रं नीचैर्गोत्रं च‡ । तत्रोच्चैर्गोत्रं देशजातिकुलस्थानमानसत्कारैश्वर्याद्युत्कर्षनिर्वर्तकम् । विपरीतं नीचैर्गोत्रं चण्डालमुष्टिक§व्याधमत्स्यबन्धदास्यादिनिर्वर्तकम् ॥

दानादीनाम्‖ ॥ १४ ॥ 10

अन्तरायः¶ पञ्चविधः** । तद्यथा । दानस्यान्तरायः लाभस्यान्तरायः भोगस्यान्तरायः उपभोगस्यान्तरायः वीर्यान्तराय इति ॥

उक्तः प्रकृतिबन्धः । स्थितिबन्धं वक्ष्यामः ।

आदितस्तिसृणामन्तरायस्य†† च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः ॥ १५ ॥ 15

---

* B adds भाव । † K नाम् only once. ‡ CD add द्विभेदं गोत्रम् ।
§ मौष्टिक D मौष्टिक । ‖ D दानलाभभोगोपभोगवीर्याणाम् C adds अन्तरायः ।
¶ D दानादीनामन्तरायः । ** C omits .
†† P doubts whether अन्तरायस्य is a part of the text.

आदितस्तिसृणां कर्मप्रकृतीनां ज्ञानावरणदर्शनावरणवेद्यानामन्तरायप्रकृतेश्च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः ॥

सप्ततिर्मोहनीयस्य ॥ १६ ॥

*मोहनीयकर्मप्रकृतेः सप्ततिः सागरोपमकोटीकोट्यः परा स्थितिः ॥

नामगोत्रयोर्विंशतिः ॥ १७ ॥

नामगोत्रप्रकृत्योर्विंशतिः सागरोपमकोटीकोट्यः परा स्थितिः ॥

त्रयस्त्रिंशत्सागरोपमाण्यायुष्कस्य† ॥ १८ ॥

आयुष्कप्रकृतेस्त्रयस्त्रिंशत्सागरोपमाणि परा स्थितिः ॥

अपरा द्वादशमुहूर्ता वेदनीयस्य ॥ १९ ॥

वेदनीयप्रकृतेरपरा द्वादश मुहूर्ताः स्थितिरिति ॥

नामगोत्रयोरष्टौ ॥ २० ॥

नामगोत्रप्रकृत्योरष्टौ मुहूर्ता अपरा स्थितिर्भवति ॥

शेषाणामन्तर्मुहूर्तम्‡ ॥ २१ ॥

---

* D adds मोहनीयस्य। † A ०ष्यायुषः। ‡ A ०मुहूर्ता K ०मुहूर्तास्।

वेदनीयनामगोत्रप्रकृतिभ्यः शेषाणां ज्ञानावरणदर्शनावरण-मोहनीयायुष्कान्तरायप्रकृतीनामपरा स्थितिरन्तर्मुहूर्तं* भवति ॥

उक्तः स्थितिबन्धः । अनुभावबन्धं वक्ष्यामः ।

विपाको ऽनुभावः ॥ २२ ॥

सर्वासां प्रकृतीनां फलं विपाकोदयो ऽनुभावो भवति‡ । विविधः पाको विपाकः स तथा चान्यथा चेत्यर्थः । जीवः कर्म-विपाकमनुभवन् कर्मप्रत्ययमेवानाभोगवीर्यपूर्वकं कर्मसंक्रमं करोति§ उत्तरप्रकृतिषु सर्वासु मूलप्रकृत्यभिन्नासु न तु मूलप्रकृतिषु संक्रमो विद्यते बन्धविपाकनिमित्तान्यजातीयकत्वात् । उत्तर-प्रकृतिषु च दर्शनचारित्रमोहनीययोः सम्यग्मिथ्यात्ववेदनीयस्या-युष्कस्य च जात्यन्तरानुबन्धविपाकनिमित्तान्यजातीयकत्वादेव संक्रमो न विद्यते । अपवर्तनं तु सर्वासां प्रकृतीनां विद्यते । तदायुष्केण व्याख्यातम् [II. 52] ॥

स यथा नाम ॥ २३ ॥

सो ऽनुभावो गतिनामादीनां यथा नाम विपच्यते ॥

ततश्च निर्जरा ॥ २४ ॥

ततश्चानुभावात्कर्मनिर्जरा भवतीति‖ । निर्जरा क्षयो वेद-

---

* D अन्तर्मुहूर्ता । † C अनुभाग । ‡ C adds इति ।
§ D निमित्तान्य । ‖ CD omits इति ।

नेत्यर्थं* । अत्र चशब्दो हेत्वन्तरमपेक्षते तपसा निर्जरा चेति वक्ष्यते [IX. 3] ॥

उक्तो ऽनुभाववन्धः । प्रदेशबन्धं वक्ष्यामः ।

नामप्रत्ययाः सर्वतो योगविशेषात्सूक्ष्मैकक्षेत्रावगाढ†स्थिताः सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशाः॥ २५ ॥

नामप्रत्ययाः पुद्गला बध्यन्ते‡ । नाम प्रत्यय एषां ते इमे नामप्रत्ययाः । नामनिमित्ता नामहेतुका नामकारणा इत्यर्थः । सर्वतस्तिर्यगूर्ध्वमधश्च बध्यन्ते । योगविशेषात् कायवाङ्मनःकर्मयोग§विशेषाच्च बध्यन्ते । सूक्ष्मा बध्यन्ते न बादराः । एकक्षेत्रावगाढा॥ बध्यन्ते न क्षेत्रान्तरावगाढाः । स्थिताश्च बध्यन्ते न गतिसमापन्नाः । सर्वात्मप्रदेशेषु सर्वप्रकृतिपुद्गलाः सर्वात्मप्रदेशेषु बध्यन्ते। एकैको ह्यात्मप्रदेशो ऽनन्तैः¶ कर्मप्रदेशैर्बद्धः। अनन्तानन्तप्रदेशाः कर्मग्रहणयोग्याः पुद्गला बध्यन्ते न सङ्ख्येयासङ्ख्येयानन्तप्रदेशाः । कुतोऽग्रहणयोग्यत्वात्प्रदेशानामिति एष प्रदेशबन्धो भवति ॥

सर्वं चेतदष्टविधं कर्म पुण्यं पापं च ।

तच्च

---

* C वेदनेत्यनर्थान्तरम् ।

† D अनगाढ ।

‡ C पद्यन्ते ।

§ C omits योग ।

॥ D एकक्षेत्रावगाढा ।

¶ K अनन्तानन्तैः

सद्वेद्यसम्यक्त्वहास्यरतिपुरुषवेदशुभायुर्नामगोत्राणि पुण्यम् ॥ २६ ॥

सद्वेद्यं भूतव्रत्यनुकम्पादिहेतुकम् सम्यक्त्ववेदनीयं केवलिश्रुतादीनां वर्णवादादिहेतुकम् हास्यवेदनीयं रतिवेदनीयं पुरुषवेदनीयं शुभमायुष्कं मानुषं दैवं च शुभनाम गतिनामादीनां शुभं गोत्रमुच्चैर्गोत्रमित्यर्थः । इत्येतदष्टविधं कर्म पुण्यम्, अतोऽन्यत्पापम् ॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसंग्रहे
ऽष्टमो ऽध्यायः समाप्तः ॥

अथ नवमोऽध्यायः ।

उक्तो बन्धः । संवरं वक्ष्यामः

आस्रवनिरोधः संवरः ॥ १ ॥

यथोक्तस्य कायवाङ्मनोयोगादेर्द्विचत्वारिंशद्विधस्यास्रवस्य निरोधः संवरः ।

स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः ॥ २ ॥

स एष संवर एभिर्गुप्त्यादिभिरभ्युपायैर्भवति । किं चान्यत् ।

तपसा निर्जरा च ॥ ३ ॥

तपो† द्वादशविधं वक्ष्यते [IX. 19, 20] । तेन संवरो भवति निर्जरा च ॥

अत्राह । उक्तं भवता गुप्त्यादिभिरभ्युपायैः संवरो भवतीति । तत्र के गुप्त्यादय इति । अत्रोच्यते

सम्यग्योगनिग्रहो गुप्तिः ॥ ४ ॥

सम्यगिति विधानतो ज्ञात्वाभ्युपेत्य सम्यग्दर्शनपूर्वकं त्रिविधस्य योगस्य निग्रहो गुप्तिः कायगुप्तिर्वाग्गुप्तिर्मनोगुप्ति-

---

* MSS ०भिरुपा०। † K adds संवरश्च ।

रिति। तच्च शयनासनादाननिक्षेपस्थानचंक्रमणेषु कायचेष्टानियमः कायगुप्तिः। याचनपृच्छनप्रष्टव्याकरणेषु वाङ्नियमो मौनमेव वा* वाग्गुप्तिः। सावद्यसंकल्पनिरोधः† कुशलसंकल्पः कुशलाकुशलसंकल्पनिरोध एव वा मनोगुप्तिरिति॥

ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः॥ ५॥

सम्यगीर्या सम्यग्भाषा सम्यगेषणा सम्यगादाननिक्षेपौ सम्यगुत्सर्ग इति पञ्च समितयः॥ तत्रावश्यकार्येव संयमार्थं सर्वतो युगमात्रनिरीक्षणायुक्तस्य शनैर्न्यस्तपदा‡ गतिरीर्यासमितिः। हितमितासंदिग्धानवद्यार्थ§नियतभाषणं भाषासमितिः। अन्नपानरजोहरणपात्रचीवरादीनां धर्मसाधनानामाश्रयस्य चोद्गमोत्पादनैषणादोषवर्जनमेषणासमितिः। रजोहरणपात्रचीवरादीनां पीठफलकादीनां चावश्यकार्थं निरीक्ष्य प्रमृज्य चादाननिक्षेपौ आदाननिक्षेपणासमितिः। स्थण्डिले स्थावरजङ्गमजन्तुवर्जिते निरीक्ष्य प्रमृज्य च मूत्रपुरीषादीनामुत्सर्ग उत्सर्गसमितिरिति॥

उत्तमः क्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि धर्मः॥ ६॥

इत्येष दशविधोऽनगारधर्मः उत्तमगुणप्रकर्षयुक्तो भवति। तच्च क्षमा तितिक्षा सहिष्णुत्वं क्रोधनिग्रह इत्यनर्थान्तरम्।

---

* KD omit वा।

† D सावद्यविकल्पनिरोधः।

‡ D न्यस्तपादा।

§ S possibly निरवद्यार्थ।

तत्कथं क्षमितव्यमिति चेदुच्यते । **क्रोधनिमित्तस्यात्मनि भावाभावचिन्तनात्** परैः प्रयुक्तस्य क्रोधनिमित्तस्यात्मनि भावचिन्तनाद्भावचिन्तनाद्वा* क्षमितव्यम्† । भावचिन्तनात् तावद्विद्यन्ते मय्येते दोषाः किमत्रासौ मिथ्या ब्रवीति क्षमितव्यम् । अभावचिन्तनादपि क्षमितव्यं नैते विद्यन्ते मयि दोषा यानज्ञानादसौ‡ ब्रवीति§ क्षमितव्यम् । किं चान्यत् । **क्रोधदोषचिन्तनाच्च** क्षमितव्यम् । क्रुद्धस्य हि विद्वेषा‖दनस्मृतिभ्रंशव्रतलोपाद्यो दोषा भवन्तीति¶ । किं चान्यत् । **बालस्वभावचिन्तनाच्च** परोक्षप्रत्यक्षाक्रोशताडन**मारणधर्मभ्रंशा††नामुत्तरोत्तरक्षार्थम् । बाल इति मूढमाह । परोक्षमाक्रोशति बाले क्षमितव्यमेव‡‡ । एवंस्वभावा हि बाला भवन्ति । दिष्ट्या च मां परोक्षमाक्रोशति न प्रत्यक्षमिति§§ । लाभ एव मन्तव्य इति‖‖ । प्रत्यक्षमप्याक्रोशति बाले क्षमितव्यं । विद्यत एवैतद्बालेषु । दिष्ट्या च मां प्रत्यक्षमाक्रोशति न ताडयति । एतद्प्यस्ति बालेष्विति¶¶ लाभ एव मन्तव्यः । ताडयत्यपि बाले क्षमितव्यम् । एवंस्वभावा हि बाला भवन्ति । दिष्ट्या च मां ताडयति न

---

* C •चिन्तनाच्च ।

† Perhaps S omits from परैः all down to क्षमितव्यं D omits भावचिन्तनाद्भावचिन्तनाद्वा क्षमितव्यं। ‡ D adds मिथ्या।

§ DK add इति। ‖ K विद्विषात्माद। ¶ D omits इति।

** D क्षाक्रोशनताडण। †† C धर्मभङ्ग। ‡‡ D omits एव।

§§ C omits इति। ‖‖ CD मन्तव्यः and omits इति after it.

प्राणैर्वियोजयतीति । एतदपि विद्यते बालेष्विति* । प्राणैर्वियोजयत्यपि बाले क्षमितव्यं । दिष्ट्या च मां प्राणैर्वियोजयति न धर्माद्भ्रंशयतीति क्षमितव्यम् । एतदपि विद्यते बालेष्विति लाभ एव मन्तव्यः ॥ किं चान्यत् । स्वकृतकर्मफलाभ्यागमाच्च† । स्वकृतकर्मफलाभ्यागमोऽयं मम, निमित्तमात्रं पर इति क्षमितव्यम् । किं चान्यत् । क्षमागुणांश्चानायासादीननुस्मृत्य क्षमितव्यमेवेति क्षमाधर्मः ॥ १ ॥

नीचैर्वृत्त्यनुत्सेकौ‡ मार्दवलक्षणम् । मृदुभावः§ मृदुकर्म च॥ मार्दवं मदनिग्रहो मानविघातश्चेत्यर्थः¶ । तत्र मानस्येमान्यष्टौ स्थानानि भवन्ति । तद्यथा । जातिः कुलं रूपमैश्वर्यं विज्ञानं श्रुतं लाभो वीर्यमिति । एभिर्जात्यादिभिरष्टाभिर्मदस्थानैर्मत्तः परात्मनिन्दाप्रशंसाभिरतस्तीव्राहंकारोपहतमतिरिहामुत्र चाशुभफलमकुशलं** कर्मोपचिनोत्युपदिश्यमानमपि च श्रेयो न प्रतिपद्यते । तस्मादेषां मदस्थानानां निग्रहो मार्दवं धर्म इति ॥ २ ॥

भावविशुद्धिरविसंवादनं चार्जवलक्षणम् । ऋजुभावः ऋजुकर्म वार्जवं भावदोषवर्जनमित्यर्थः । भावदोषयुक्तो ह्युपधिनिकृतिसंप्रयुक्त इहामुत्र चाशुभफलमकुशलं कर्मोपचिनोत्युपदिश्यमानमपि च श्रेयो न प्रतिपद्यते । तस्मादार्जवं धर्म इति ॥ ३ ॥

---

* D adds लाभ एव मन्तव्यः ।
† K °भ्यागम्याच्च ।
‡ D इति ।
§ C मृदुभवो ।
|| K वा ।
¶ D निर्घातश्च ।
** D अकुशलकर्म ।

अलोभः शौचलक्षणम् । शुचिभावः शुचिकर्म वा शौचं भावविशुद्धिः निःकल्मषता धर्मसाधनमाचा*ख्यनभिष्वङ्ग इत्यर्थः । अशुचिर्हि भावकल्मषसंयुक्त इहामुत्र चाशुभफलमकुशलं कर्मोपचिनोत्युपदिश्यमानमपि च श्रेयो न प्रतिपद्यते । तस्माच्छौचं धर्म इति ॥ ४ ॥

सत्यर्थे† भवं वचः सत्यं सङ्गो वा हितं सत्यम् । तदननृतमपरुष‡मपिशुनमनसभ्यमचपलमनाविलमविरलमसंभ्रान्तं मधुरमभिजातमसंदिग्धं स्फुटमौदार्ययुक्तमग्राम्यपदार्थाभि§व्याहरमसौ॥भरमरागद्वेषयुक्तं सूत्रमार्गानुसारप्रवृत्तार्थमर्थ्यमर्थिजनभावग्रहणसमर्थमात्मपरानुग्राहकं¶ निरुपधं देशकालोपपन्नमनवद्यमर्हच्छासनप्रशस्तं यतं मितं याचनं प्रच्छनं प्रश्नव्याकरणमिति सत्यं धर्मः ॥ ५ ॥

योगनिग्रहः संयमः । स** सप्तदशविधः । तद्यथा । पृथिवीकायिकसंयमः अप्कायिकसंयमः तेजस्कायिकसंयमः वायुकायिकसंयमः वनस्पतिकायिकसंयमः द्वीन्द्रियसंयमः त्रीन्द्रियसंयमः चतुरिन्द्रियसंयमः पञ्चेन्द्रियसंयमः प्रेक्ष्यसंयमः उपेक्ष्यसंयमः†† अपहृत्यसंयमः‡‡ प्रमृज्यसंयमः कायसंयमः वाक्संयमः मनःसंयमः उपकरणसंयम इति संयमो धर्मः ॥ ६ ॥

---

* K °माचादिख्य । † K सत्यार्थे । ‡ K अपुरुष ।
§ D अभिधाहारं C °र्थाभिव्याहरं । ‖ K असौनरम् ।
¶ B आत्मपरार्थानुग्राहकं । ** KD omit स ।
†† B उपेक्षसंयमः । ‡‡ C अवहृत्य ।

तपो द्विविधम् । तत्परस्ता*द्वक्ष्यते† । प्रकीर्णकं चेदमनेकविधम् । तद्यथा । यववज्रमध्ये चन्द्रप्रतिमे द्वे‡ कनकरत्नमुक्तावल्यस्तिस्रः सिंहविक्रीडिते द्वे सप्तसप्तमिकाद्याः प्रतिमाश्चतस्रः भद्रोत्तरमाचाम्लवर्धमानं सर्वतोभद्रमित्येवमादि§ । तथा द्वादश भिक्षुप्रतिमा मासिकाद्या आसप्तमासिक्याः‖ सप्त¶, सप्तरात्रिक्याः तिस्रः, अहोरात्रिकी, रात्रिकी चेति ॥ ७ ॥

बाह्याभ्यन्तरोपधिशरीरान्नपानाद्याश्रयो भावदोषपरित्यागस्त्यागः** ॥ ८ ॥

शरीरधर्मोपकरणादिषु निर्ममत्वमाकिंचन्यम् ॥ ९ ॥

व्रतपरिपालनाय ज्ञानाभिवृद्धये कषायपरिपाकाय च गुरुकुलवासो ब्रह्मचर्यमवस्तातव्यं गुर्वधीनत्वं†† गुरुनिर्देशस्थायित्वमित्यर्थः‡‡ च । पञ्चाचार्याः प्रोक्ताः प्रव्राजको दिगाचार्यः श्रुतोद्देष्टा श्रुतसमुद्देष्टा आम्नायार्थवाचक इति । तस्य ब्रह्मचर्यस्येमे विशेषगुणा भवन्ति । अब्रह्म§§विरतिव्रतभावना‖‖‖ यथोक्ता दृष्टस्वर्शरसरूप¶¶गन्धशब्दविभूषानभिनन्दित्वं चेति ॥ १० ॥

---

* IX. 19 and 20. † C वक्ष्यति । ‡ K adds द्वे before चन्द्रप्रतिमे ।

§ C puts this before भद्रोत्तरम् । ‖ K मासिकः ।

¶ B adds सप्त सप्तचतुर्दशैकविंशतिरात्रिक्यस्तिस्रः । S सूचानवबोधादुपजातधान्निना केनापि रचितमेतद् and explains how the mistake might have arisen. D Marginal notes नैदं वाचकगीतं किं तु अज्ञपठितं टीकायां तथाकथितत्वात् ।

** C adds धर्म after त्याग ।

†† K गुर्वा । ‡‡ D इत्यर्थः आचार्यग्रहणाच्च पञ्च ।

§§ K ब्रह्म for अब्रह्म । ‖‖‖ C विरतिव्रत । ¶¶ C omits रूप ।

अनित्याशरणसंसारैकत्वान्यत्वाशुचित्वास्रवसंवर-निर्जरालोकबोधिदुर्लभधर्मस्वाख्यात*तत्त्वानुचिन्तन-मनुप्रेक्षाः ॥ ७ ॥

एता द्वादशानुप्रेक्षाः । तत्र बाह्याभ्यन्तराणि शरीरशय्या-सन†वस्त्रादीनि द्रव्याणि सर्वसंयोगा‡श्चानित्या इत्यनुचिन्तयेत्§ । एवं ह्यस्य चिन्तयतः तेष्वभिष्वङ्गो न भवति‖ मा भून्मे तद्वियोगजं दुःखमित्यनित्यानुप्रेक्षा ॥ १ ॥

यथा निराश्रये जनविरहिते वनस्थलीपृष्ठे बलवता क्षुत्परिगतेनामिषैषिणा¶ सिंहेनाभ्याहतस्य मृगशिशोः शरणं न विद्यते एवं जन्मजरामरणव्याधिप्रियविप्रयोगाप्रियसंप्रयोगे-ष्वितालाभदारिद्र्यदौर्भाग्यदौर्मनस्यमरणादिसमुत्थेन दुःखेनाभ्या-हतस्य जन्तोः संसारे शरणं न विद्यत इति चिन्तयेत् । एवं ह्यस्य चिन्तयतो नित्यमशरणोऽस्मीति नित्योद्विग्नस्य** सांसारिकेषु भावेष्वनभिष्वङ्गो भवति । अर्हच्छासनोक्त एव विधौ घटते तद्धि†† परं शरणमित्यशरणानुप्रेक्षा ॥ २ ॥

अनादौ संसारे नरकतिर्यग्योनिमनुष्यामरभवग्रहणेषु चक्र-वत्परिवर्तमानस्य जन्तोः सर्व एव जन्तवः स्वजनाः परजना वा‡‡ । न हि स्वजनपरजनयोर्व्यवस्था विद्यते । माता हि भूत्वा

---

* DC स्वाख्यातत्त्वा० । † D शरीराणि शय्या० C अशन ।
‡ C संयोगश्च । § D चिन्तयेत् for अनुचिन्तयेत् ।
‖ D adds कस्मात् । ¶ क्षुत्पिपासापरिगतेन । ** K नित्योद्विग्नेषु ।
†† A तद्विपरीतं । ‡‡ K स्वजनः परजनो वा ।

भगिनी भार्या दुहिता च भवति। भगिनी भूत्वा माता भार्या दुहिता च भवति। भार्या* भूत्वा भगिनी दुहिता माता च भवति। दुहिता †भूत्वा माता भगिनी भार्या च भवति॥ तथा पिता भूत्वा भ्राता पुत्रः पौत्रश्च भवति। भ्राता भूत्वा पिता पुत्रः पौत्रश्च भवति। पौत्रो भूत्वा पिता भ्राता पुत्रश्च भवति। पुत्रो भूत्वा पिता भ्राता पौत्रश्च भवति॥ भर्ता भूत्वा दासो भवति। दासो भूत्वा भर्ता भवति। शत्रुर्भूत्वा मित्रं भवति मित्रं भूत्वा शत्रुर्भवति। पुमान्भूत्वा स्त्री भवति नपुंसकं च। स्त्री भूत्वा पुमान्नपुंसकं च भवति। नपुंसकं भूत्वा स्त्री पुमांश्च भवति‡। एवं चतुरशीति-योनिप्रमुखशतसहस्रेषु रागद्वेषमोहाभिभूतैर्जन्तुभिरनिवृत्त-विषयतृष्णैः§रन्योन्यभक्षणाभिघातवधबन्धाभियोगाक्रोशादिजनि-तानि तीव्राणि दुःखानि प्राप्यन्ते। अहो दुरन्तः कष्टस्वभावः संसार इति चिन्तयेत्। एवं॥ ह्यस्य चिन्तयतः संसारभयो-द्विग्नस्य निर्वेदो भवति। निर्विण्णश्च संसारप्रहाणाय घटत इति संसारानुप्रेक्षा॥ २॥

एक एवाहं न मे कश्चित्स्वः परो वा विद्यते। एक एवाहं जाये। एक एव म्रिये। न मे कश्चित्स्वजनसंज्ञः परजनसंज्ञो वा व्याधिजरामरणादीनि दुःखान्यपहरति प्रत्यंशहारी वा भवति। एक एवाहं स्वकृतकर्मफलमनुभवामीति चिन्तयेत्।

---

* K adds च। † C adds च। ‡ DC add इति।
§ D क्षपैः। ‖ K adds एवम्।

एवं ह्यस्य चिन्तयतः स्वजनसंज्ञकेषु स्नेहानुरागप्रतिबन्धो न भवति परसंज्ञकेषु* च द्वेषानुबन्धः। ततो निःसङ्गतामभ्युपगतो† मोक्षायैव यतत‡ इत्येकत्वानुप्रेक्षा ॥ ४ ॥

शरीरव्यतिरेकेणात्मानमनुचिन्तयेत्। अन्यच्छरीरमन्यो ऽहम् ऐन्द्रियकं शरीरमतीन्द्रियो ऽहम् अनित्यं शरीरं नित्यो ऽहम् अज्ञं शरीरं ज्ञो ऽहम् आद्यन्तवच्छरीरमनाद्यन्तो ऽहम् बह्वनि च मे शरीरशतसहस्राण्यतीतानि संसारे परिभ्रमतः स एवायमहमन्यस्मेभ्य इत्यनु§चिन्तयेत्। एवं ह्यस्य चिन्तयतः शरीरप्रतिबन्धो‖ न भवतीति अन्यश्च¶ शरीरान्नित्यो ऽहमिति निःश्रेयसे संघटत** इत्यन्यत्वानुप्रेक्षा ॥ ५ ॥

अशुचि खल्विदं शरीरमिति†† चिन्तयेत्। तत्कथमशुचीति चेदाद्युत्तरकारणाशुचित्वादशुचिभाजनत्वादशुचुद्भवत्वादशुभपरिणामपाकानुबन्धादशक्यप्रतीकारत्वाच्चेति‡‡। **तत्राद्युत्तरकारणा§§शुचित्वात्तावच्छरीरस्याद्यं कारण‖‖ शुक्रं शोणितं च** तदुभयमत्यन्ताशुचीति¶¶। उत्तरमाहारपरिणामादि। तद्यथा। कवलाहारो हि गृहीतमात्र एव श्लेष्माशयं*** प्राप्य श्लेष्मणा द्रवीकृतो ऽत्यन्ताशुचिर्भवति†††। ततः पित्ताशयं‡‡‡ प्राप्य पच्यमानो ऽस्त्री-

---

* D परजनसंज्ञकेषु। † D अभ्यागतो। ‡ CKD घटते।
§ K omits इति। ‖ D शरीरे प्रतिबन्धो। ¶ D अन्यत्वाच्च।
** CD घटत। †† C शरीरमनुचिन्तयेत्। ‡‡ D प्रतीकाराच्चेति।
§§ D करण। ‖‖ D करणं। ¶¶ D omits इति।
*** D श्लेष्माशयं। ††† C adds इति। ‡‡‡ D पित्ताशयं।

क्षतो ऽशुचिरेव भवति। पक्वो वाय्वाश्रयं* प्राप्य वायुना विभज्यते पृथक्खलः पृथक्रसः। खलान्मूत्रपुरीषादयो मलाः प्रादुर्भवन्ति रसाच्छोणितं परिणमति शोणितान्मांसम् मांसान्मेदः मेदसो ऽस्थीनि अस्थिभ्यो मज्जा† मज्जाभ्यः शुक्रमिति। सर्वं चैतत्स्रोआदि शुक्रान्तमशुचिर्भवति। तस्मादाद्युत्तरकारणाशुचित्वाद- 5 शुचिशरीरमिति॥ किं चान्यत् **अशुचिभाजनत्वात्** अशुचीनां खल्वपि भाजनं शरीरं कर्णनासाक्षिदन्तमलस्वेदश्लेष्मपित्तमूत्रपुरीषादीनामवस्करभूतं तस्मादशुचीति॥ किं चान्यत्। **अशुच्युद्भवत्वात्** एषामेव कर्णमलादीनामुद्भवः शरीरं तत उद्भवन्तीति। अशुचौ च‡ गर्भे संभवतीति अशुचि शरीरम्॥ किं 10 चान्यत्। **अशुभपरिणामपाकानुबन्धा**दार्तवे बिन्दोराधानात्प्रभृति खल्वपि शरीरं कललार्बुदपेशीघनव्यूहसंपूर्णगर्भ§कौमारयौवनस्थविरभावजनकेनाशुभपरिणामपा॥केनानुबद्धं¶ दुर्गन्धि पूतिस्वभावं दुरन्तं तस्मादशुचि॥ किं चान्यत्। **अशक्यप्रतीकारत्वात्**** अशक्यप्रतीकारं खल्वपि शरीरस्याशुचित्वमुद्वर्तनरूक्षण- 15 स्नानानुलेपनधूपप्रघर्षैः†† वासयुक्तिमाल्यादिभिरन्यस्य न शक्यमशुचित्वमपनेतुमशुच्यात्मकत्वात्शुच्युपघातकत्वाच्चेति। तस्मादशुचि शरीरमिति। एवं ह्यस्य चिन्तयतः शरीरे निर्वेदो भवति‡‡। निर्विण्णश्च शरीरप्रहाणाय घटत इति अशुचित्वानुप्रेक्षा॥ ६॥

---

* D वाय्वाश्रयं। † C मज्जानः। ‡ S. च = or. § D गर्भा।
‖ K विपाक। ¶ C अनुबन्धं। ** D अशक्यप्रतीकारात्।
†† K प्रकर्ष, C om. धूप। ‡‡ C भवतीति।

Padumawati, Fasc. 1-4 @ 2/	Rs.	8	0
Pariçiṣṭa Parvan, (Text) Fasc. 1-5 @ /6/ each		1	14
Prākṛita-Paingalam, Fasc. 1-7 @ /6/ each		2	10
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each		2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc.		12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each		1	8
Ditto (English) Fasc. 1-3 @ /12/ each		2	4
Sraddha Kriya Kaumudi, Fasc. 1-5		1	14
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each		7	2
Trantra Vartika (English) Fasc. 1-2 @ /12/		1	8
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each		14	4
Tattvarthadhigama Sutrom, Fasc. 1		0	6
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/		1	2
Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-6 @ /6/ each ...		2	4
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/		4	8
Vallala Carita, Fasc. 1		0	6
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1-6 @ /6/		2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each		4	8
Vidhano Parigata, Fasc. 1-4		1	8
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 2-6 @ /6/		1	14
Vṛhat Svayambhū Purāṇa, Fasc. 1-6		2	4
Tibetan Series.			
Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5 @ 1/ each		13	0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each		10	0
Arabic and Persian Series.			
'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/		2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each		37	0
Ditto English Fasc, 1-8 @ 1/ each		8	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each		3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12@ /6/ each		13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each	1	14
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6 each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto Ditto (English) Fasc. 1–4	3	0
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Fīrūzshāhi, of Shāms-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vols. XIX and XX @ 10/ each	20	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/per No. to Non-Members.		
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar „ „	8	0
16.	Kaçmīraçabdāmṛta, Parts I and II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

28-6-04.

Books are supplied by V.-P.P.

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1118.



तत्त्वार्थाधिगमसूत्रम् ।

TATTVÂRTHÂDHIGAMA.

BY

UMÂSVÂTI

BEING

IN THE ORIGINAL SANSKRIT

WITH THE

BHÂṢYA BY THE AUTHOR HIMSELF.

EDITED BY

MODY KESHAVLAL PREMCHAND, B.A., LL.B.

TEXT AND BHÂṢYA.

VOL. I. FASCICULUS III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1905.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,

15, PICCADILLY, LONDON, W., AND MR. OTTO

HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1-2		0	12
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 and Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 2-5 @ /6/ each		1	8
Aphorisms of Śāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1-6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1-5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2-5 ; Vol. II. Fasc. 1-5 @ 1/ each		9	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1		0	6
Baudhayana Sranta Sutra, Fasc. 1-2 @ /6/ each		0	12
*Bhāmatī, (Text) Fasc. 4-8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-5		1	14
Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1-3		1	2
Catadusani, Fasc. 1-2		0	12
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...		8	0
Çatapatha Brāhmaṇa, Vol. I. Fasc. 1-7; Vol. III, Fasc. 1-5 ...		4	8
Çatasahasrika-prajnaparamita (Text) Part I, Fasc. 1-8 @ /6/ each ...		3	0
*Caturvarga Chintāmani (Text) Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each ; Vol IV, Fasc. 1-3		21	0
Çlokavartika, (English) Fasc. 1-5		3	2
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-17 @ /6/ each ...		5	4
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4 @ /6/ each ; Vol 4, Fasc. 1		6	0
Çrī Bhāshyam, (Text) Fasc. 1-3 @ /6/ each		1	2
Dan Kriya Kaumudi, Fasc. 1-2		0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1-7...		2	10
Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1-6		2	4
Kātantra, (Text) Fasc. 1-6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1-9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1-9 & Vol. II, Fasc. 1-12 @ /6/ each		7	14
Manuṭīkā Saṃgraha, (Text) Fasc. 1-3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-8 @ /12 each		6	0
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nyāyavārtika, (Text) Fasc. 1-6 @ /6/		2	4
*Nirukta, (Text) Vol. III, Fasc. 1-6 ; Vol. IV, Fasc. 1-8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. 1-7 (Text) @ /6/		2	10
Nityacarapradiph Fasc. 1-5		1	14
Nyayabindutīkā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6 Vol. II, Fasc. 1-3 @ /6/ each		3	6

आस्रवानिहामुत्रापाय*युक्तान्महानदीस्रोतोवेगतीक्ष्णानकुशलागमकुशलनिर्गमद्वारभूतानिन्द्रियादीनवद्यतश्चिन्तयेत् । तद्यथा । स्पर्शनेन्द्रियप्रसक्तचित्तः सिद्धोऽनेकविद्याबलसंपन्नोऽप्याकाशगोऽष्टाङ्गमहानिमित्तपारगो गार्ग्यः सत्यकिर्निधनमाजगाम† । तथा प्रभूतयवसोदकप्रमाथावगाहादिगुणसंपन्नवनविचारिणश्च‡ मदोत्कटा बलवन्तोऽपि हस्तिनो हस्तिबन्धकीषु स्पर्शनेन्द्रियसक्तचित्ता ग्रहणमुपगच्छन्ति । ततो बन्धवधदमनवाहनाङ्कुशपार्ष्णिप्रतोदाभिघातादिजनितानि तीव्राणि दुःखान्यनुभवन्ति । नित्यमेव स्वयूथस्य§ स्वच्छन्दप्रचारसुखस्य‖ ¶वनवासस्यानुस्मरन्ति । तथा मैथुनसुखप्रसङ्गादाहित**गर्भाश्वतरी प्रसवकाले प्रसवितुमशक्नुवती तीव्रदुःखाभिहतावशा†† मरणमभ्युपैति । एवं सर्व एव स्पर्शनेन्द्रियप्रसक्ता इहामुत्र च विनिपातमृच्छन्तीति‡‡ ॥ तथा जिह्वेन्द्रियप्रसक्ता मृतहस्तिशरीरस्थस्रोतोवेगोढवायसवत्§§ हैमन|||घृतकुम्भप्रविष्टमूषिकवत् गोष्ठप्रसक्तकृदवासिकूर्मवत्¶¶ मांसपेसीलुब्धश्येनवत् बडिशामिषगृद्ध***मत्स्यवच्चेति ॥ तथा घ्राणेन्द्रियप्रसक्ता ओषधिगन्धलुब्धपन्नगवत् पललगन्धानुसारिमू-

---

* C पाप for अपाय । † SD उपजगाम for आजगाम ।

‡ K वनचारिणश्च । § C omits. ‖ K सुखस्य for सुखस्य ।

¶ D adds च । ** D प्रसंगाहित ।

†† D अभिघाता अवशा मरणं K अवसान C अवश्य० ।

‡‡ D अर्छन्तीति ।

§§ *Cf. Pariśiṣṭaparvan* II 380 ff. D वगाढ for वेगोढ ।

||| C हेमन्त । ¶¶ cf. Pancatantra I. 13. *** D गृध्र ।

षिकवच्चेति ॥ तथा चक्षुरिन्द्रियप्रसक्ताः स्त्रीदर्शनप्रसङ्गादर्जुनकचोरवत् दीपालोकलोलपतङ्गवद्विनिपातमृच्छन्तीति चिन्तयेत् ॥ तथा श्रोत्रेन्द्रियप्रसक्तास्तित्तिरकपोतकपिञ्जलवत् गीतसंगीतध्वनिलोलमृगवद्विनिपातमृच्छन्तीति चिन्तयेत्। एवं हि चिन्तयन्नास्रवनिरोधाय घटत इति आस्रवानुप्रेक्षा ॥ ७ ॥

संवरांश्च महाव्रतादीन्गुप्त्यादिपरिपालनाद्गुणतश्चिन्तयेत्*। सर्वे ह्येते यथोक्तास्रवदोषाः† संवृतात्मनो न भवन्तीति चिन्तयेत्। एवं ह्यस्य चिन्तयतो मतिः संवरायैव घटत इति संवरानुप्रेक्षा ॥ ८ ॥

निर्जरा वेदना विपाक इत्यनर्थान्तरम्। स द्विविधो ऽबुद्धिपूर्वः कुशलमूलश्च। तत्र नरकादिषु कर्मफलविपाको यो ऽबुद्धिपूर्वकस्तमवद्यतो ऽनुचिन्तयेदकुशलानुबन्ध इति। तपःपरीषहजयकृतः कुशलमूलः। तं गुणतो ऽनुचिन्तयेत्। शुभानुबन्धो निरनुबन्धो वेति। एवमनुचिन्तयन्कर्मनिर्जरणायैव‡ घटत इति निर्जरानुप्रेक्षा ॥ ९ ॥

पञ्चास्तिकायात्मकं§ विविधपरिणाममुत्पत्तिस्थित्यन्यतानुग्रहप्रलययुक्तं लोकं चिरस्वभावमनुचिन्तयेत्। एवं ह्यस्य चिन्तयतस्तत्त्वज्ञानविशुद्धिर्भवतीति लोकानुप्रेक्षा ॥ १० ॥

---

* S probably महाव्रतादिगुप्त्यादिपरिपालनान् गुणवधिः C परिपालनाय गुणत॰ ।

† D यथोक्ता आस्रवजनिता दोषाः। ‡ K निर्जरायैव ।

§ K & C add च D कायात्मकं for अस्तिकायात्मकं ।

अनादौ संसारे नरकादिषु तेषु* भवग्रहणेष्वनन्तकृत्वः परिवर्तमानस्य जन्तोर्विविधदुःखाभिहतस्य मिथ्यादर्शनाद्युपहतमतेर्ज्ञानदर्शनावरणमोहान्तरायोदयाभिभूतस्य सम्यग्दर्शनादिविशुद्धो† बोधिर्दुर्लभो भवतीत्यनुचिन्तयेत् । एवं ह्यस्य बोधिदुर्लभत्वमनुचिन्तयतो बोधिं प्राप्य प्रमादो न भवतीति बोधिदुर्लभत्वानुप्रेक्षा ॥ ११ ॥

सम्यग्दर्शनद्वारः पञ्चमहाव्रतसाधनो द्वादशाङ्गोपदिष्टतत्त्वो गुप्त्यादिविशुद्धव्यवस्थानः संसारनिर्वाहको निःश्रेयसप्रापको भगवता परमर्षिणार्हताहो स्वाख्यातो‡ धर्म इत्येवमनुचिन्तयेत् । एवं ह्यस्य धर्मस्वाख्यातत्वमनुचिन्तयतो मार्गाच्यवने तदनुष्ठाने च व्यवस्थानं भवतीति‖ धर्मस्वाख्यात¶तत्त्वानुचिन्तनानुप्रेक्षाः ॥ १२ ॥

उक्ता अनुप्रेक्षाः । परीषहान्वक्ष्यामः** ।

मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः ॥ ८ ॥

सम्यग्दर्शनादेर्मोक्षमार्गादच्यवनार्थं कर्मनिर्जरार्थं च परिषोढव्याः परीषहा†† इति । तद्यथा ।

---

* C तेषु twice.
† Var. S. सम्यग्दर्शनादिर्विशुद्धो ।
‡ C व्याख्यातो ।
§ CD धर्मस्वाख्यातत्त्व ।
‖ K omits इति ।
¶ C ~~धर्मस्वाख्यातत्त्व~~ D ~~धर्मस्वाख्यातत्त्वानुप्रेक्षा~~ ।
** K add इति ।
†† D puts इति before परीषहाः ।

क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्या-निषद्याशय्या*क्रोशवधयाचनालाभरोगतृणस्पर्शमल-सत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि ॥ ९ ॥

क्षुत्परीषहः पिपासा शीतं उष्णं दंशमशकं नाग्न्यं अरतिः स्त्रीपरीषहः चर्यापरीषहः निषद्या शय्या आक्रोशः वधः याचनं अलाभः रोगः तृणस्पर्शः मलं† सत्कारपुरस्कारः प्रज्ञाज्ञाने ऽदर्शनपरीषह इत्येते द्वाविंशतिर्धर्म‡विघ्नहेतवो यथोक्तं प्रयोजनमभिसंधाय रागद्वेषौ निहत्य परीषहाः परिषोढव्या भवन्ति ।

पञ्चानामेवं§ कर्मप्रकृतीनामुदयादेते परीषहाः प्रादुर्भवन्ति। तद्यथा‖ । ज्ञानावरणवेदनीयदर्शनचारित्रमोहनीयान्तरायाणामिति ।

सूक्ष्मसंपरायच्छद्मस्थवीतरागयोश्चतुर्दश ॥ १० ॥

सूक्ष्मसंपरायसंयते छद्मस्थवीतरागसंयते च¶ चतुर्दश परीषहा भवन्ति** क्षुत्पिपासाशीतोष्णदंशमशकचर्याप्रज्ञाज्ञानालाभ††शय्यावधरोगतृणस्पर्शमलानि ।

---

* P शय्या । † D मलः । ‡ D द्वाविंशति धर्म० ।
§ KD add च । ‖ D omits.
¶ DC omit च । ** K सन्ति ।
†† C puts अलाभ before प्रज्ञा D puts अलाभ after वध ।

एकादश जिने ॥ ११ ॥

एकादश परीषहाः संभवन्ति जिने वेदनीयाश्रयाः । तद्यथा । क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्श-मलपरीषहाः ।

बादरसंपराये सर्वे ॥ १२ ॥

बादरसंपरायसंयते सर्वे द्वाविंशतिरपि परीषहाः संभवन्ति ।

ज्ञानावरणे प्रज्ञाज्ञाने ॥ १३ ॥

ज्ञानावरणोदये* प्रज्ञाज्ञानपरीषहौ भवतः ।

दर्शनमोहान्तराययोरदर्शनालाभौ ॥ १४ ॥

दर्शनमोहान्तराययोरदर्शनालाभौ† यथासङ्ख्यं दर्शनमोहोदये ऽदर्शनपरीषहः लाभान्तरायोदये ऽलाभपरीषहः ।

चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचना-सत्कारपुरस्काराः ॥ १५ ॥

चारित्रमोहोदये एते नाग्न्यादयः सप्त परीषहा भवन्ति ।

वेदनीये शेषाः ॥ १६ ॥

वेदनीयोदये शेषा एकादश परीषहा भवन्ति ये जिने संभवन्तीत्युक्तम् । कुतः शेषाः । एभ्यः प्रज्ञाज्ञानादर्शनालाभ-नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्कारेभ्य इति ।

---

* D ज्ञानावरणीयोदये । † AC omit this : whole S not clear.

एकादयो भाज्या युगपदेकोनविंशतेः* ॥ १७ ॥

एषां द्वाविंशतेः परीषहाणामेकादयो भजनीया युगपदेकस्मिन् जीवे आ एकोनविंशतेः† । अत्र शीतोष्णपरीषहौ युगपन्न भवतः । अत्यन्तविरोधित्वात् । तथा चर्याशय्यानिषद्यापरीषहाणामेकस्य सम्भवे द्वयोरभावः ॥

सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातानि‡ चारित्रम् ॥ १८ ॥

सामायिकसंयमः छेदोपस्थाप्यसंयमः परिहारविशुद्धिसंयमः सूक्ष्मसंपरायसंयमः यथाख्यातसंयम इति पञ्चविधं चारित्रम् । तत्पुलाकादिषु विस्तरेण वक्ष्यामः ।

अनशनावमौदर्यवृत्तिपरिसङ्ख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशाः§ बाह्यं तपः ॥ १९ ॥

अनशनं अवमौदर्यं वृत्तिपरिसङ्ख्यानं रसपरित्यागः विविक्तशय्यासनता कायक्लेश इत्येतत्षड्विधं बाह्यं तपः । सम्यग्योगनिग्रहो गुप्तिरित्यतः [IX. 4] प्रभृति‖ सम्यगित्यनुवर्तते । संयमरक्षणार्थं कर्मनिर्जरार्थं च चतुर्थषष्ठाष्टमादि सम्यगनशनं तपः ॥

---

* KAP & C add आ before युगप० B.K भाज्या युगपदेकस्मिन्नेकोनविंशतेः ।

† D एकोनविंशतिभ्यः । ‡ Var S and K. केचिच्छिन्नपदमेव सूत्रमभिधीयते ।

§ K शय्यासनताक्लेशा D ०शय्यासनता कायक्लेशा । ‖ C प्रभृते ।

अवमौदर्यम् अवममित्यूननाम* । अवममुदरमस्य अवमोदरः अवमोदरस्य भावः अवमौदर्यम्† । उत्कृष्टावकृष्टौ‡ वर्जयित्वा मध्यमेन कवलेन त्रिविधमवमौदर्यं भवति । तद्यथा । अल्पाहारावमौदर्यमुपार्धावमौदर्यं§ प्रमाणप्राप्तात्किंचिदूनावमौदर्यमिति कवलपरिसङ्ख्यानं च‖ प्राग्द्वात्रिंशद्भ्यः कवलेभ्यः ॥

वृत्तिपरिसङ्ख्यानमनेकविधम् । तद्यथा । उत्क्षिप्तान्तप्रान्तचर्यादीनां सक्तुकुल्माषौदनादीनां¶ चान्यतममभिगृह्यावशेषस्य** प्रत्याख्यानम् ॥

रसपरित्यागो ऽनेकविधः । तद्यथा । मद्यमांसमधुनवनीतादीनां रसविकृतीनां प्रत्याख्यानं विरसरूक्षाद्यभिग्रहश्च ॥

विविक्तशय्यासनता नाम एकान्ते ऽनाबाधे†† ऽसंसक्ते स्त्रीपशुषण्डक‡‡विवर्जिते शून्यागारदेवकुलसभापर्वतगुहादीनामन्यतमस्मिन् समाध्यर्थं संलीनता ॥

कायक्लेशो ऽनेकविधः । तद्यथा । स्थानवीरासनोत्कुटुका§§-सनैकपार्श्वदण्डायतशयनातापनाप्रावृतादीनि‖‖‖ सम्यक्प्रयुक्तानि बाह्यं तपः । अस्मात्षड्विधादपि¶¶ बाह्यात्तपसः सङ्गत्यागशरीरलाघवेन्द्रियविजयसंयमरक्षण***कर्मनिर्जरा भवन्ति ॥

---

* KD °त्यूनं नाम । † K अवमौदार्यं C अवमोदर्यं ।
‡ C adds च D उत्कृष्टानुत्कृष्टौ । § D अपार्धावमौदर्यं । ‖ D परिसङ्ख्या च ।
¶ D कुल्माषोदनादीनां । ** चान्यत् समभिगृह्य । †† D अनबाधे ।
‡‡ C षण्ड । §§ K उत्कुटुक D उत्कटुकासन S उत्कुटुक (not explained).
‖‖‖ S अप्रावरण । ¶¶ K अस्मात्तु । *** K संरक्षण ।

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥ २० ॥

सूत्रक्रमप्रामाण्यादुत्तरमित्यभ्यन्तरमाह*। प्रायश्चित्तं विनयो वैयावृत्यं स्वाध्यायो व्युत्सर्गो ध्यानमित्येतत्षड्विधमभ्यन्तरं तपः ॥

नवचतुर्दशपञ्चद्विभेदं यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥

तदभ्यन्तरं तपः नवचतुर्दशपञ्चद्विभेदं भवति यथाक्रमं प्राग्ध्यानात्। इत उत्तरं यदुच्यामः। तद्यथा।

आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनानि† ॥ २२ ॥

प्रायश्चित्तं नवभेदम्। तद्यथा। आलोचनं प्रतिक्रमणं आलोचनप्रतिक्रमणे विवेकः व्युत्सर्गः तपः छेदः परिहारः उपस्थापनमिति‡ ॥

आलोचनं प्रकटनं§ प्रकाशनमाख्यानं प्रादुःकरणमित्यनर्थान्तरम्। प्रतिक्रमणं‖ मिथ्यादुःकृतसंप्रयुक्तः प्रत्यवमर्शः¶ प्रत्याख्यानं कायोत्सर्गकरणं च। एतदुभयमालोचनप्रतिक्रमणे। विवेको विवेचनं विशोधनं प्रत्युपेक्षणमित्यनर्थान्तरम्**। स एष संसक्तान्न-

---

* K omits आह। † D उपस्थानानि। ‡ D उपस्थानमिति।
§ C विकटं D विवरणं for प्रकटनं। ‖ K परिक्रमणं।
¶ D °संप्रयुक्तप्रत्यवमर्शः। ** K प्रत्यवेक्षणम् D प्रत्युपेक्षेपणं।

पानोपकरणादिषु* भवति । **व्युत्सर्गः** †प्रतिस्थापनमित्यनर्थान्तरम् । एषोऽप्यनेषणीयान्नपानोपकरणादिष्वशङ्कनीय‡विवेकेषु च भवति । **तपो** बाह्यमनशनादि प्रकीर्णं§ चानेकविधं चन्द्रप्रतिमादि । **छेदो** ऽपवर्तनमपहार इत्यनर्थान्तरम् । स प्रव्रज्यादिवस‖पञ्चमासषंवत्सराणामन्यतमेषां भवति । **परिहारो** मासिकादिः । **उपस्थापनं** पुनर्दीक्षणं पुनश्चरणं पुनर्व्रतारोपणमित्यनर्थान्तरम् । तदेतन्नवविधं प्रायश्चित्तं देशं कालं शक्तिं संहननं संयमविराधनां च कायेन्द्रियजातिगुणोत्कर्षतां च प्राप्य विशुद्ध्यर्थं यथार्हं दीयते चाचर्यते ¶च । चितौ संज्ञानविशुद्धोधातुः तस्य चित्तमिति भवति **निष्ठान्तमौणादिकं च ॥

एवमेभिरालोचनादिभिः कृच्छ्रैस्तपोविशेषैर्जनिताप्रमादः तं व्यतिक्रमं प्रायश्चेतयति चेतयंश्च न पुनराचरतीति । ततः प्रायश्चित्तम् । अपराधो वा [१]प्रायस्तेन विशुध्यत इति । अतश्च प्रायश्चित्तमिति ॥

ज्ञानदर्शनचारित्रोपचाराः ॥ २३ ॥

विनयश्चतुर्भेदः । तद्यथा । ज्ञानविनयः दर्शनविनयः चारित्रविनयः उपचारविनयः†† । तत्र **ज्ञानविनयः** पञ्चविधः

---

* C संसक्तान्नपानोपरि(धि)शय्यादिषु । † SD प्रतिष्ठापनम् ।
‡ SD अशकनीय । § D प्रकीर्णकं वा ।
‖ C प्रव्रज्यादिवसादिपञ्च । ¶ C च चर्यते च ।
** D निष्टातम् । †† CD add इति ।

---

१ S प्रायः शब्देन वापराधो ऽभिधीयते । तेनालोचनादिना ।

मतिज्ञानादिः। **दर्शनविनयः** एकविध एव सम्यग्दर्शनविनयः। **चारित्रविनयः** पञ्चविधः सामायिकविनयादिः। **औपचारिकविनयो** ऽनेकविधः सम्यग्दर्शनज्ञानचारित्रादिगुणाधिकेष्वभ्युत्थानासनप्रदानवन्दनानुगमादिः*। विनीयते तेन तस्मिन्वा विनयः† ॥

आचार्योपाध्यायतपस्विशैक्षक‡ग्लानगणकुलसङ्घसाधुसमनोज्ञानाम् ॥ २४ ॥

वैयावृत्त्यं दशविधं। तद्यथा§। आचार्यवैयावृत्त्यं उपाध्यायवैयावृत्त्यं तपस्विवैयावृत्त्यं शैक्षकवैयावृत्त्यं ग्लानवैयावृत्त्यं कुलवैयावृत्त्यं गणवैयावृत्त्यं सङ्घवैयावृत्त्यं साधुवैयावृत्त्यं समनोज्ञवैयावृत्त्यमिति। व्यावृत्तभावो वैयावृत्त्यं‖ व्यावृत्तकर्म च¶। तत्राचार्यः पूर्वोक्तः पञ्चविधः। आचारगोचरविनयं स्वाध्यायं वाचा**र्यादनु तस्मादुपाधीयत इत्युपाध्यायः। सङ्गृह्योपग्रहानुग्रहार्थं ††चोपाधीयते[1] सङ्गृहादीन्वास्योपाध्येतीत्युपाध्यायः। द्विसङ्गृहो निर्ग्रन्थ आचार्योपाध्यायसङ्गृहः। त्रिसङ्गृहा निर्ग्रन्थी आचार्योपाध्यायप्रवर्तिनीसङ्गृहा। प्रवर्तिनी दिगाचार्येण व्याख्याता। हिताय प्रवर्तते प्रवर्तयति चेति प्रवर्तिनी।

---

* D अनुगमानादिः।
† D तेनास्मिन्चेति विनयः।
‡ D ग्लिचक।
§ D omits तद्यथा।
‖ C adds इनि।
¶ C व्यावृतकर्म वा।
** D चाचार्यादनु K पश्चाचार्यादनु।
†† D चोपधीयते।

---

१ S सेव्यते। २ S स्मरति।

*विप्रकृष्टोग्रतपोयुक्तस्तपस्वी । अचिरप्रव्रजितः ग्लेच्यितव्यः ग्लेच्यः ग्लेच्यामर्हतीति ग्लैच्यो† वा । ग्लानः प्रतीतः । गणः स्थविरसन्ततिसंस्थितिः । कुलमाचार्यसन्ततिसंस्थितिः । सङ्घश्चतुर्विधः श्रमणादिः‡ । साधवः संयताः । संभोगयुक्ताः समनोज्ञाः । एषामन्नपानवस्त्रपात्रप्रतिश्रयपीठफलकसंस्तारादिभिर्धर्मसाधनैरुपग्रहः शुश्रूषा भेषजक्रिया कान्तारविषमदुर्गोपसर्गेष्वभ्युपपत्तिः§ इत्येतदादि वैयावृत्त्यम् ॥

वाचनाप्रच्छनानुप्रेक्षाम्नायधर्मोपदेशाः‖ ॥ २५ ॥

स्वाध्यायः पञ्चविधः । तद्यथा । वाचना प्रच्छनं¶ अनुप्रेक्षा आम्नायः धर्मोपदेश इति । तत्र **वाचनं** ग्रन्थाध्यापनम् । **प्रच्छनं** ग्रन्थार्थयोः । **अनुप्रेक्षा** ग्रन्थार्थयोरेव मनसाभ्यासः । **आम्नायो** घोषविशुद्धं परिवर्तनं** गुणनं रूपदान††मित्यर्थः । अर्थोपदेशो व्याख्यानमनुयोग‡‡वर्णनं **धर्मोपदेश** इत्यनर्थान्तरम् ।

बाह्याभ्यन्तरोपध्योः ॥ २६ ॥

---

* D विप्रकृष्ट ।

† C ग्लेच्यः and ग्लैच्यः D ग्लेच्यः ग्लेच्यामर्हतीति ग्लैचिक ग्लैचो वा ।

‡ D श्रवणादिः ।

§ C अभ्यवपत्ति, D अभ्यपपत्तिः ।

‖ K धर्मोपध्यायाः ।

¶ D प्रच्छना ।

** K परिवर्त्तितम् ।

†† B रूपदानम् ।

‡‡ K अनयोगोपवर्णनम्, C अनुयोगो ।

व्युत्सर्गो द्विविधः बाह्यो ऽभ्यन्तरश्च। तत्र बाह्यो द्वादशरूपकल्पो*पधेः। अभ्यन्तरः शरीरस्य कषायाणां चेति ॥

उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानम् ॥ २७ ॥

उत्तमसंहननं वज्रर्षभमर्धवज्रनाराचं च। तद्युक्तस्यैकाग्रचिन्तानिरोधश्च ध्यानम् ॥

आमुहूर्तात् ॥ २८ ॥

तद्ध्यानमामुहूर्ताद्भवति परतो न भवति दुर्ध्यानत्वात् ॥

आर्तरौद्रधर्मशुक्लानि ॥ २९ ॥

तच्चतुर्विधं भवति। तद्यथा। आर्तं रौद्रं धर्मं‡ शुक्लमिति। तेषाम्

परे मोक्षहेतू ॥ ३० ॥

तेषां चतुर्णां ध्यानानां परे धर्मशुक्ले मोक्षहेतू भवतः पूर्वे त्वार्तरौद्रे संसारहेतू इति ॥

अत्राह। किमेषां लक्षणमिति। अत्रोच्यते

आर्तममनोज्ञानां सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥ ३१ ॥

---

* D रूपिकस्य। † K वज्रर्षभं नाराचं च, D उत्तमसंहननं चतुर्विधं वज्रर्षभनाराचं ऋषभनाराचं नाराचमर्धनाराचं च।

‡ D धर्म्यं here and hereafter.

अमनोज्ञानां विषयाणां संप्रयोगे तेषां विप्रयोगार्थं यः स्मृतिसमन्वाहारो भवति तदार्तध्यानमित्याचक्षते । किं चान्यत्

वेदनायाश्च ॥ ३२ ॥

वेदनायाश्चामनोज्ञायाः संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहार आर्तमिति । किं चान्यत्

विपरीतं मनोज्ञानाम् ॥ ३३ ॥

मनोज्ञानां विषयाणां मनोज्ञायाश्च वेदनाया विप्रयोगे तत्संप्रयोगाय* स्मृतिसमन्वाहार आर्तम् । किं चान्यत्

निदानं च ॥ ३४ ॥

कामोपहतचित्तानां पुनर्भवविषयसुखगृद्धानां निदानमार्तध्यानं भवति ।

तदविरतदेशविरतप्रमत्तसंयतानाम् ॥ ३५ ॥

तदेतदार्तध्यानमविरतदेशविरतप्रमत्तसंयतानामेव भवति ।

हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ॥ ३६ ॥

हिंसार्थमनृतवचनार्थं स्तेयार्थं विषयसंरक्षणार्थं च स्मृतिसमन्वाहारो रौद्रध्यानं† तदविरतदेशविरतयोरेव भवति‡ ।

---

* S perhaps तत्संप्रयोगार्थः, K तद्विप्रयोगाय ।

† D रौद्रं ध्यानम् । ‡ C भवतीति ।

आज्ञापायविपाकसंस्थानविचयाय धर्ममप्रमत्तसंयतस्य ॥ ३७ ॥

आज्ञाविचयाय अपायविचयाय विपाकविचयाय संस्थानविचयाय च* स्मृतिसमन्वाहारो धर्मध्यानम्। तद्प्रमत्तसंयतस्य भवति। किं चान्यत्

उपशान्तक्षीणकषाययोश्च ॥ ३८ ॥

उपशान्तकषायस्य क्षीणकषायस्य च धर्मं ध्यानं भवति। किं चान्यत्

शुक्ले चाद्ये[१] ॥ ३९† ॥

शुक्ले चाद्ये ध्याने पृथक्त्ववितर्कैकत्ववितर्के ‡चोपशान्तक्षीणकषाययोर्भवतः। आद्ये शुक्ले ध्याने पृथक्त्ववितर्कैकत्ववितर्के पूर्वविदो भवतः।

परे केवलिनः ॥ ४० ॥

परे द्वे शुक्ले§ ध्याने केवलिन एव भवतः न च्छद्मस्थस्य।

---

* D omits च।
‡ CD omit च।
† P शुक्ले चाद्ये पूर्वविदः ॥ ३९ ॥
§ CD शुक्ले।

---

१ SH भाष्यकारस्तु पूर्वविद इति सूत्रावयवं पृथक्त्वितर्कोति सम्बन्धयति वा एवमेते शुक्लध्याने पूर्वविदो भवतः पूर्वविदौ यावुपशान्तक्षीणकषायौ तयोर्भवतः सूत्रान्तरमिव व्याचष्टे न तु परमार्थतः पृथक् सूत्रम् पूर्वप्रणयनात्।

अत्राह । उक्तं भवता पूर्वे शुक्ले ध्याने* परे शुक्ले ध्याने† इति‡ । तत्कानि तानीति । अत्रोच्यते

पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवृत्तीनि§ ॥ ४१ ॥

पृथक्त्ववितर्कं॥ एकत्ववितर्कं सूक्ष्मक्रियाप्रति¶पाति व्युपरतक्रियानिवृत्तीति चतुर्विधं शुक्लध्यानम्** ।

तत्र्येककाययोगायोगानाम् ॥ ४२ ॥

तदेत††च्चतुर्विधं शुक्ल‡‡ध्यानं त्रियोगस्यान्यतमयोगस्य§§ काययोगस्यायोगस्य च यथासङ्ख्यं भवति । तत्र त्रियोगानां पृथक्त्ववितर्कमेकान्यतमयोगानामेकत्ववितर्कं काययोगानां सूक्ष्मक्रियमप्रतिपात्ययोगानां व्युपरतक्रियम|||निवृत्तीति ।

एकाश्रये सवितर्के पूर्वे ॥ ४३ ॥

एकद्रव्याश्रये सवितर्के पूर्वे ध्याने प्रथमद्वितीये । तत्र सविचारं प्रथमम् ।

अविचारं द्वितीयम्¶¶ ॥ ४४ ॥

---

* D शुक्लध्याने । † D शुक्लध्याने । ‡ D omits इति ।
§ D निवर्ती°नि, DCK every where निवर्त्ति not निवृत्ति ।
॥ C पृथक्त्ववितर्कैकत्व । ¶ C सूक्ष्मक्रियमप्रतिपाति ।
** चतुर्विधं ध्यानं शुक्लं । †† C तदेवं ।
‡‡ DC शुक्लं । §§ D एकान्यतमयोगस्य ।
||| C क्रियानिवृत्तीति । ¶¶ P doubts whether this is a sutra.

अविचारं सवितर्कं द्वितीयं ध्यानं भवति ॥

अत्राह। वितर्कविचारयोः कः प्रतिविशेष इति। अत्रोच्यते

वितर्कः श्रुतम्* ॥ ४५ ॥

यथोक्तं श्रुतज्ञानं वितर्को भवति ॥

विचारोऽर्थव्यञ्जनयोगसंक्रान्तिः ॥ ४६ ॥

अर्थव्यञ्जनयोगसंक्रान्तिर्विचार इति।

एतदभ्यन्तरं तपः संवरत्वादभिनवकर्मोपचयप्रतिषेधकं निर्जरणफलत्वात्कर्मनिर्जरकम्। अभिनवकर्मोपचयप्रतिषेधकत्वात्पूर्वोपचितकर्मनिर्जरकत्वाच्च निर्वाणप्रापकमिति ॥

अत्राह। उक्तं भवता परीषहजयात्तपसोऽनुभाव[१]तश्च कर्मनिर्जरा† भवतीति‡। तत्किं सर्वे सम्यग्दृष्टयः समनिर्जरा आहोस्विदस्ति कश्चित्प्रतिविशेष इति। अत्रोच्यते

सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसङ्ख्येयगुणनिर्जराः ॥ ४७ ॥

सम्यग्दृष्टिः श्रावकः विरतः अनन्तानुबन्धिवियोजकः दर्शनमोहक्षपकः[२] मोहोपशमकः उपशान्तमोहः मोहक्षपकः

---

* श्रुति। † C निर्जरण। ‡ K भवति। § KD उपशमक।

---

१ तपसः is ablative अनुभाव=विपाक।

२ मोहक्षपक=क्षयणोपशमनक्रियाविषयोर्ग्रहणम् ॥

क्षीणमोहः जिन इत्येते दश क्रमशो ऽसङ्ख्येयगुणनिर्जरा भवन्ति । तद्यथा । सम्यग्दृष्टेः श्रावको ऽसङ्ख्येयगुणनिर्जरः* श्रावकाद्विरतः विरताद्दनन्तानुबन्धिवियोजक इत्येवं शेषाः ॥

पुलाकबकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ॥ ४८ ॥

पुलाको बकुशः कुशीलो निर्ग्रन्थः स्नातक इत्येते पञ्च† निर्ग्रन्थविशेषा भवन्ति । तत्र सततमप्रतिपातिनो जिनोक्तादागमान्निर्ग्रन्थ**पुलाकाः** । नैर्ग्रन्थ्यं प्रति प्रस्थिताः शरीरोपकरणविभूषानुवर्तिन ऋद्धियशस्कामाः सातगौरवाश्रिता अविविक्तपरिवाराश्छेदशबलयुक्ता निर्ग्रन्था‡ **बकुशाः** । कुशीला द्विविधाः प्रतिसेवनाकुशीलाः§ कषायकुशीलाश्च । तत्र प्रतिसेवनाकुशीला नैर्ग्रन्थ्यं प्रति प्रस्थिता ‖अनियतेन्द्रियाः¶ कथंचित्किंचिदुत्तरगुणेषु विराधयन्तश्चरन्ति ते** **प्रतिसेवनाकुशीलाः** । येषां तु†† संयतानां मनाक् कथंचित्संज्वलनकषाया उदीर्यन्ते ते **कषायकुशीलाः** । ये वीतरागच्छद्मस्था ईर्यापथप्राप्तास्ते **निर्ग्रन्थाः** । ईर्या योगः पन्थाः संयमः योगसंयमप्राप्ता इत्यर्थः । सयोगाः शैलेशीप्रतिपन्नाश्च‡‡ केवलिनः **स्नातका** इति ॥

---

* D असंख्येयगुणः निर्जरः ।
‡ K omits निर्ग्रन्था । C निर्ग्रन्थबकुशाः ।
‖ K adds ये ।
** C omits ते ।
‡‡ C शैलेशीं ।
† C पञ्चविधा ।
§ K adds च ।
¶ C अनियमितेन्द्रि० ।
†† D omits तु ।

संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपातस्थान-विकल्पतः साध्याः* ॥ ४९ ॥

एते पुलाकादयः पञ्च निर्ग्रन्थविशेषा एभिः संयमादिभिरनुयोगविकल्पैः† साध्या भवन्ति । तद्यथा ।

संयमः । कः कस्मिन्संयमे भवतीति । उच्यते । पुलाकबकुशप्रतिसेवनाकुशीला द्वयोः संयमयोः सामायिके छेदोपस्थाप्ये च । कषायकुशीलो‡ द्वयोः परिहारविशुद्धौ§ सूक्ष्मसंपराये च । निर्ग्रन्थस्नातकावेकस्मिन्यथाख्यातसंयमे ॥

श्रुतम् । पुलाकबकुशप्रतिसेवनाकुशीला उत्कृष्टेनाभिन्नाक्षरदशपूर्वधराः । कषायकुशीलनिर्ग्रन्थौ चतुर्दशपूर्वधरौ । जघन्येन पुलाकस्य श्रुतमाचारवस्तु[१] । बकुशकुशीलनिर्ग्रन्थानां श्रुतमष्टौ प्रवचनमातरः । श्रुतापगतः केवली स्नातक इति ॥

प्रतिसेवना । पञ्चानां मूलगुणानां रात्रिभोजनविरतिषष्ठानां‖ पराभियोगाद्बलात्कारेणान्यतमं¶ प्रतिसेवमानः पुलाको भवति । मैथुनमित्येके । बकुशो द्विविधः उपकरणबकुशः शरीरबकुशश्च । तत्रोपकरणाभिष्वक्तचित्तो विविधविचित्र-

---

* K adds इति after साध्याः ।
† CK अनुगम ।
‡ CD कषायकुशीला ।
§ D परिहारविशुद्धिसूक्ष्मसंपरायथोः ।
‖ D रात्रिभोजनस्य च ।
¶ D adds वा, बलात्कारेण वान्यतमं ।

S नवमपूर्वान्तःपाति तृतीयमाचारवस्तु यावच्छ्रुतम् ।

महाधनोपकरणपरिग्रहयुक्तो बकुशविशेषोपकरणकांक्षायुक्तो* नित्यं तत्प्रतिसंस्कारसेवी †भिक्षुरुपकरणबकुशो भवति । शरीराभिष्वक्तचित्तो‡ विभूषार्थं तत्प्रतिसंस्कारसेवी शरीरबकुशः । प्रतिसेवनाकुशीलो मूलगुणानविराधयन्नुत्तरगुणेषु §कांचिद्विराधनां प्रतिसेवते । कषायकुशीलनिर्ग्रन्थस्नातकानां प्रतिसेवना नास्ति ॥

तीर्थम् । सर्वे॥ सर्वेषां तीर्थकराणां तीर्थेषु भवन्ति । एके त्वाचार्या मन्यन्ते पुलाकबकुशप्रतिसेवनाकुशीलास्तीर्थे नित्यं भवन्ति शेषास्तीर्थे वातीर्थे वा ॥

लिङ्गम् । लिङ्गम् द्विविधम् द्रव्यलिङ्गं भावलिङ्गं च । भावलिङ्गं प्रतीत्य सर्वे पञ्च निर्ग्रन्था भावलिङ्गे भवन्ति¶ । द्रव्यलिङ्गं प्रतीत्य भाज्याः ॥

लेश्याः । पुलाकस्योत्तरास्तिस्रो लेश्या भवन्ति । बकुशप्रतिसेवनाकुशीलयोः सर्वाः षडपि । कषायकुशीलस्य परिहारविशुद्धेस्तिस्र उत्तराः । सूक्ष्मसंपरायस्य निर्ग्रन्थस्नातकयोश्च शुक्लैव केवला भवति । अयोगः शैलेशीप्रतिपन्नो ऽलेश्यो भवति ॥

उपपातः । पुलाकस्योत्कृष्टस्थितिषु देवेषु सहस्रारे । बकुशप्रतिसेवनाकुशीलयोर्द्वाविंशतिसागरोपमस्थितिष्वारणाच्युतकल्पयोः । कषायकुशीलनिर्ग्रन्थयोस्त्रयस्त्रिंशत्सागरोपमस्थि-

---

* C आकांक्षा ।
† Probably S omits भिक्षुः ।
‡ K अभियुक्त ।
§ D किंचित् for कांचित् ।
|| D omits सर्वे ।
¶ K सन्ति ।

तिषु देवेषु सर्वार्थसिद्धे। सर्वेषामपि जघन्या पल्योपम-पृथक्त्वस्थितिषु सौधर्मे। स्नातकस्य निर्वाणमिति ॥ 5

स्थानम्। असङ्ख्येयानि संयमस्थानानि कषायनिमित्तानि भवन्ति। तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषायकुशील-योः। तौ युगपदसङ्ख्येयानि स्थानानि गच्छतः। ततः पुलाको व्युच्छिद्यते* कषायकुशीलस्यासङ्ख्येयानि† स्थानान्येकाकी गच्छति। ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसङ्ख्येयानि 10 संयमस्थानानि गच्छन्ति। ततो बकुशो व्युच्छिद्यते। ततो ऽसङ्ख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते। ततो ऽसङ्ख्येयानि स्थानानि गत्वा कषायकुशीलो व्युच्छिद्यते। अत ऊर्ध्वमकषायस्थानानि निर्ग्रन्थः प्रतिपद्यते। सो ऽप्यसङ्ख्येयानि स्थानानि गत्वा व्युच्छिद्यते। अत ऊर्ध्वमेकमेव‡ स्थानं गत्वा 15 निर्ग्रन्थस्नातको निर्वाणं प्राप्नोतीति ॥ एषां§ संयमलब्धिरनन्ता-नन्तगुणा भवतीति ॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसङ्ग्रहे
नवमोऽध्यायः समाप्तः ॥

---

* D व्यवच्छिद्यते।

† D संयमस्थानानि।

‡ C omits एकम्।

§ C एतेषाम्।

अथ दशमोऽध्यायः ॥

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥ १ ॥

मोहनीये क्षीणे ज्ञानावरणदर्शनावरणान्तरायेषु क्षीणेषु च केवलज्ञानदर्शनमुत्पद्यते*। आसां चतसृणां कर्मप्रकृतीनां क्षयः केवलस्य हेतुरिति। तत्क्षयादुत्पद्यत इति हेतौ† पञ्चमीनिर्देशः[1]। मोहक्षयादिति पृथक्करणं क्रमप्रसिद्ध्यर्थं यथा‡ गम्येत पूर्वं मोहनीयं कृत्स्नं क्षीयते ततोऽन्तर्मुहूर्तं कृत्स्नवीतरागो भवति। ततोऽस्य ज्ञानदर्शनावरणान्तरायप्रकृतीनां तिसृणां युगपत्क्षयो भवति। ततः केवलमुत्पद्यते§ ॥

अत्राह। उक्तं मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलमिति। अथ मोहनीयादीनां क्षयः कथं भवतीति‖। अत्रोच्यते

---

* K ज्ञानं, D केवलं ज्ञानदर्शनमुत्पद्यते।
† K हेतुपञ्चमी, D हेतुः।
‡ C यथागम्येते, K गम्यते।
§ CD add इति।
‖ K omits इति।

---

१ (अतस्तद्विगमलक्षणो गुणो हेतुः विभाषागुणेऽस्त्रियामिति हेतौ पञ्चमीनिर्देशो) S

बन्धहेत्वभावनिर्जराभ्याम् ॥ २ ॥

मिथ्यादर्शनादयो बन्धहेतवो ऽभिहिताः । तेषामपि तदावरणीयस्य कर्मणः क्षयाद्भावो भवति सम्यग्दर्शनादीनां चोत्पत्तिः । तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् तन्निसर्गादधिगमाद्वेत्युक्तम् । एवं संवरसंवृतस्य महात्मनः सम्यग्व्यायामस्याभिनवस्य कर्मण उपचयो न भवति पूर्वोपचितस्य च यथोक्तैर्निर्जराहेतुभिरत्यन्तक्षयः । ततः सर्वद्रव्यपर्यायविषयं परमैश्वर्यमनन्तं केवलं ज्ञान*दर्शनं प्राप्य शुद्धो† बुद्धः सर्वज्ञः सर्वदर्शी जिनः केवली भवति । ततः प्रतनुशुभचतुःकर्मावशेष आयुःकर्मसंस्कारवशाद्विहरति । ततो ऽस्य

कृत्स्नकर्मक्षयो मोक्षः ॥ ३ ॥

कृत्स्नकर्मक्षयलक्षणो मोक्षो भवति । पूर्वं क्षीणानि चत्वारि कर्माणि पश्चाद्वेदनीयनामगोत्रायुष्कक्षयो भवति । तत्क्षयसमकालमेवौदारिकशरीरवियुक्तस्यास्य जन्मनः प्रहाणं । हेत्वभावाच्चोत्तरस्याप्रादुर्भावः । एषावस्था कृत्स्नकर्मक्षयो मोक्ष इत्युच्यते ॥ किं चान्यत् ।

औपशमिकादिभव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥

---

* K ज्ञानं । † D सिद्धो ।

औपशमिकक्षायिकक्षायोपशमिकौदयिकपरिणामिकानां* भावानां भव्यत्वस्य चाभावान्मोक्षो भवति अन्यत्र केवलसम्यक्त्व-केवलज्ञानकेवलदर्शनसिद्धत्वेभ्यः। एते ह्यस्य क्षायिका नित्यास्तु† मुक्तस्यापि भवन्ति ॥

5 **तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् ॥ ५ ॥**

तदनन्तरमिति कृत्स्नकर्मक्षयानन्तरमौपशमिकाद्यभावानन्तरं चेत्यर्थः। मुक्त ऊर्ध्वं गच्छत्यालोकान्तात्। कर्मक्षये‡ देह-वियोगसिध्यमानगतिलोकान्तप्राप्तयो§ऽस्य युगपदेकसमयेन भवन्ति। तद्यथा। प्रयोगपरिणामादिसमुत्थस्य गतिकर्मण
10 उत्पत्तिकार्यारम्भविनाशा युगपदेकसमयेन भवन्ति तद्वत् ॥

अत्राह। प्रक्षीणकर्मणो निरास्रवस्य कथं गतिर्भवतीति। अत्रोच्यते

पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च तद्गतिः ॥ ६ ॥

15 **पूर्वप्रयोगात्**। यथा हस्तदण्डचक्रसंयुक्तसंयोगात्पुरुषप्रयत्नत-श्चाविद्धं कुलालचक्रमुपरतेष्वपि पुरुषप्रयत्नहस्तदण्डचक्रसंयोगेषु

---

* K औपशमिकक्षायोपशमिकौदयिकानां च, D क्षायोपशमिक, B पारिणामि-कादीनां। † D omits तु।

‡ Var S कर्मक्षयदेहवियो०, D कर्मक्षयात्, D सिद्धमान here and here-after § DC add हि

पूर्वप्रयोगाद्भ्रमत्येवा*संस्कारपरित्यात् एवं यः पूर्वमस्य कर्मणा† प्रयोगो जनितः स क्षीणेऽपि कर्मणि गतिहेतुर्भवति । तत्कृता गतिः ॥ किं चान्यत् ।

असङ्गत्वात् । पुद्गलानां जीवानां च गतिमत्त्वमुक्तं‡ नान्येषां द्रव्याणाम् । तत्राधोगौरवधर्माणः पुद्गला ऊर्ध्वगौरवधर्माणो जीवाः । एष स्वभावः । अतो ऽन्यासङ्गादिजनिता गतिर्भवति । यथा सत्स्वपि प्रयोगादिषु गतिकारणेषु जातिनियमेनाधस्तिर्यगूर्ध्वं च स्वाभाविक्यो§ लोष्टवाय्वग्नीनां गतयो दृष्टाः तथा सङ्गविनिर्मुक्तस्योर्ध्वगौरवादूर्ध्वमेव सिध्यमानगतिर्भवति । संसारिणस्तु ‖कर्मसङ्गादधस्तिर्यगूर्ध्वं च ॥ किं चान्यत् ।

बन्धच्छेदात् । यथा रज्जुबन्धच्छेदात्एरण्डाया बीजकोशबन्धनच्छेदाच्चैरण्डबीजानां¶ गतिर्दृष्टा तथा कर्मबन्धनच्छेदात्सिध्यमानगतिः** ॥ किं चान्यत् ।

तथागतिपरिणामाच्च । ऊर्ध्वगौरवात्पूर्वप्रयोगादिभ्यश्च हेतुभ्यः†† तथास्य गतिपरिणाम उत्पद्यते येन सिध्यमानगतिर्भवति । ऊर्ध्वमेव‡‡ भवति नाधस्तिर्यग्वा गौरवप्रयोगपरिणामा-

---

* K भवति ।
† K कर्मणो ।
‡ C गतिमत्त्वमुक्तम् ।
§ K स्वभाविका ।
‖ D.C संयोगात् ।
¶ B बीजादीनां ।
** D गतिर्भवति ।
†† K हेतुतः ।
‡‡ C ऊर्ध्वं नाधस्ति० ।

सङ्गयोगाभावात्* । तद्यथा । गुणवद्भूमिभागारोपितमृत्कालजातं† बीजोद्भेदाद्ङ्कुरप्रवालपर्णपुष्पफलकालेष्वविमानित‡सेकदौर्हृदादिपोषणकर्मपरिणतं कालच्छिन्नं शुष्कमलाब्वप्सु न निमज्जति तदेव गुरुक्षुण्मृत्तिकालेपैर्घनैर्बहुभिरालिप्तं घनमृत्तिकालेपवेष्टन§जनितागन्तुकगौरवमप्सु प्रक्षिप्तं तज्जलप्रतिष्ठं॥ भवति यदा तस्याङ्गिः क्लिन्नो¶ मृत्तिकालेपो व्यपगतो** भवति तदा†† मृत्तिकालेपसङ्गविनिर्मुक्तं मोक्षानन्तरमेवोर्ध्वं गच्छति आसलिलोर्ध्वतलात् एवमूर्ध्वगौरवगतिधर्मा जीवो ऽप्यष्ट‡‡कर्ममृत्तिकालेपवेष्टितः §§तत्सङ्गात्संसारमहार्णवे भवसलिले निमग्नो॥॥ भवासक्तो ऽधस्तिर्यगूर्ध्वं च गच्छति सम्यग्दर्शनादिसलिलक्लेदात्प्रहीणाष्टविधकर्ममृत्तिकालेप ऊर्ध्वगौरवादूर्ध्वमेव गच्छत्या¶¶ लोकान्तात् ॥

स्यादेतत् लोकान्तादप्यूर्ध्वं मुक्तस्य गतिः किमर्थं न भवतीति । अत्रोच्यते । धर्मास्तिकायाभावात् । धर्मास्तिकायो हि जीवपुद्गलानां गत्युपग्रहेणोपकुरुते । स तत्र नास्ति । तस्माद्गत्युपग्रहकारणाभावात्परतो गतिर्न भवत्यप्सु अलाबुवत् ।

---

* D संयोग for योग A.C omit परिणामासङ्गयोग । † K भागरोपित ।
‡ K अधिमानित । § C वेष्टित ।
‖ D तज्जलप्रविष्टं for तज्जलप्रतिष्ट । ¶ K क्लन्नो ।
** K व्यक्ते । †† D omits.
‡‡ DC अष्टविध । §§ D तव for तत् ।
‖‖ D मग्नो । ¶¶ C adds तु ।

नाधो न तिर्यगित्युक्तम् । तत्रैवानुश्रेणिगतिर्लोकान्ते ऽवतिष्ठते* मुक्तो निःक्रिय इति ॥[१]

क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधित-ज्ञानावगाहनान्तरसङ्ख्याल्पबहुत्वतः साध्याः† ॥ ७ ॥

क्षेत्रं कालः गतिः लिङ्गं तीर्थं चारित्रं प्रत्येकबुद्धबोधितः ज्ञानं अवगाहना‡ अन्तरं सङ्ख्या अल्पबहुत्वमित्येतानि द्वादशानुयोगद्वाराणि सिद्धस्य भवन्ति । एभिः सिद्धः साध्यो ऽनुगम्यश्चिन्त्यो व्याख्येय इत्येकार्थत्वम्§ । तत्र पूर्वभावप्रज्ञापनीयः प्रत्युत्पन्नभावप्रज्ञापनीयश्च द्वौ नयौ भवतः । तत्कृतो ऽनुयोगविशेषः । तद्यथा ।

क्षेत्रम्‖ । कस्मिन्क्षेत्रे¶ सिध्यतीति । प्रत्युत्पन्नभावप्रज्ञापनीयं प्रति सिद्धिक्षेत्रे सिध्यति** । पूर्वभावप्रज्ञापनीयस्य जन्म प्रति

---

* C तिष्ठति । † D साध्यः । ‡ D अवगाहनं ।
§ B एकार्थत्वमिति । ‖ C omits. ¶ K तस्मिन् ।
** C सिध्यतीति ।

---

१. H. gives at the end of the commentary on this Sûtra the following very interesting passage which being incorrect is unfortunately not quite intelligible.

सूरिर्यशोभद्रस्य दि-शिष्येण समुद्धृता स्वबोधार्थं तत्त्वार्थस्य हि टीका जडकार्याजभाष्टतायात्यां उद्धृत्या तत्त्वार्थार्धस्य टीकान्त्येति । एतदुक्तं भवति । हरिभद्राचार्येणार्धषष्ठामध्यायानामाद्यानां टीका कृता भगवता तु गन्धहस्तिना सिद्धसेनेन नया कृता तत्त्वार्थटीका नयैर्वादस्थानैर्व्याकुलामस्ये एवाग्रषमुद्धृताचार्येण स्वबोधार्थं सात्यन्तगुर्व्वी वं डुपडुपिका टीका निष्पन्नेत्यलं प्रसङ्गेन ॥

पञ्चदशसु कर्मभूमिषु जातः सिध्यति* संहरणं प्रति मानुषक्षेत्रे सिध्यति* । तत्र प्रमत्तसंयताः संयतासंयताश्च† संह्रियन्ते । अमण्यपगतवेदः परिहारविशुद्धिसंयतः पुलाको ऽप्रमत्तश्चतुर्दशपूर्वी आहारकशरीरीति‡ न संह्रियन्ते । ऋजुसूत्रनयः शब्दादयश्च त्रयः प्रत्युत्पन्नभावप्रज्ञापनीयाः शेषा नया उभयभावं प्रज्ञापयन्तीति ॥

कालः । अत्रापि नयद्वयम् । कस्मिन्काले सिध्यतीति । प्रत्युत्पन्नभावप्रज्ञापनीयस्य अकाले सिध्यति । पूर्वभावप्रज्ञापनीयस्य जन्मतः संहरणतश्च । जन्मतोऽवसर्पिण्यामुत्सर्पिण्यामनवसर्पिण्युत्सर्पिण्यां च जातः सिध्यति । एवं तावद्विशेषतः । विशेषतोऽप्यवसर्पिण्यां सुषमदुःषमायां सङ्ख्येयेषु वर्षेषु शेषेषु जातः सिध्यति दुःषमसुषमायां सर्वस्यां सिध्यति दुःषमसुषमायां जातो दुःषमायां सिध्यति न तु दुःषमायां जातः सिध्यति अन्यत्र नैव सिध्यति । संहरणं प्रति सर्वकालेष्ववसर्पिण्यामुत्सर्पिण्यामनवसर्पिण्युत्सर्पिण्यां च सिध्यति ॥

गतिः । प्रत्युत्पन्नभावप्रज्ञापनीयस्य सिद्धिगत्यां‖ सिध्यति । शेषास्तु नया द्विविधा अनन्तरपश्चात्कृतगतिकश्च एकान्तरपश्चात्कृतगतिकश्च । अनन्तरपश्चात्कृतगतिकस्य मनुष्यगत्यां सिध्यति । एकान्तरपश्चात्कृतगतिकस्याविशेषेण सर्वगतिभ्यः सिध्यति ॥

---

* C सिध्यतीति ।

† B प्रमत्तसंयतसंयतासंयता ।

‡ C omits इति ।

§ C ~~जन्मनः~~ ।

‖ B सिद्धगत्याम् ।

लिङ्गं स्त्रीपुंनपुंसकानि । प्रत्युत्पन्नभावप्रज्ञापनीयस्यावेदः सिध्यति । पूर्वभावप्रज्ञापनीयस्यानन्तरपश्चात्कृतगतिकस्य परम्परपश्चात्कृतगतिकस्य* च त्रिभ्यो लिङ्गेभ्यः सिध्यति ॥

तीर्थम् । सन्ति तीर्थकरसिद्धाः तीर्थकरतीर्थे नोतीर्थकरसिद्धाः तीर्थकरतीर्थे ऽतीर्थकरसिद्धाः तीर्थकरतीर्थे । एवं तीर्थकरीतीर्थे सिद्धा अपि ॥

लिङ्गे† पुनरन्यो‡ विकल्प उच्यते । [1]द्रव्यलिङ्गं भावलिङ्गमलिङ्गमिति प्रत्युत्पन्नभावप्रज्ञापनीयस्यालिङ्गः सिध्यति । पूर्वभावप्रज्ञापनीयस्य भावलिङ्गं प्रति स्वलिङ्गे सिध्यति । द्रव्यलिङ्गं त्रिविधं स्वलिङ्गमन्यलिङ्गं गृहिलिङ्गमिति§ तत्प्रति भाज्यम् । सर्वस्तु भावलिङ्गं प्राप्तः सिध्यति‖ ॥[2]

चारित्रम् । प्रत्युत्पन्नभावप्रज्ञापनीयस्य नोचारित्री नोऽचारित्री सिध्यति¶ । पूर्वभावप्रज्ञापनीयो द्विविधः अनन्तरपश्चात्कृतिकश्च परम्परपश्चात्कृतिकश्च । अनन्तरपश्चात्कृतिकस्य यथाख्यातसंयतः सिध्यति । परम्परपश्चात्कृतिकस्य व्यश्नुते

---

* D एकान्तरपश्चात्कृत० ।
† C omits.
‡ C अन्यो ऽपि ।
§ D गृहलिङ्गमिति ।
‖ K सर्वतस्तु भावलिङ्गं प्राप्तः सिध्यति ।
¶ C adds इति ।

---

१ S. H. लिङ्गेष पुनरन्यो विकल्प उच्यते । ननु च पूर्वमेवोपन्यसनीयः स्यात् । सत्यमेवं किन्त्वाभिदमेकमाचार्यस्य ॥

२ S. संक्षेपतस्तु सर्वो भावलिङ्गं प्राप्तः सिध्यतीति नियमः ।

ऽव्यञ्जिते* च । अव्यञ्जिते चिचारित्रपश्चात्कृतश्चतुश्चारित्रपश्चात्कृतः पञ्चचारित्रपश्चात्कृतश्च । व्यञ्जिते सामायिकसूक्ष्मसांपरायिकयथाख्यातपश्चात्कृतसिद्धाः† छेदोपस्थाप्यसूक्ष्मसम्परायययथाख्यातपश्चात्कृतसिद्धाः सामायिकच्छेदोपस्थाप्यसूक्ष्मसम्परायययथाख्यातपश्चात्कृतसिद्धाः‡ छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायययथाख्यातपश्चात्कृतसिद्धाः सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायययथाख्यातपश्चात्कृतसिद्धाः ॥

प्रत्येकबुद्धबोधितः[१] । अस्य व्याख्याविकल्पश्चतुर्विधः । तद्यथा । अस्ति स्वयंबुद्धसिद्धः । स द्विविधः अर्हंश्च तीर्थकरः प्रत्येकबुद्धसिद्धश्च । बुद्धबोधितसिद्धाः§ चिचतुर्थो विकल्पः परबोधकसिद्धाः खेष्टकारिसिद्धाः‖ ॥

ज्ञानम् । अत्र प्रत्युत्पन्नभावप्रज्ञापनीयस्य केवली सिध्यति । पूर्वभावप्रज्ञापनीयो द्विविधः अनन्तरपश्चात्कृतिकश्च परम्परपश्चात्कृतिकश्च अव्यञ्जिते च व्यञ्जिते च । अव्यञ्जिते द्वाभ्यां ज्ञानाभ्यां सिध्यति । त्रिभिश्चतुर्भिरिति । व्यञ्जिते द्वाभ्यां मतिश्रुताभ्याम् । त्रिभिर्मतिश्रुतावधिभिर्मतिश्रुतमनःपर्यायैर्वा । चतुर्भिर्मतिश्रुतावधिमनःपर्यायैरिति ॥

---

* C व्यंजिते चाव्यंजिते च। † C छते।
‡ D has परिहारविशुद्धि for छेदोपस्थाप्य। § D ०सिद्धः।
‖ D परबोधकः खेष्टकारि च।

---

१ S तीर्थकर, प्रत्येकबुद्ध, परबोधक, खेष्टकारी ।

अवगाहना। कः कस्यां शरीरावगाहनायां वर्तमानः सिध्यति। अवगाहना द्विविधा उत्कृष्टा जघन्या च। उत्कृष्टा* पञ्चधनुःशतानि धनुःपृथक्त्वेनाभ्यधिकानि। जघन्या सप्त रत्नयो ऽङ्गुलपृथक्त्वेन‡ हीनाः। एतासु शरीरावगाहनासु सिध्यति पूर्वभावप्रज्ञापनीयस्य। प्रत्युत्पन्नभावप्रज्ञापनीयस्य तु§ एतास्वेव यथास्वं त्रिभागहीनासु सिध्यति॥

अन्तरम्। सिध्यमानानां किमन्तरम्। अनन्तरं च सिध्यन्ति सान्तरं च सिध्यन्ति। तत्रानन्तरं जघन्येन द्वौ समयौ उत्कृष्टेनाष्टौ समयान्। सान्तरं जघन्येनैकं समयं उत्कृष्टेन षण्मासा इति॥ ॥

सङ्ख्या। कत्यकसमये सिध्यन्ति। जघन्येनैक उत्कृष्टेनाष्टशतम्॥

अल्पबहुत्वम्। एषां क्षेत्रादीनामेकादशानामनुयोगद्वाराणामल्पबहुत्वं वाच्यं। तद्यथा।

क्षेत्रसिद्धानां जन्मतः संहरणतश्च कर्मभूमिसिद्धाश्चाकर्मभूमिसिद्धाश्च सर्वस्तोकाः संहरणसिद्धाः जन्मतो ऽसङ्ख्येयगुणाः। संहरणं द्विविधम् परकृतं स्वयंकृतं च। परकृतं देवकर्मणा चारण¶विद्याधरैश्च। स्वयंकृतं चारणविद्याधराणामेव। एषां च क्षेत्राणां विभागः कर्मभूमिरकर्मभूमिः समुद्रा द्वीपा ऊर्ध्वमधस्तिर्यगिति लोकत्रयं। तत्र सर्वस्तोका ऊर्ध्वलोकसिद्धाः अधोलोकसिद्धाः सङ्ख्येयगुणाः तिर्यग्लोकसिद्धाः

---

* C उत्कृष्टायाम्।
‡ C अङ्गुलपृथक्त्वहीनाः।
॥ D षण्मासानिति।
† K omits धनः।
§ C omits तु।
¶ C चारिणा।

सङ्ख्येयगुणाः सर्वस्तोकाः समुद्रसिद्धाः द्वीपसिद्धाः सङ्ख्येयगुणाः* । एवं तावद्व्यञ्जिते† व्यञ्जिते ऽपि सर्वस्तोका लवणसिद्धाः कालोद-सिद्धाः‡ सङ्ख्येयगुणा जम्बूद्वीपसिद्धाः सङ्ख्येयगुणा धातकीखण्ड-सिद्धाः सङ्ख्येयगुणाः पुष्करार्धसिद्धाः सङ्ख्येयगुणा इति ॥

काल इति त्रिविधो विभागो भवति अवसर्पिणी उत्सर्पिणी अनवसर्पिण्युत्सर्पिणीति। अत्र सिद्धानां (व्यञ्जितानां) व्यञ्जिता-व्यञ्जितविशेषयुक्तो ऽल्पबहुत्वानुगमः कर्तव्यः । पूर्वभावप्रज्ञाप-नीयस्य सर्वस्तोका उत्सर्पिणीसिद्धा अवसर्पिणीसिद्धा विशेषा-धिका अनवसर्पिण्युत्सर्पिणीसिद्धाः सङ्ख्येयगुणा इति । प्रत्युत्पन्न-भावप्रज्ञापनीयस्याकाले सिध्यति । नास्त्यल्पबहुत्वम् ।

गतिः । प्रत्युत्पन्नभावप्रज्ञापनीयस्य सिद्धिगतौ सिध्यति । नास्त्यल्पबहुत्वम् । पूर्वभावप्रज्ञापनीयस्यानन्तरपश्चात्कृतिकस्य मनुष्यगतौ सिध्यति । नास्त्यल्पबहुत्वम् । परम्परपश्चात्कृतिकस्या-नन्तरा गतिश्चिन्त्यते । तद्यथा । सर्वस्तोकास्तिर्यग्योन्यनन्तर-गतिसिद्धा मनुष्येभ्यो ऽनन्तरगतिसिद्धाः सङ्ख्येयगुणा नारकेभ्यो ऽनन्तरगतिसिद्धाः सङ्ख्येयगुणा देवेभ्यो ऽनन्तरगतिसिद्धाः सङ्ख्येयगुणा इति ॥

लिङ्गम् । प्रत्युत्पन्नभावप्रज्ञापनीयस्य व्यपगतवेदः सिध्यति । नास्त्यल्पबहुत्वम् । पूर्वभावप्रज्ञापनीयस्य सर्वस्तोका नपुंसक-लिङ्गसिद्धाः स्त्रीलिङ्गसिद्धाः सङ्ख्येयगुणाः पुल्लिँङ्गसिद्धाः सङ्ख्येय-गुणा इति ॥

---

* D असङ्ख्येयगुणाः । † C adds व्यञ्जिते । ‡ K कालोयनसिद्धाः ।

तीर्थम्। सर्वस्तोकाः तीर्थकरसिद्धाः तीर्थकरतीर्थे नोतीर्थकरसिद्धाः सङ्ख्येयगुणा इति। तीर्थकरतीर्थसिद्धा नपुंसकाः सङ्ख्येयगुणाः। तीर्थकरतीर्थसिद्धाः स्त्रियः सङ्ख्येयगुणाः। तीर्थकरतीर्थसिद्धा पुमांसः सङ्ख्येयगुणा इति॥

चारित्रम्। अत्रापि नयौ द्वौ प्रत्युत्पन्नभावप्रज्ञापनीयश्च पूर्वभावप्रज्ञापनीयश्च। प्रत्युत्पन्नभावप्रज्ञापनीयस्य नोचारित्री नोअचारित्री* सिध्यति। नास्त्यल्पबहुत्वम्। पूर्वभावप्रज्ञापनीयस्य व्यक्षिते चाव्यक्षिते च। अव्यक्षिते सर्वस्तोकाः पञ्चचारित्रसिद्धाश्चतुश्चारित्रसिद्धाः सङ्ख्येयगुणास्त्रिचारित्रसिद्धाः सङ्ख्येयगुणाः। व्यक्षिते सर्वस्तोकाः सामायिकच्छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायययथाख्यातचारित्रसिद्धाः छेदोपस्थाप्यपरिहारविशुद्धिसूक्ष्मसम्परायययथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः सामायिकच्छेदोपस्थाप्यसूक्ष्मसम्परायययथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः सामायिकपरिहारविशुद्धिसूक्ष्मसम्परायययथाख्यातसिद्धाः सङ्ख्येयगुणाः सामायिकसूक्ष्मसम्परायययथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः। छेदोपस्थाप्यसूक्ष्मसम्परायययथाख्यातचारित्रसिद्धाः सङ्ख्येयगुणाः।

प्रत्येकबुद्धबोधितः। सर्वस्तोकाः प्रत्येकबुद्धसिद्धाः। बुद्धबोधितसिद्धाः नपुंसकाः सङ्ख्येयगुणाः। बुद्धबोधितसिद्धाः स्त्रियः सङ्ख्येयगुणाः। बुद्धबोधितसिद्धाः पुमांसः सङ्ख्येयगुणा इति।

---

* D omits.

ज्ञानम् । कः केन ज्ञानेन युक्तः सिध्यति । प्रत्युत्पन्नभावप्रज्ञापनीयस्य सर्वः केवली सिध्यति । नास्त्यल्पबहुत्वम् । पूर्वभावप्रज्ञापनीयस्य सर्वस्तोका द्विज्ञानसिद्धाः चतुर्ज्ञानसिद्धाः सङ्ख्येयगुणाः त्रिज्ञानसिद्धाः सङ्ख्येयगुणाः । एवं तावद्व्यञ्जिते व्यञ्जिते ऽपि सर्वस्तोका मतिश्रुतज्ञानसिद्धाः मतिश्रुतावधिमनःपर्यायज्ञानसिद्धाः सङ्ख्येयगुणाः मतिश्रुतावधिज्ञानसिद्धाः सङ्ख्येयगुणाः ॥

अवगाहना । सर्वस्तोका जघन्यावगाहनासिद्धाः उत्कृष्टावगाहनासिद्धास्ततो ऽसङ्ख्येयगुणाः यवमध्यसिद्धा असङ्ख्येयगुणाः यवमध्योपरिसिद्धा असङ्ख्येयगुणाः यवमध्याधस्तात्सिद्धा विशेषाधिकाः सर्वे विशेषाधिकाः ॥

अन्तरम् । सर्वस्तोका अष्टसमयानन्तरसिद्धाः सप्तसमयानन्तरसिद्धाः षट्समयानन्तरसिद्धा इत्येवं यावद्द्विसमयानन्तरसिद्धा इति सङ्ख्येयगुणाः । एवं तावदनन्तरेषु सान्तरेष्वपि सर्वस्तोकाः षण्मासान्तरसिद्धाः एकसमयान्तरसिद्धाः सङ्ख्येयगुणाः यवमध्यान्तरसिद्धाः सङ्ख्येयगुणाः अधस्ताद्यवमध्यान्तरसिद्धा असङ्ख्येयगुणाः उपरियवमध्यान्तरसिद्धा विशेषाधिकाः सर्वे विशेषाधिकाः ॥

सङ्ख्या । सर्वस्तोका अष्टोत्तरशतसिद्धाः विपरीतक्रमात्सप्तोत्तरशतसिद्धादयो यावत्पञ्चाशत् इत्यनन्तगुणाः । एकोनपञ्चाशदादयो* यावत्पञ्चविंशतिरित्यसङ्ख्येयगुणाः । चतुर्विंश-

* D एकोनपञ्चाशदादितो ।

त्यादयो यावदेक इति सङ्ख्येयगुणाः। विपरीतहानिर्यथा। सर्वस्तोका अनन्तगुणहानिसिद्धा असङ्ख्येयगुणहानिसिद्धा अनन्तगुणाः सङ्ख्येयगुणहानिसिद्धाः सङ्ख्येयगुणा इति॥

एवं निसर्गाधिगमयोरन्यतरजं तत्त्वार्थश्रद्धानात्मकं श्रद्धाद्यतिचारवियुक्तं प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं विशुद्धं सम्यग्दर्शनमवाप्य सम्यग्दर्शनोपलम्भाद्विशुद्धं* च ज्ञानमधिगम्य निक्षेपप्रमाणनयनिर्देशसत्सङ्ख्यादिभिरभ्युपायैर्जीवादीनां तत्त्वानां पारिणामिकौदयिकौपशमिकक्षायोपशमिकक्षायिकानां भावानां स्वतत्त्वं विदित्वादिमत्पारिणामिकौदयिकानां च भावानामुत्पत्तिस्थित्यन्यतानुग्रहप्रलयतत्त्वज्ञो विरक्तो निस्तृष्णस्त्रिगुप्तः पञ्चसमितो दशलक्षणधर्मानुष्ठानात्कलदर्शनाच्च निर्वाणप्राप्तियतनयाभिवर्धितश्रद्धासंवेगो भावनाभिर्भावितात्मानुप्रेक्षाभिः स्थिरीकृतात्मानभिष्वङ्गः संवृतत्वान्निरास्रवत्वाद्विरक्तत्वान्निस्तृष्णत्वाच्च व्यपगताभिनवकर्मोपचयः परीषहजयाद्बाह्याभ्यन्तरतपोनुष्ठानादनुभावतश्च सम्यग्दृष्टिविरतादीनां च जिनपर्यन्तानां परिणामाध्यवसाय**विशुद्धिस्थानान्तराणामसङ्ख्येयगुणोत्कर्षप्राप्त्या पूर्वोपचितकर्म निर्जरयन्†† सामायिकादीनां च सूक्ष्मसम्परायान्तानां संयमविशुद्धिस्थानानामुत्तरोत्तरोपलम्भात्पुलाकादीनां

---

* K लब्ध्यादिशुद्धम्।
† K तत् for सत्।
‡ D निहृष्णः K, निस्तृष्णः।
§ D निराश्रयत्वात्।
‖ K न्तरयोरनु०।
¶ K अनभव।
** K अध्यवसान।
†† D निर्जेरायाः।
‡‡ C उत्तर only once.

च निर्ग्रन्थानां संयमा*नुपालनविशुद्धिस्थान†विशेषाणा‡मुत्तरोत्तरप्रतिपत्त्या घटमानोऽत्यन्तप्रहीणार्तरौद्रध्यानो धर्मध्यानविजयादवाप्तसमाधिबलः शुक्लध्यानयोश्च पृथक्त्वैकत्ववितर्कयोरन्यतरस्मिन्वर्तमानो नानाविधानृद्धिविशेषान्प्राप्नोति। तद्यथा। आमर्शौषधित्वं विप्रुडौषधित्वं§ सर्वौषधित्वं प्रापानुग्रहसामर्थ्यजननीमभिव्याहारसिद्धिमौग्रित्वं॥ वग्रित्वमवधिज्ञानं शरीरविकर¶णाङ्गप्राप्तिताम्रणिमानं लघिमानं महिमानमणुत्वम्। अणिमा बिसच्छि**द्रमपि प्रविश्यासीत††। लघुत्वं नाम लघिमा वायोरपि लघुतरः स्यात्। महत्त्वं महिमा मेरोरपि महत्तरं शरीरं विकुर्वीत। प्राप्तिर्भूमिष्ठोऽङ्गुल्यग्रेण मेरुशिखरभास्करादीनपि स्पृशेत्। प्राकाम्यमप्सु‡‡ भूमाविव गच्छेत् भूमावप्सिव निमज्जेदुन्मज्जेच्च। जङ्घाचारणत्वं येनाग्निशिखाधूमनीहारावश्यायमेघवारिधारामर्कटतन्तु§§ज्योतिष्करश्मिवायूनामन्यतममप्युपादाय||||| वियति गच्छेत्¶¶। वियद्गतिचारणत्वं येन वियति भूमाविव गच्छेत् शकुनिवच्च प्रडीनावडीन***गमनानि कुर्यात्। अप्रतिघातित्वं पर्वतमध्येन वियतीव गच्छेत्। अन्तर्धानमदृश्यो भवेत्। कामरूपित्वं नानाश्रयानेकरूपधारणं युगपदपि

---

* K संयतातपा। † K स्थापन।
‡ K विशेषेषा। § D विप्रुडोषधित्वम्।
|| D ऋभिव्याहर। ¶ KD शरीरीं च विकर०।
** C श्यामी। †† D प्रविश्यासीति।
‡‡ C ०मभूमामिव गच्छेत्, D प्राकाम्य०। §§ D मकटकतन्तु।
||||| D ऋभ्युपादापाय। ¶¶ C गच्छति। *** K लीन।

कुर्यात् तेजोनिसर्गसामर्थ्यमित्येतदादि ॥ इति* इन्द्रियेषु मतिज्ञानविशुद्धिविशेषाद्वारात्स्पर्शनास्वादनघ्राणदर्शनश्रवणानि विषयाणां कुर्यात्। संभिन्नज्ञानत्वं युगपदनेकविषयपरिज्ञानमित्येतदादि ॥ मानसं कोष्ठबुद्धित्वं बीजबुद्धित्वं पदप्रकरणोद्देशाध्यायप्राभृतवस्तुपूर्वाङ्गानुसारित्वमृजुमतित्वं विपुलमतित्वं परचित्तज्ञानमभिलषितार्थप्राप्तिमनिष्टानवाप्तीत्येतदादि ॥ वाचिकं क्षीरास्रवित्वं मध्वास्रवित्वं वादित्वं सर्वरुतज्ञत्वं† सर्वसत्त्वावबोधनमित्येतदादि। तथा विद्याधरत्वमाशीविषत्वं भिन्नाभिन्नाक्षरचतुर्दशपूर्वधरत्वमिति ॥

ततो ऽस्य निस्तृष्णत्वान्नेष्वनभिष्वक्तस्य मोहक्षपक॥परिणामावस्थस्याष्टाविंशतिविधं मोहनीयं निरवशेषतः प्रहीयते। ततश्छद्मस्थवीतरागत्वं प्राप्नुवन्मुहूर्तेन ज्ञानावरणदर्शनावरणान्तरायाणि युगपदशेषतः प्रहीयन्ते। ततः संसारबीजबन्धनिर्मुक्तः¶ फलबन्धनमोक्षापेक्षो यथाख्यातसंयतो जिनः केवली सर्वज्ञः सर्वदर्शी शुद्धो बुद्धः कृतकृत्यः स्नातको भवति। ततो वेदनीयनामगोत्रायुष्कक्षयात्फलबन्धननिर्मुक्तो निर्दग्धपूर्वोपात्तेन्धनो निरुपादान इवाग्निः पूर्वोपात्तभववियोगाद्धेत्वभावाच्चोत्तरस्याप्रादुर्भावाच्छान्तः संसारसुखमतीत्यात्यन्तिकमैकान्तिकं निरुपमं निरतिशयं नित्यं निर्वाणसुखमवाप्नोतीति** ॥

---

* KD omit. † K सर्वज्ञ। ‡ C सर्वतत्त्वावबोधनम्, सर्वसत्त्वानुबोधनम्।
§ D अनभिषक्तस्य, K °क्तत्वेष्वनभि। ‖ D क्षय for क्षपक।
¶ D बन्धन for बन्ध, C निर्मुक्तः। ** K omits इति।

एवं तत्त्वपरिज्ञानाद्विरक्तस्यात्मनो मुनेः ।
निरास्रवत्वाच्छिन्नायां नवायां कर्मसन्ततौ ॥१॥
पूर्वार्जितं क्षपयतो यथोक्तैः क्षयहेतुभिः ।
संसारबीजं कार्त्स्न्येन मोहनीयं प्रहीयते ॥२॥
ततो ऽन्तरायज्ञानघ्नदर्शनघ्नान्यनन्तरम् ।
प्रहीयन्ते ऽस्य युगपत् त्रीणि कर्माण्यशेषतः ॥३॥
गर्भसूच्यां विनष्टायां यथा तालो विनश्यति ।
तथा कर्म क्षयं याति मोहनीये क्षयं गते ॥४॥
ततः क्षीणचतुःकर्मा प्राप्तो ऽयाख्यातसंयमम् ।
बीजबन्धननिर्मुक्तः स्नातकः परमेश्वरः ॥५॥
शेषकर्मफलापेक्षः शुद्धो बुद्धो निरामयः ।
सर्वज्ञः सर्वदर्शी च जिनो भवति केवली ॥६॥
कृत्स्नकर्मक्षयादूर्ध्वं निर्वाणमधिगच्छति ।
यथा दग्धेन्धनो वह्निर्निरुपादानसन्ततिः ॥७॥
दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे नारोहति* भवाङ्कुरः ॥८॥
तदनन्तरमेवोर्ध्वमालोकान्तात्स गच्छति ।
पूर्वप्रयोगासङ्गत्वबन्धच्छेदोर्ध्वगौरवैः ॥९॥
कुलालचक्रे दोलायामिषौ चापि† यथेष्यते ।
पूर्वप्रयोगात्कर्मेह तथा सिद्धिगतिः स्मृता‡ ॥१०॥

---

* D न रोहति । † DC वापि । ‡ D स्मृताः ।

मृल्लेपसङ्गनिर्मोक्षाद्यथा दृष्टाप्स्वलाबुनः ।
कर्मसङ्गविनिर्मोक्षात्तथा सिद्धिगतिः स्मृता* ॥ ११॥
एरण्डयन्त्रपेडासु बन्धच्छेदाद्यथा गतिः ।
कर्मबन्धनविच्छेदात्सिद्धस्यापि तथेष्यते ॥ १२॥
ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः । 5
अधोगौरवधर्माणः पुद्गला इति चोदितम् ॥ १३॥
यथाधस्तिर्यगूर्ध्वं च लोष्टवाय्वग्निवीतयः† ।
स्वभावतः प्रवर्तन्ते तथोर्ध्वं गतिरात्मनाम्‡ ॥ १४॥
अतस्तु गतिवैक्लव्यमेषां यदुपलभ्यते ।
कर्मणः प्रतिघाताच्च प्रयोगाच्च तदिष्यते ॥ १५॥ 10
अधस्तिर्यगथोर्ध्वं च§ जीवानां कर्मजा गतिः ।
ऊर्ध्वमेव तु तद्धर्मा भवति क्षीणकर्मणाम् ॥ १६॥
द्रव्यस्य कर्मणो यद्वदुत्पत्त्यारम्भवीतयः ।
समं तथैव सिद्धस्य गतिमोक्षभवक्षयाः ॥ १७॥
उत्पत्तिश्च विनाशश्च प्रकाशतमसोरिह । 15
युगपद्भवतो यद्वत् तथा निर्वाणकर्मणोः ॥ १८॥
तन्वी मनोज्ञा सुरभिः पुण्या परमभास्वरा ।
प्राग्भारा नाम वसुधा लोकमूर्ध्नि व्यवस्थिता ॥ १९॥
नृलोकतुल्यविष्कम्भा सितच्छत्रनिभा शुभा ।
ऊर्ध्वं तस्याः क्षितेः॥ सिद्धा लोकान्ते समवस्थिताः ॥ २०॥ 20

---

* D सिद्धगतिः स्मृताः । + D वीचयः । ‡ D आत्मनः ।
§ D अधस्तिर्यग् चोर्ध्वं च । ॥ D क्षतेः ।

तादात्म्यादुपयुक्तास्ते केवलज्ञानदर्शनैः* ।
सम्यक्त्वसिद्धतावस्था हेत्वभावाच्च निष्क्रियाः ॥२१॥
ततो ऽप्यूर्ध्वं गतिस्तेषां कस्मान्नास्तीति चेन्मतिः ।
धर्मास्तिकायस्याभावात्स हि हेतुर्गतेः परः‡ ॥२२॥
संसारविषयातीतं मुक्तानामव्ययं सुखम् ।
अव्याबाधमिति प्रोक्तं परमं परमर्षिभिः ॥२३॥
स्यादेतदशरीरस्य जन्तोर्नष्टाष्टकर्मणः ।
कथं भवति मुक्तस्य सुखमित्यत्र मे शृणु ॥२४॥
लोके चतुर्ष्विहार्थेषु सुखशब्दः प्रयुज्यते ।
विषये वेदनाभावे विपाके मोक्ष एव च ॥२५॥
सुखो वह्निः सुखो वायुर्विषयेष्विह कथ्यते ।
दुःखाभावे च पुरुषः सुखितो ऽस्मीति मन्यते ॥२६॥
पुण्यकर्मविपाकाच्च सुखमिष्टेन्द्रियार्थजम्‖ ।
कर्मक्लेशविमोक्षाच्च मोक्षे¶ सुखमनुत्तमम् ॥२७॥
सुखप्रसुप्तवत्केचिदिच्छन्ति परिनिर्वृतिम्** ।
तदयुक्तं क्रियावत्त्वात्सुखानुशयतस्तथा†† ॥२८॥
अमनस्कममद्व्याधि‡‡ मदनेभ्यश्च सम्भवात् ।
मोहोत्पत्तेर्विपाकाच्च§§ दर्शनघ्नस्य कर्मणः ॥२९॥

---

* D केवलज्ञानदर्शनैः
† D सम्यक्त्वं० ।
‡ CA पुरः ।
§ B स ।
‖ D अर्थिजं ।
¶ D मोक्षः ।
** D निर्वृतिम् ।
†† ~~KO~~ चनशयतः ।
‡‡ D मदद्व्याधि for मदव्याधि ।
§§ D मोहोत्पत्तिनिपाकाच्च ।

लोके तत्सदृशो ह्यर्थः कृत्स्नेऽप्यन्यो न विद्यते ।
उपगीयेत* तद्येन तस्मान्निरुपमं सुखम् ॥ ३० ॥
लिङ्गप्रसिद्धेः ‡प्रामाण्यादनुमानोपमानयोः ।
अत्यन्तं चाप्रसिद्धं तद्यत्तेनानुपमं स्मृतम् ॥ ३१ ॥
प्रत्यक्षं तद्भगवतामर्हतां तैश्च भाषितम् ।
गम्यते ऽस्मीत्यतः प्राज्ञैर्न च्छद्मस्थपरीक्षया ॥ ३२ ॥ इति

यस्त्विदानीं सम्यग्दर्शनज्ञानचरणसंपन्नो भिक्षुर्मोक्षाय घटमानः कालसंहननायुर्दोषाद्ल्पशक्तिः कर्मणां चातिगुरुत्वाद्कृतार्थ एवोपरमति स सौधर्मादीनां सर्वार्थसिद्धान्तानां कल्पविमानविशेषाणामन्यतमस्मिन्देवतयोपपद्यते§ । तत्र सुकृत‖कर्मफलमनुभूय स्थितिक्षयात्प्रच्युतो देशजातिकुलशीलविद्याविनयविभवविषयविस्तरविभूतियुक्तेषु मनुष्येषु प्रत्यायातिमवाप्य पुनः सम्यग्दर्शनादिविशुद्धबोधिमवाप्नोति । अनेन सुखपरम्परायुक्तेन कुशलाभ्यासानुबन्धक्रमेण परं निर्जनित्वा सिध्यतीति ॥

वाचकमुख्यस्य शिवश्रियः प्रकाशयशसः प्रशिष्येण ।
शिष्येण घोषनन्दिक्षमणस्यैकादशाङ्गविदः ॥ १ ॥
वाचनया च ¶महावाचकक्षमणमुण्डपादशिष्यस्य ।
शिष्येण वाचकाचार्यमूलनाम्नः प्रथितकीर्तेः ॥ २ ॥

---

* D उपनीयेत ।
‡ D प्रामाण्यं अनमान० ।
‖ D स्वकृत ।
† D स्मृतम् ।
§ देवत्वायोपपद्यते ।
¶ B मुण्डा ।

न्यग्रोधिकाप्रसूतेन विहरता पुरवरे कुसुमनाम्नि ।
कौभीषणिना *ख्यातितनयेन वात्सीसुतेनार्घ्यम् ॥३॥
अर्हद्वचनं सम्यग्गुरुक्रमेणागतं समुपधार्य ।
दुःखार्त्तं च† दुरागमविहतमतिं लोकमवलोक्य ॥४॥
दृद्मुश्चैर्नागर‡वाचकेन सत्त्वानुकम्पया दृब्धम् ।
तत्त्वार्थाधिगमाख्यं §स्पष्टमुमास्वातिना शास्त्रम् ॥५॥
यस्तत्त्वाधिगमाख्यं ज्ञास्यति च करिष्यते च तन्त्रोक्तम् ।
सो ऽव्याबाधसुखाख्यं प्राप्स्यत्यचिरेण परमार्थम् ॥६॥

इति तत्त्वार्थाधिगमे ऽर्हत्प्रवचनसङ्ग्रहे
दशमो ऽध्यायः समाप्तः ॥

---

* C ख्यातिप्रयेन, D ख्यातितनयेनाथ सौसुतेन । † D दुःखार्त्तकम् ।
‡ S खगाख्याह्वचकम् । § D पुष्टं ।

Appendix A.

तत्त्वार्थाधिगमसूत्रम् ।



AN ALPHABETICAL INDEX OF SŪTRAS IN THIS WORK.

अ ।

अनुक्रमनम्बर ।				अध्याय ।	सूत्रसङ्ख्या ।	पत्रसङ्ख्या ।
१	अगार्यनगारश्च	...	...	७	१३	१५६
२	अजीवकाया०	...	...	५	१	१२०
३	अणवः स्कन्धाश्च	...	...	५	२५	१२६
४	अणुव्रतो ऽगारी	...	...	७	१५	१५६
५	अदत्तादानं स्तेयम्	...	...	७	१०	१५५
६	अधिकरणं जीवाजीवाः		...	६	८	१४१
७	अधिके च ...	...	...	४	३५	११४
८	,, ...	...	...	४	४१	११६
९	अनन्तगुणे परे	...	...	२	४०	५१
१०	अनशनावमौदर्य०	...	...	९	१९	१९८
११	अनादिरादिमांश्च	...	...	५	४२	१३७
१२	अनादिसंबन्धे च	...	...	२	४२	५१
१३	अनित्याशरण०	...	...	९	७	१८९
१४	अनुग्रहार्थं०	...	...	७	३३	१६४
१५	अनुश्रेणि गतिः	...	...	२	२७	४१
१६	अपरा पल्योपममधिकं च		...	४	३९	११६

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
१७	अपरा द्वादशमुहूर्ता	८	१९	१७९
१८	अप्रतिघाते	२	४१	५१
१९	अप्रत्यवेक्षिता०	७	२९	१९३
२०	अर्थस्य	१	१७	१९
२१	अर्पितानर्पितसिद्धेः	५	३१	१३३
२२	अल्पारम्भपरिग्रहत्वं० ...	६	१८	१४५
२३	अवग्रहेहापायधारणाः ...	१	१५	१९
२४	अविग्रहा जीवस्य	२	२८	४७
२५	अविचारं द्वितीयम्	९	४४	२०७
२६	अव्रतकषायेन्द्रियक्रियाः० ...	६	६	१४०
२७	अशुभः पापस्य	६	४	१४०
२८	असङ्ख्येयाः प्रदेशा०	५	७	१२२
२९	असङ्ख्येयभागादिषु०	५	१५	१२३
३०	असदभिधानमनृतम्	७	९	१५४
३१	असुरेन्द्रयोः०	४	३२	११४

आ।

३२	आकाशस्यानन्ताः	५	९	१२२
३३	आकाशस्यावगाहः	५	१८	१२५
३४	आकाशादेकद्रव्याणि	५	५	१२१
३५	आचार्योपाध्याय०	९	२४	२०२
३६	आदितस्तिसृणामन्तरायस्य० ...	८	१५	१७८
३७	आद्य संरम्भ०	६	९	१४१
३८	आद्यशब्दौ द्वित्रिभेदौ ...	१	३५	३२
३९	आद्ये परोक्षम्	१	११	१४
४०	आद्यो ज्ञानदर्शनावरण० ...	८	५	१६७

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
४१	आनयनप्रेष्यप्रयोग०	७	२६	१६२
४२	आमुहूर्तात्	६	२८	२०६
४३	आरणाच्युतादू०	४	३८	११५
४४	आर्तरौद्रधर्मशुक्लानि	६	२६	२०६
४५	आर्तममनोज्ञानां०	६	३१	२०६
४६	आर्या म्लिष्टश्च	३	१५	८७
४७	आलोचनप्रतिक्रमण० ...	६	२२	२००
४८	आस्रवनिरोधः संवरः... ...	६	१	१८२
४६	आज्ञापायविपाक०	६	३७	२०६
	इ।			
५०	इन्द्रसामानिक०	४	४	६३
	ई।			
५१	ईर्याभाषैषणा०	६	५	१८४
	उ।			
५२	उच्चैर्नीचैश्च	८	१३	१७८
	(उच्छ्वासाहारवेदनो०) ...	०	०	१०६
५३	उत्तमः क्षमा०	६	६	१८४
५४	उत्तमसंहननस्यै०	६	२७	२०६
५५	उत्पादव्ययध्रौव्ययुक्तं सत् ...	५	२६	१३०
५६	उपयोगो लक्षणम्	२	८	४१
५७	उपयोगः स्पर्शादिषु	२	१६	४४
५८	उपर्युपरि	४	१६	१०६
५६	उपशान्तक्षीणकषाययोश्च ...	६	३८	२०६

ऊ।

अनुक्रमनम्बर।		अध्याय।	सूचसङ्ख्या।	पत्रसङ्ख्या।
६०	ऊर्ध्वाधस्तिर्यग्व्य०	७	२५	१६२

ऋ।

६१	ऋजुविपुलमती मनःपर्यायः ...	१	२४	२४

ए।

६२	एकप्रदेशादिषु भाज्यः० ...	५	१४	१२३
६३	एकसमयो ऽविग्रहः	२	३०	४८
६४	एकं द्वौ वानाहारकः... ...	२	३१	४८
६५	एकादश जिने	६	११	१६७
६६	एकादयो भाज्या०	६	१७	१६८
६७	एकादीनि भाज्यानि० ...	१	३१	२७
६८	एकाश्रये सवितर्के०	६	४३	२०७

औ।

६९	औदारिकवैक्रिय०	२	३७	५०
७०	औपपातिकचरमदेहो० ...	२	५२	६२
७१	औपपातिकमनुष्येभ्यः... ...	४	२८	११३
७२	औपशमिकक्षायिकौ ...	२	१	३६
७३	औपशमिकादि	१०	४	२१४

क।

७४	कषायोदयात्तीव्र०	६	१५	१४५
७५	कन्दर्पकौकुच्य०	७	२७	१६२
७६	कल्पोपपन्नाः०	४	१८	१०५
७७	कायप्रवीचारा०	४	८	६५

अनुक्रमणनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
७८	कायवाङ्मनःकर्म योगः ...	६	१	१३९
७९	कालश्चेत्येके...	५	३८	१३६
८०	कृमिपिपीलिका०	२	२४	४५
८१	कृत्स्नकर्मक्षयो मोक्षः ...	१०	३	२१४
८२	केवलिश्रुतसङ्घ०	६	१४	१४५
८३	क्षुत्पिपासा०	९	९	१९६
८४	क्षेत्रवास्तुहिरण्य०	७	२४	१६१
८५	क्षेत्रकालगतिलिङ्ग०	१०	७	२१८

ग।

८६	गतिकषायलिङ्ग०	२	६	४०
८७	गतिशरीरपरिग्रहा०... ...	४	२२	१०८
८८	गतिस्थित्युपग्रहो	५	१७	१२४
८९	गतिजातिशरीरा०	८	१२	१७३
९०	गर्भसंमूर्छनजमाद्यम्	२	३६	५४
९१	गुणसाम्ये सदृशानाम्	५	३४	१३५
९२	गुणपर्यायवद् द्रव्यम्	५	३७	१३६
९३	ग्रहणमेकम्	४	४९	११८

च।

९४	चक्षुरचक्षुरवधि०	८	८	१६८
९५	चतुर्भागः शेषाणाम्	४	५३	११९
९६	चारित्रमोहे०	९	१५	१९७

ज।

९७	जगत्कायस्वभावौ च	७	७	१५३
९८	जघन्या त्वष्टभागः	४	५२	११९

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
९९	जम्बूद्वीपलवणादयः	३	७	७८
१००	जरायण्डपोतजानां गर्भः ...	२	३४	४९
१०१	जीवभव्याभव्यत्वादीनि च ...	२	७	४१
१०२	जीवस्य च	५	८	१२२
१०३	जीवाजीवास्रव०	१	४	७
१०४	जीवितमरणाशंसा०	७	३२	१९४
१०५	ज्योतिष्काः०	४	१३	१०१
१०६	ज्योतिष्काणामधिकम् ...	४	४८	११८

त।

१०७	ततश्च निर्जरा	८	२४	१८०
१०८	तत्कृतः कालविभागः	४	१५	१०३
१०९	तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ...	१	२	९
११०	तस्यैककाययोगायोगानाम् ...	९	४२	२०७
१११	तत्प्रमाणे	१	१०	१४
११२	तत्प्रदोषनिह्नव०	६	११	१४४
११३	तत्र भरत०...	३	१०	८१
११४	तत्स्थैर्यार्थं०	७	३	१४९
११५	तदनन्तभागे मनःपर्यायस्य ...	१	२९	२९
११६	तदनन्तरमूर्ध्वं०	१०	५	२१५
११७	तदविरतदेशविरत०	९	३५	२०५
११८	तदादीनि भाज्यानि	२	४४	५२
११९	तदिन्द्रियानिन्द्रिय०	२	१४	१९
१२०	तद्विभाजिनः०	३	११	८२
१२१	तद्विपर्ययो०	६	२५	१४८
१२२	तद्भावः परिणामः	५	४१	१३७

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
१२३	तद्भावाव्ययं नित्यम्	५	३०	१३३
१२४	तन्निसर्गादधिगमाद्वा	१	३	६
१२५	तन्मध्ये मेरुनाभिर्वृत्तो० ...	३	९	७९
१२६	तपसा निर्जरा च	९	३	१८३
१२७	तारकाणां चतुर्भागः	४	५१	११८
१२८	तासु नरकाः	३	२	६८
१२९	तिर्यग्योनीनां च	३	१८	९०
१३०	तीव्रमन्दज्ञाताज्ञात०	६	७	१४१
१३१	तृतीयः पीतलेश्यः	४	२	९२
१३२	तेजोवायू०...	२	१४	४२
१३३	तेषां परं परं सूक्ष्मम्... ...	२	३८	५०
१३४	तेष्वकचि०...	३	६	७५
१३५	त्रयस्त्रिंशत्सागरोपमाण्यायुष्कस्य	८	१८	१७९
१३६	त्रायस्त्रिंशलोकपाल० ...	४	५	९३

द।

१३७	दर्शनविशुद्धिविनयसंपन्नता० ...	६	२३	१४७
१३८	दर्शनचारित्रमोहनीय० ...	८	१०	१६९
१३९	दर्शनमोहान्तराययो० ...	६	१४	१९७
१४०	दश वर्षसहस्राणि	४	४४	११७
१४१	दशाष्टपञ्च०	४	३	९२
१४२	दानादीनाम्	८	१४	१७८
१४३	दिग्देशानर्थदण्ड०	७	१६	१५६
१४४	दुःखशोकतापा०	६	१२	१४४
१४५	दुःखमेव वा	७	५	१५१
१४६	देवाश्चतुर्निकायाः	४	१	९२

अनुक्रमणिका।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
१४७	देशसर्वतो ऽणुमहती... ...	७	२	१४९
१४८	द्रव्याणि जीवाश्च	५	२	१२०
१४९	द्रव्याश्रया निर्गुणा गुणाः ...	५	४०	१३७
१५०	द्विनवाष्टादश०	२	२	३९
१५१	द्विर्द्विर्विष्कम्भाः०	३	८	७९
१५२	द्विर्धातकीखण्डे	३	१२	८४
१५३	द्विविधानि	२	१९	४३
१५४	द्विविधो ऽवधिः	१	२१	२२
१५५	द्व्यधिकादिगुणानां तु	५	३५	१३५

ध।

१५६	धर्माधर्मयोः कृत्स्ने	५	१३	१२३

न।

१५७	नक्तञ्चाणामर्धम्	४	५०	११८
१५८	न चक्षुरनिन्द्रियाभ्याम् ...	२	१९	१९
१५९	न जघन्यगुणानाम्	५	३३	१३४
१६०	न देवाः	२	५१	६२
१६१	नवचतुर्दश०	९	२१	२००
१६२	नाणोः	५	११	१२३
१६३	नामगोत्रयोर्विंशतिः	८	१७	१७९
१६४	नामगोत्रयोरष्टौ	८	२०	१७९
१६५	नामप्रत्ययाः०	८	२५	१८१
१६६	नामस्थापनाद्रव्य०	१	५	७
१६७	नारकदेवानामुपपातः... ...	२	३५	४९
१६८	नारकसंमूर्च्छिनो नपुंसकानि ...	२	५०	६१
१६९	नारकाणां च द्वितीयादिषु ...	४	४३	११७

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पदसङ्ख्या।
१७०	नारकतैर्यग्योनमानुषदैवानि ...	८	११	१७२
१७१	नित्यावस्थितान्यरूपाणि ...	५	३	१२०
१७२	नित्याशुभतरलेश्या०	३	३	६८
१७३	निदानं च	९	३४	२०५
१७४	निरुपभोगमन्त्यम्	२	४५	५४
१७५	निर्देशस्वामित्व०	१	७	९
१७६	निर्वर्तनानिक्षेप०	६	१०	१४३
१७७	निर्हारिपुलाकवकुश०	२	१७	४३
१७८	निःशल्यो व्रती	७	१३	१५६
१७९	निःशीलव्रतत्वं च सर्वेषाम् ...	६	१९	१४६
१८०	निष्क्रियाणि च	५	६	१२१
१८१	नृस्थिती परापरे	३	१७	९०
१८२	नैगमसंग्रह०	१	३४	३२

प।

१८३	पञ्चनव०	८	६	१६७
१८४	पञ्चेन्द्रियाणि	२	१५	४३
१८५	परतः परतः०	४	४२	११६
१८६	परविवाहकरणै०	७	२३	१६१
१८७	परस्परोदीरितदुःखाः ...	३	४	७२
१८८	परस्परोपग्रहो जीवानाम् ...	५	२१	१२६
१८९	परात्मनिन्दाप्रशंसे	६	२४	१४८
१९०	परा पल्योपमम्	४	४७	११८
१९१	परे केवलिनः	९	४०	२०६
१९२	परे ऽप्रवीचाराः	४	१०	९६
१९३	परे मोक्षहेतू	९	३०	२०९

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
१९४	पीतपद्मशुक्ललेश्या	४	२३	११०
१९५	पीतान्तलेश्याः	४	७	९५
१९६	पुलाकबकुश०	९	४८	२०९
१९७	पुष्कारार्धे च	३	१३	७५
१९८	पूर्वप्रयोगादसङ्गत्वा०	१०	६	२१५
१९९	पूर्वयोर्द्वीन्द्राः	४	६	९४
२००	पृथक्त्वैकत्व०	९	४१	२०७
२०१	पृथिव्यब्वनस्पतयः स्थावराः ...	२	१३	४२
२०२	प्रकृतिस्थित्यनुभाव०	८	४	१६७
२०३	प्रत्यक्षमन्यत्	१	१२	१५
२०४	प्रदेशतो ऽसङ्ख्येयगुणं	२	३९	५०
२०५	प्रदेशसंहार०	५	१६	१२४
२०६	प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा	७	८	१५४
२०७	प्रमाणनयैरधिगमः	१	६	९
२०८	प्राग्ग्रैवेयकेभ्यः कल्पाः	४	२४	१११
२०९	प्राग्मानुषोत्तरान्मनुष्याः ...	३	१४	८६
२१०	प्रायश्चित्तविनय०	९	२०	२००

ब।

२११	बन्धवधच्छविच्छेदा०	७	२०	१६०
२१२	बन्धहेत्वभावनिर्जराभ्याम् ...	१०	२	२१४
२१३	बन्धे समाधिकौ०	५	३६	१३६
२१४	बहिरवस्थिताः	४	१६	१०५
२१५	बहुबहुविध०	१	१६	१७
२१६	बह्वारम्भपरिग्रहत्वं०	६	१६	१४५
२१७	बादरसंपराये सर्वे	९	१२	१९७

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
२१८	बाह्याभ्यन्तरोपध्योः	९	२६	२०३
२१९	ब्रह्मलोकालया०	४	२५	११२

भ।

२२०	भरतैरावतविदेहाः ० ...	३	१६	८९
२२१	भवप्रत्ययो नारकदेवानाम् ...	१	२२	२२
२२२	भवनवासिनो ०	४	११	९७
२२३	भवनेषु दक्षिणार्धाधिपतीनां० ...	४	३०	११३
२२४	भवनेषु च	४	४५	११८
२२५	भूतव्रत्यनुकम्पा	६	१३	१४४
२२६	भेदसंघाताभ्यां चाक्षुषाः ...	५	२८	१३०
२२७	भेदादणुः	५	२७	१३०

म।

२२८	मतिः स्मृतिः ०	१	१३	१६
२२९	मतिश्रुतावधि०	१	९	१४
२३०	मतिश्रुतयोर्निबन्धः०	१	२७	२५
२३१	मतिश्रुतावधयो०	१	३२	३०
२३२	मत्यादीनाम्	८	७	१६८
२३३	माया तैर्यग्योनस्य	६	१७	१४५
२३४	मारणान्तिकीं संलेखनां जोषिता	७	१७	१५८
२३५	मार्गाच्यवननिर्जरार्थं० ...	९	८	१९५
२३६	मिथ्यादर्शनाविरति	८	१	१६६
२३७	मिथ्योपदेशरहस्याभ्याख्यान० ...	७	२१	१६०
२३८	मूर्छा परिग्रहः	७	१२	१५५
२३९	मैत्रप्रदक्षिणा०	४	१४	१०२

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पदसङ्ख्या।
२४०	मैत्रीप्रमोदकारुण्य०	७	६	१५३
२४१	मैथुनमब्रह्म	७	११	१५५
२४२	मोहक्षयाज्ज्ञा०	१०	१	२१३

य।

२४३	यथोक्तनिमित्तः ०	१	२३	२२
२४४	योगदुःप्रणिधाना	७	२८	१६३
२४५	योगवक्रता०	६	२१	१४६
२४६	योगोपयोगौ जीवेषु	५	४४	१३८

र।

२४७	रत्न-शर्करा-	३	१	६६
२४८	रूपिणः पुद्गलाः	५	४	१२१
२४९	रूपिष्ववधेः	१	२८	२६
२५०	रूपिष्वादिमान्	५	४३	१३७

ल।

२५१	लब्धिप्रत्ययं च	२	४८	५५
२५२	लब्ध्युपयोगौ भावेन्द्रियम् ...	२	१८	४४
२५३	लोकाकाशे ऽवगाहः	५	१२	१२३

व।

२५४	वर्तना परिणामः ०	५	२२	१२६
२५५	वाचनाप्रच्छना ०	६	२५	२०३
२५६	वाय्वन्तानामेकम्	२	२३	४५
२५७	विग्रहगतौ कर्मयोगः	२	२६	४६
२५८	विग्रहवती च०	२	२९	४७

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पदसङ्ख्या।
२५९	विघ्नकरणमन्तरायस्य	६	२६	१४८
२६०	विचारो ऽर्थव्यञ्जनयोगसंक्रान्तिः	९	४६	२०८
२६१	विजयादिषु द्विचरमाः ...	४	२७	११३
२६२	वितर्कः श्रुतम्	९	४५	२०८
२६३	विधिद्रव्यदात्रु०	७	३४	१६४
२६४	विपरीतं शुभस्य	६	२२	१४७
२६५	विपरीतं मनोज्ञानाम् ...	९	३३	२०५
२६६	विपाको ऽनुभावः	८	२२	१८०
२६७	विशुद्धिक्षेत्र०	१	२६	२४
२६८	विशुद्ध्यप्रतिपाताभ्यां तद्विधेषः ...	१	२५	२४
२६९	विधेषचिसन्न०	४	३७	११५
२७०	वेदनायाश्च	९	३२	२०५
२७१	वेदनीये शेषाः	९	१६	१९७
२७२	वैक्रियमौपपातिकम्	२	४७	५५
२७३	वैमानिकाः	४	१७	१०५
२७४	व्यञ्जनस्यावग्रहः	१	१८	१८
२७५	व्यन्तराः किन्नर०	४	१२	९८
२७६	व्यन्तराणां च	४	४६	११८
२७७	व्रतशीलेषु पञ्च०	७	१९	१५९

श।

२७८	शङ्काकांक्षा०	७	१८	१५८
२७९	शब्दबन्धसौक्ष्म्य०	५	२४	१२८
२८०	शरीरवाङ्मनः०	५	१९	१२५
२८१	शुक्ले चाद्ये	९	२९	२०९
२८२	शुभं विशुद्धमव्याघाति ...	२	४९	५५

अनुक्रमणिका।		अध्याय।	सूत्रसङ्ख्या।	पदसङ्ख्या।
२८३	शुभः पुण्यस्य	६	३	१६६
२८४	श्लेषाः स्पर्शरूप०	४	६	६५
२८५	श्लेषाणां संमूर्छनम्	२	३६	५०
२८६	श्लेषाणां पादोने	४	३१	११४
२८७	श्लेषाणामन्तर्मुहूर्तम्	८	२१	१७६
२८८	श्रुतं मतिपूर्वं	१	२०	१६
२८९	श्रुतमनिन्द्रियस्य	२	२२	४५

स।

२९०	स आस्रवः	६	२	१३६
२९१	स कषायत्वाज्जीवः०	८	२	१६७
२९२	स कषाया०	६	५	१४०
२९३	संक्लिष्टासुरो०	३	५	७३
२९४	स गुप्तिसमिति	९	२	१८३
२९५	संघातभेदेभ्य उत्पद्यन्ते ...	५	२६	१२६
२९६	सङ्ख्येयासङ्ख्येयाश्च०	५	१०	१२२
२९७	सचित्तनिक्षेपपिधान० ...	७	३१	१६३
२९८	सचित्तश्लीतसंवृत्ताः	२	३३	४८
२९९	सचित्तसंबद्ध०	७	३०	१६३
३००	सत्सङ्ख्या०	१	८	१२
३०१	सदसतोरविशेषाद्य०	१	३३	३१
३०२	सदसद्वेद्य	८	९	१६८
३०३	स द्विविधो...	२	९	४१
३०४	सद्वेद्य०	८	२६	१८२
३०५	सप्ततिर्मोहनीयस्य	८	१६	१९९
३०६	स बन्धः	८	३	१६७

अनुक्रमणिका।		अध्याय।	सूत्रसङ्ख्या।	पत्रसङ्ख्या।
३०७	संमूर्छनगर्भोपपाता जन्म ...	२	३२	४८
३०८	समनस्कामनस्काः	२	११	४२
३०९	सम्यक्त्वचारित्रे	२	३	३९
३१०	सम्यग्दर्शन०	१	१	५
३११	सम्यग्दृष्टिश्रावक०	९	४७	२०८
३१२	सम्यग्योगनिग्रहो गुप्तिः ...	९	४	१८३
३१३	सप्त सनत्कुमारे	४	३९	११४
३१४	स यथा नाम	८	२३	१८०
३१५	संयम श्रुत०	९	४९	२१०
३१६	सरागसंयम०	९	२०	१४९
३१७	सर्वद्रव्यपर्यायेषु	१	३०	२९
३१८	सर्वस्य	२	४३	५१
३१९	संसारिणो मुक्ताश्च	२	१०	४२
३२०	संसारिणस्त्रसस्थावराः ...	२	१२	४२
३२१	संज्ञिनः समनस्काः	२	२५	४९
३२२	सागरोपमे	४	३४	११४
३२३	सागरोपमे	४	४०	११९
३२४	सारस्वता०	४	२९	११२
३२५	सामायिक	९	१८	१९८
३२९	सुखदुःख०	५	२०	१२५
३२७	सूक्ष्मसंपराय०	९	१०	१९९
३२८	सो ऽनन्तसमयः	५	३९	१३९
३२९	सौधर्मादिषु यथाक्रमम् ...	४	३३	११४
३३०	सौधर्मैशान०	४	२०	१०९
३३१	स्तेनप्रयोग०	७	२२	१९०

अनुक्रमनम्बर।		अध्याय।	सूत्रसङ्ख्या।	पदसङ्ख्या।
३३२	स्थितिः	४	२९	११३
३३३	स्थितिप्रभाव०	४	२१	१०७
३३४	स्निग्धरूक्ष	५	३२	१३४
३३५	स्पर्शनरसन०	२	२०	४५
३३६	स्पर्शरस०	५	२३	१२८
३३७	स्पर्शरस०	२	२१	४५

ह।

३३८	हिंसादिष्विहामुत्र०	७	४	१५०
३३९	हिंसान्तस्तेयविषय०... ...	९	३६	२०५
३४०	हिंसान्तस्तेया०	७	१	१४९

ज्ञ।

३४१	ज्ञानदर्शनदान०	२	४	३९
३४२	ज्ञानावरणे प्रज्ञाज्ञाने ...	९	१३	१९७
३४३	ज्ञानदर्शनचारित्रोपचाराः ...	९	२३	२०१
३४४	ज्ञानाज्ञानदर्शन०	२	५	३९

Appendix B.

अथ पूजाप्रकरणम् ।

स्नानं पूर्वामुखीभूय प्रतीच्यां दन्तधावनम् ।
उदीच्यां श्वेतवस्त्राणि पूजा पूर्वोत्तरामुखी ॥ १ ॥
गृहे प्रविशतां* वामभागे शल्यविवर्जिते ।
देवतावसरं कुर्यात्सार्धहस्तोर्ध्वभूमिके ॥ २ ॥
नीचैर्भूमिस्थितं कुर्याद्देवतावसरं यदि ।
नीचैर्नीचैस्ततो वंशा†सन्तत्यापि सदा‡ भवेत् ॥ ३ ॥
यथार्चकः स्यात्पूर्वस्या उत्तरस्याश्च संमुखः ।
दक्षिणस्या दिशो वर्जं विदिक्वर्जनमेव च ॥ ४ ॥
पश्चिमाभिमुखः कुर्यात्पूजां जैनेन्द्रमूर्तये ।
चतुर्थसन्ततिच्छेदो§ दक्षिणस्यामसन्ततिः ॥ ५ ॥
आग्नेय्यां तु यदा पूजा धनहानिर्दिने दिने ।
वायव्यां सन्ततिर्नैव नैर्ऋत्यां च कुलक्षयः ॥ ६ ॥
ऐशान्यां कुर्वतां पूजां संस्थितिर्नैव जायते ।
अंघ्रिजानुकरांसेषु मूर्ध्नि पूजा यथाक्रमम् ॥ ७ ॥
श्रीचन्दनं विना नैव पूजां कुर्यात्कदाचन ।
भाले कण्ठे हृदम्भोजोदरे तिलककारणम् ॥ ८ ॥
नवभिस्तिलकैः पूजा करणीया निरन्तरम् ।
प्रभाते प्रथमं वासपूजा कार्या विचक्षणैः ॥ ९ ॥
मध्याह्ने कुसुमैः पूजा संध्यायां धूपदीपयुक् ।
वामाङ्गे धूपदाहः स्यादग्रपूजा तु संमुखी ॥ १० ॥
अर्हतो दक्षिणे भागे दीपस्य विनिवेशनम् ।
ध्यानं च दक्षिणे भागे चैत्यानां वन्दनं तथा ॥ ११ ॥

---

* P सुस्थानके स्थितं । † वंशः ।
‡ A सदं । § तदा स्यात्सन्ततिच्छेदो ।

हस्तात्स्खलितं क्षितौ निपतितं लग्नं क्वचित्पादयो-
र्यन्मूर्धोर्ध्वगतं धृतं कुवसनैर्नाभेरधो यद्धृतम् ।
स्पृष्टं दुर्जनदुर्घनैरभिहतं यद्दूषितं कीटकै-
स्त्याज्यं तत्कुसुमं दलं फलमधो भक्तैर्जिनप्रीतये ॥ १२ ॥
नैकपुष्पं द्विधा कुर्यान्न छिन्द्यात्कलिकामपि ।
चम्पकोत्पलभेदेन भवेद्दोषो विशेषतः ॥ १३ ॥
गन्धधूपाक्षतैः स्रग्भिः प्रदीपैर्बलिवारिभिः ।
प्रधानैश्च फलैः पूजा विधेया श्रीजिनेशितुः ॥ १४ ॥
शान्तौ श्वेतं जये श्यामं भद्रे रक्तं भये हरित् ।
पीतं ध्यानादिकलाभे पञ्चवर्णं तु सिद्धये ॥ १५ ॥
(शान्तौ श्वेतं तथा पीतं लाभे श्यामं पराजये ।
मङ्गलार्थं तथा रक्तं पञ्चवर्णं तु सिद्धये ॥)
खण्डिते सन्धिते छिन्ने रक्ते रौद्रे च वाससि ।
दानपूजातपोहोमसन्ध्यादि निष्फलं भवेत् ॥ १६ ॥
पद्मासनसमासीनो नासाग्रन्यस्तलोचनः ।
मौनी वस्त्रावृतास्योऽयं पूजां कुर्याज्जिनेशितुः ॥ १७ ॥
स्नात्रं* विलेपनविभूषणपुष्पवास-
धूपप्रदीपफलतन्दुलपत्रपूगैः ।
नैवेद्यवारिवसनैश्चमरातपत्र-
वादित्रगीतनटनस्तुतिकोशवृद्ध्या† ॥ १८ ॥
इत्येकविंशतिविधा जिनराजपूजा
ख्याता सुरासुरगणेन कृता सदैव ।
खण्डीकृता कुमतिभिः कलिकालयोगा-
द्यद्यत्प्रियं तदिह भाववशेन योज्यम् ॥ १९ ॥[१]

इति प्रसिद्धा श्रीउमास्वातिवाचकविरचितं पूजाप्रकरणं समाप्तम् ॥

---

* स्नानं। † P ०कोशवृद्धिः ।

१. Peterson's third Report App. I. P. 328. Folios 3.
पूजाविधिप्रकरणं सभाषम् सू० उमास्वातिवाचकः ।

Appendix C.

अथ जम्बूद्वीपसमासः ।

सर्वजननयनकान्तं नखलेखाविस्तृतदीधितिवितानम् ।
पादयुगचन्द्रमण्डलमभिरचतु नः सदा जैनम् ॥

जम्बूद्वीपः सर्वमध्ये वृत्तो लक्षमानो दैर्घ्यविस्ताराभ्यां योजनलक्षषोड़शसहस्रसप्तविंशद्विशतत्रिगव्यूताष्टाविंशधनुःशतत्रयोदशाङ्गुलार्धाङ्गुलसप्तेषपरिधिः स्वनामदेवताचतुरष्टचतुर्विस्तारोच्छ्रायप्रवेशविजयादिचतुर्द्वारः वज्रमयजगतीवृतः । साष्टोच्छ्रायचतुर्द्वादशोपर्यधोविस्तृता* । तचार्धयोजनो रत्नमयो जालकटको जगत्यष्टभागविस्तृतः । तदुपरि पद्मवरवेदिका कटकमाना विचित्ररत्नमयस्तम्भफलकसंघाटकशूचीवंशवंशकवेल्लुकनिर्माणा गवाक्षहेमकिंकिणीघण्टारजतमणिमुक्तापद्मतालकरचना वायुसंपातसंघट्टशब्दवती नानालतासंघाटकान्तरस्तम्भान्तरावृत्पलादिरचना उभयतो वेदिकावनखण्डवती । तानि वनानि रूपरसगन्धस्पर्शशब्दसुखोपेतमणिव्रणानि रत्नमयचित्रसोपानस्थगनतोरणाष्टमङ्गलध्वजपर्वतकान्दोलकगृहकमण्डपकासनवेदिकावच्चित्रजलवापीभूषितानि । तद्दक्षिणभागे **भरत**माहिमवतः षड्विंशपञ्चयोजनशतसषट्कलविस्तृतं विजयाद्यगङ्गासिन्धुषोढाविभक्तं मागधवरदामप्रभासतीर्थद्वारं तत्स्थतन्नामदेवं तद्दक्षिणभागमध्यायोध्यम् । तन्मध्ये पूर्वापरतः पञ्चविंशतियोजनोच्छ्रायस्तत्पादावगाढः पञ्चाशद्विस्तृतो रुचकसंस्थितः सर्वरा-

---

* टी. संघाटकैः नरशरीरप्रमाणैः शूचीभिः प्रतिबन्धैः । † टी॰ adds वन ।

जतो **विजयाद्धः** स्वविस्ताररहितभारतमानार्धदक्षिणोत्तरविभागो उभयतो वेदिकावनखण्डवान्। तदपरभागे तमिस्रागुहा गिरिविस्तारायामा द्वादशाष्टविस्तारोच्छ्राया विजयद्वारप्रमाणद्वारा वज्रकपाटपिहिता कृतमालकदेववसतिर्बह्वमध्यद्वियोजनान्तरचियोजनविस्तारोन्मग्ननिमग्नजलाख्यसरिद्वती। तदत्पूर्वतः खण्डप्रपातागुहा नृत्तमालकवसतिः। तच्च दशयोजनान्यारुह्योभयतो विद्याधरश्रेण्यौ दशकविस्तृते पर्वतायामे सवेदिकावनखण्डे। तत्र दक्षिणा सजनपदरथनूपुरचक्रवालप्रमुखपञ्चाशन्नगरवती विचित्रमणिपुष्करिण्युद्यानक्रीडास्थानविभूषिता। तथोत्तरा गगनवल्लभपुरस्सरषष्टिनगरा। तत्र विद्याप्रसादोपहिताभीष्टभोगभुजो विद्याधराः। ततो दशसु तद्वदाभियोग्यश्रेण्यौ समातिरम्यभूमी इन्द्रलोकपालाभियोग्यभवनालंकृते तदाश्रये। ततः पञ्चसु शिखरतलं दशकविस्तृतं वेदिकावनवदतिरुचिरं देवक्रीडास्थानम्। तत्र नवकूटानि सिद्धायतन- दक्षिणार्धभरत- खण्डप्रपात- माणिभद्र- विजयार्द्ध- पूर्णभद्र- तमिस्रा-गुहोत्तरार्धभरत-वैश्रवण*ख्यानि प्राङ्मुखाद्गणानि गिरिपादोच्छ्रायाणि तावन्मूलविस्ताराणि उपरि तदर्धं सर्वरत्नमयानि मध्ये चौणि कनकमयानि। तत्र च प्रथमे सिद्धायतनं क्रोशार्धक्रोशदैर्घ्यविस्तारं किंचिन्यूनतदुच्छ्रयं रत्नचित्रालोकं पञ्चधनुःशतदर्धार्धोच्छ्रायविस्तारप्रवेशचिद्वारं न पश्चात्। उभयतः पञ्चशत पूर्णकलश-नागदन्तक-शालभञ्जिका-जालकटक-घण्टा-वनमालाक्रमरचनानि। तन्मध्ये मणिपीठिका पञ्चधनुःशतायामविष्कम्भा तदर्ध-

* वैश्रमण।

पृथुः । तदुपरि देवच्छन्दकः पञ्चधनुःशत उभयतस्तदधिकोच्छ्रायः । तच्च प्रतिमाष्टशतं जिनमानम् । तदपरं दक्षिणार्धभरतकूटं तद्वत् । तदुपरि प्रासादः पूर्वमानः । तन्मध्ये मणिपीठिकायां सिंहासनमधिपपरिवारसिंहासनवृतम् । तदधिपो भरतः पल्योपमस्थितिर्देवः । तद्दक्षिणतोऽन्यजम्बूद्वीपे भरतराजधानी भरतनिवासः । तथा शेषेषु पञ्चसु स्वनामानो देवाः । द्वयोर्नृत्तमालनृत्तमालकौ ॥

वृषभकूटो हिमवन्मध्यभागदक्षिणनितम्बे रत्नमयो ऽष्टावुच्छ्रितः चतुर्द्वादशोपर्यधोविस्तृत ऋषभदेववासः ।

(इति भरतक्षेत्रसंक्षेपः)

भरतोत्तरतो **हिमवान्** पूर्वापरतो लवणावबद्धो भरतद्विगुणविस्तारः शतोच्छ्रायो हेममयो मणिविचित्रः । तदुपरि बहुमध्ये **पद्महृदः** प्रागपरायितसहस्रं पञ्चशतविस्तृतः चतुःकर्णो* दशयोजनावगाढो रजतकूलो वज्रमयपाषाणः तपनीयतलः सुवर्णमध्यरजतमणिपालिकः चतुर्दिक्षमणिसोपानः स्ववतारोत्तारः तोरणध्वजच्छत्रादिभूषितो नीलोत्पल-पौण्डरीक-शतपत्र-सौगन्धिकादिपुष्पचितो विचित्रशकुनिमत्स्यविचरितः षट्पदोपभोग्यः । तन्मध्ये योजनमानं पद्ममर्धयोजनपृथु दशावगाढं जलाद्विक्रोशोच्छ्रयं वज्रारिष्टवैडूर्यमूलकण्डनालं वैडूर्यजाम्बूनदबाह्याभ्यन्तःपत्रं कनककर्णिकं तपनीयकेसरं नानामणिमयपुष्करम् । कर्णिकार्धयोजना तदर्धपृथुः । तदुपरि भवनं विजयार्धवत् । मणिपीठिकायां श्रीदेव्याः शय्या । तदन्येन तल्लक्षणेनाब्जशतेन तदर्धमानेन वृतम् । तथा ऋद्धैकैकचतु-

* द्वौ. चतुरस्रः ।

र्दिचु क्रमशश्चतुरष्टदशद्वादशषोडशसहस्रेषु द्वितीयषष्ठयोः स्थानयोश्चतुःशतेषु पद्मेषु तत्सामानिकमहत्तरिकातदभ्यन्तरमध्यबाह्यपर्षदनीकाधिपात्मरक्षादिस्थानानि पश्चिमोत्तरक्रमाङ्कितानि । तद्बाह्यं शतचत्वारिंशदष्टचत्वारिंशल्लक्षसंख्याभिस्तिसृभिः पंक्तिभिर्वृतम् ॥

तत्पौरस्त्यतोरणप्रवहा गङ्गा प्राग्गिरिणा* पञ्चशतगा गङ्गावर्तनकूटेनावर्तिता दक्षिणेन सप्तषष्टयोविंशतिसहितानि पञ्चशतानि गता षट्क्रोशविस्तृता प्रवहे ऽर्धत्रिषष्टिर्मुखे मुखप्रमाणवेदिका सर्वत्र । तत्प्रपाते वज्रमयी जिह्विकार्धयोजनायामा षडधिकविस्तृतार्धक्रोशपृथुला विवृतमकरमुखाकृतिः ॥

वज्रतलं तदधो गङ्गाप्रपातकुण्डं षष्टियोजनमायामविष्कम्भाभ्यां अधःपञ्चाशद्योजनावगाढं त्रिसोपानतोरणादिमत् । तन्मध्ये गङ्गाद्वीपो ऽष्टकायामविष्कम्भः । तन्मध्ये भवनं तदत्पीठिकायां शय्या गङ्गायाः । तद्दक्षिणतोरणगा खण्डकप्रपातगुहाविजयाद्यविदारिका दक्षिणार्धभरतमध्यप्राक्प्रवृत्ता अर्धार्धसमुत्यचतुर्दशसहस्रसरिद्वृता प्रवाहे अधो ऽर्धक्रोशा सपादयोजना मुखे जगतीदारणसमुद्रानुप्रवेशा ॥

तथापरेण† सिन्धुः स्वकुण्डद्वीपतमिस्रागुहाविशिष्टा । षट्सप्ततिद्विशतषट्कलोत्तरगा तथा रोहितांशा गङ्गाद्विगुणसर्वमाना स्वनामदेवीकुण्डद्वीपा शब्दापात्यार्धयोजनाप्राप्तापरगा हैमवतपार्श्वात्याब्धिगामिनी । हिमवति सिद्धायतनचुल्लहिमवद्धरतेलागङ्गाश्रीरोहितांशासिन्धुसुराहैमवतवैश्रमणकूटान्येकादश सर्वरत्नमयानि स्वनामदेवतास्थानानि पञ्चशतोच्छ्रायाणि तावदधोविस्तृतान्युपरि

---

* डो. पूर्वाभिमुखो । † Ms. omits तथा.

तदर्धम् । प्रथमे जिनगृहं पञ्चाशत्तदर्धायामविष्कम्भं षट्त्रिंशदुच्च मष्टायामचतुर्विष्कम्भप्रवेशचिद्वारम् । मध्ये ऽष्टयोजनानि विस्तारायामाभ्यां मणिपीठिका चतुःपृथ्वी । तन्मानो देवच्छंदकः साधिकायामोच्छ्रयः । प्रतिमादि तद्वत् । शेषेषु प्रासादाः सार्धद्विषष्टियोजनोच्चास्तदर्धविस्तृताः सिंहासनवन्तः सिद्धायतनवत् ॥

(इति हिमवत्संग्रहः)

हिमवदुत्तरं **हैमवतं** तद्द्विगुणविष्कम्भं (हिमवतो गिरेरुदीचीनं) । तच्च मिथुनानि गव्यूतोच्चानि पल्यस्थितीनि चतुर्थभक्तभोजीन्येकोनाशीतिदिनस्वापत्यपालकानि चतुःषष्टिपृष्ठानि । तन्मध्ये वृत्तो विविधरत्नमयः सर्वतः साहस्रः शब्दापाती गिरिः । तदुपरि स्वातेर्भवनं हिमवतः कूटवत् ॥ (इति हैमवतसमाहारः)

तदुत्तरो ऽर्जुनमयो **महाहिमवान्** हैमवतद्विगुणविस्तारो द्विशतोच्चः । तच्च महापद्मो ह्रदो द्विसहस्रायामस्तदर्धविष्कम्भस्तदुत्पन्नास्रवान् ह्रीदेवीवासः* । तद्दक्षिणप्रवाहा रोहित्स्वनामदेवीकुण्डरोहितांशामाना पूर्वोदधिगा ह्रदविस्तारापनीतपर्वतार्धदक्षिणगा अष्टाविंशतिसहस्रनदीवृता । उत्तरा हरिकान्ता पञ्चविंशतियोजनप्रवहा तन्मानजिह्विका चत्वारिंशदधिकद्विशतकुण्डा द्वीपो द्वात्रिंशत् गन्धापातियोजनाप्राप्तापरनिवृत्ता षट्पञ्चाशत्सहस्रानुगापरोदधिगा । तच्च सिद्धमहाहिमवद्धैमवतरोहिताह्रीहरिकान्ताहरिवैडूर्यकूटान्यष्टौ हिमवत्तुल्यानि स्वनामदेवतानि ॥

(इति महाहिमवत्समासः)

---

* Var. V. takes तदुत्पन्न to देव्यावासः to be a separate Sūtra.

तदुत्तरं हरिवर्षं महाहिमवद्द्विगुणं पूर्वद्विगुणमानचतुःषष्टि-दिनपालनमिथुनम् । तन्मध्ये गन्धापाती वृत्तो ऽरुणाधिवासः शब्दापातिवत् ॥

(इति हरिवर्षचेत्रसंचेपः)

तदुत्तरस्यापनीयमथो **निषधो** हरिवर्षद्विगुणविस्तारश्चतुःशतोच्चः । तन्मध्ये तिगिच्छिह्रदश्चतुर्दिसहस्रायामविष्कम्भः तद्धृतिदेवीसत्कः । तद्दक्षिणगा स्वनामद्वीपा हरिकान्तावत् हरित्पूर्वसमुद्रपातिनी । उत्तरेण सीतोदा पद्माशत्रवहा तन्मानजिह्विका हरिद्द्विगुणकुण्डद्वीपमाना निषधदेवकुरुसूर्यसुलसविद्युत्प्रभह्रद-मध्यविभागा चतुरशीतिनदीसहस्रानुगतभद्रशाला द्वियोजनाप्राप्त-मन्दरापरनिवृत्ता विद्युत्प्रभदारिका अपरविदेहद्विधाकर्त्री एकैक-विजयादष्टाविंशतिसरित्सहस्रानुगा जयन्तद्वाराधोजगतीभेदा अप-रोदधिगा। तच्च नवकूटानि हिमवद्वृष्टव्यानि (हिमवद्वत्!) सिद्धनि-षधहरिवर्षप्राग्विदेहहरिधृतिसीतोदापरविदेहरुचकाख्यानि स्वनाम-देवतानि ॥

(इति निषधोद्धारः)

तदुत्तरो वैडूर्यमयः कीर्त्याश्रयकेसरिह्रदौ **नीलः** सिद्ध-नील-प्राग्विदेह-सीता-कीर्ति-नार्यपरविदेह-रम्यकोपदर्शनकूटो निष-धमानः । तच्च दक्षिणगामिनौ सीता नीलोत्तरकुरुचन्द्रैरावतह्रद-माल्यवद्गदगिरिभेदिनौ प्राग्विदेहच्छेदिनौ विजयद्वाराधोगतिः सीतोदावत् । तथा नारी हरिद्वदुत्तरापरोदधिगा ॥

(इति नीलगिरिसमासः)

तदुत्तरं **रम्यकं** हरिवर्षवत्। तत्र च माल्यवान् विजयार्धः पद्मदेवाधिवासः॥

(इति रम्यकम्)

तदुदग्राजतो बुद्ध्याश्रयमहापुण्डरीकह्रदो **रुक्मी** सिद्धरुक्मि रम्यकनरकान्तबुद्धिरौप्यहैरण्यवतमणिकाञ्चनकूटो महाहिमवद्वत्। तत्र दक्षिणा नरकान्ता पूर्वगा हरिकान्तावत्। रूप्यकूलोत्तरापरगा रोहिद्वत्॥

(इति रुक्मी)

तदुत्तरं **हैरण्यवतं** हैमवतवत्। तत्र च विकटापाती प्रभासाधिवासो विजयार्धस्तद्वत्॥

(इति हैरण्यवतम्)

तदनन्तरस्तपनीयमयो लक्ष्मीसत्कपौण्डरीकह्रदवान् **शिखरी** सिद्ध- शिख- रहैरण्यवत- सुरादेवी- रक्ता- लक्ष्मी- सुवर्ण- रक्तोदागन्धा-पात्यैरावततिगिच्छिकूटो हिमवद्वत्। ततः सुवर्णकूला दक्षिणा पूर्वगामिनी रोहितांशावत् तथा रक्तारक्तोदे उत्तरे गङ्गासिन्धुवत्॥

(इति शिखरी)

सर्वोत्तरमैरावतं भरतवत्। तन्मध्ये* विजयार्धो विपर्ययनगरसञ्ज्ञस्तद्देशानलोकपालाभियोग्याधिवासः॥

(इति ऐरावतम्)

(इति प्रथममाह्निकम्)

---

* Var V तदुपरि च।

अथ द्वितीयमाह्निकम् ।

निषधनीलमध्ये महाविदेहं निषधद्विगुणविष्कम्भं मध्यलक्षायामम् ॥

तन्मध्ये ऽधः सहस्रावगाढो नवनवत्युच्छ्रयो दशाधोविस्तृत उपर्येकसाहस्रस्त्रिकाण्डस्त्रिलोकप्रविभक्तमूर्त्तिः सर्वरत्नमयो **मेरुः** पृथिव्युपलवज्रशर्करामयमकाण्डो ऽङ्कस्फटिकरजतरूपमध्य उपरि जाम्बूनदः । प्रथमं साहस्रं त्रिषष्टिषट्त्रिंशत्साहस्रे इतरे । तत्र भद्रशालनन्दनसौमनसपण्डकानि वनानि । धरण्यां **भद्रशालं** चतुर्वचारपर्वतविभक्तं द्वाविंशतिसहस्रं मेरोः पूर्वेण तथापरेणोत्तरेणार्धद्वतीयशतं तथा दक्षिणेन । पञ्चाशत्सु योजनेषु चतुर्दिक्ष्यानि सिद्धायतनानि हिमवद्वत् । तथा तावति पुष्करिण्यो विदिक्षु चतसः चतसः पञ्चविंशतिविष्कम्भास्तद्विगुणायामा दशावगाढाः पद्मा-पद्मप्रभा-कुमुदा-कुमुदप्रभोत्पलगुल्मा-नलिन्युत्पलोत्पलोज्ज्वला-भृङ्गा-भृङ्गनिभाञ्जना-कज्जलप्रभा-श्रीकान्ता-श्रीमहिता-श्रीचन्द्रा-श्रीनिलयाः प्रागुत्तरक्रमाद्गुणाः । तन्मध्ये प्रासादाः पञ्चशतोच्चास्तदर्धविस्तृताः सिंहासनवन्तो दक्षिणौ शक्रस्य उत्तरावीशानस्य । सीतासीतोदोभयकूलेषु द्वौ द्वौ पद्मोत्तरनीलसुहृत्यञ्जनकुमुदपलाशवडंश*रोचनकूटगिरयः सीतोत्तरक्रमाद्धिमवत्कूटवत्स्वनामदेवाः ॥ तदुपरि पञ्चशत्यां **नन्दनं** वृत्तं पञ्चशतविस्तृतं तद्वदायतनप्रासादवत् । पुष्करिण्यः नन्दोत्तरा नन्दा सुनन्दा नन्दिवर्धना नन्दिषेणा अमोघा गोस्तूपा सुदर्शना भद्रा

* V वतंसो वा ।

विशाला कुमुदा पुण्डरीकिणी विजया विजयन्ती जयन्ता अपराजिता। नन्दनमन्दरनिषधहैमवतरजतरुचकसागरचित्तवज्र-कूटानि दिक्कुमारीस्थानानि। ताश्च नामतो मेघंकरा मेघवती सुमेघा मेघमालिनी सुवच्छा वच्छमित्रा च वारिषेणा बलाहका। तथा नवमं बलकूटं प्रागुत्तरं साहस्रं तद्विस्तृतं तदर्धमुपरि बलावसतिः। खदिचु राजधान्यस्तासाम्॥ अर्धत्रिषष्टिसहस्रेषु **सौमनसं** नन्दनवनवत्। कूटवर्ज्याः पुष्करिण्यः सुमनाः सौमनसा सौमनांशा मनोरमा उत्तरकुरुः देवकुरुः वीरसेना सरस्वती विशाला माघभद्रा भयसेना रोहिणी भद्रोत्तरा भद्रा सुभद्रा भद्रावती॥ ततः षट्त्रिंशत्सु **पण्डकं** चतुर्णवचतुःशतं। तन्मध्ये चूलिका चत्वारिंशद्योजनोच्चा चतुर्दादशोपर्यधोविस्तृता वैडूर्यमयी। तत्र जिनायतनं विजयार्धवत्। वनं तथा कूटवर्ज्ये पुष्करिण्यः पुण्ड्रा पुण्ड्राभा सुरक्ता रक्तवती क्षीररसा इक्षुरसा अमृतरसा वारुणी ग्रह्वोत्तरा ग्रह्वा ग्रह्वावर्ता बलाहका पुष्पोत्तरा पुष्पवती सुपुष्पा पुष्पमालिनी। पाण्डके*चतस्रो ऽभिषेकशिला दिचु पाण्डुतिपाण्डुरकातिरक्तकम्बलाख्याश्चतुर्योजनोत्सेधाः पञ्चशतायामास्तदर्धविस्तारा अर्धचन्द्राकारा अर्जुनकनकमय्यश्चतुर्दिक्षुचिसोपाना वेदिका वनखण्डतोरणध्वजच्छत्रादियुक्ताः। पूर्वापरयोर्द्वे द्वे सिंहासने पञ्चधनुःशतायामविष्कम्भे तदर्धपृथुनी। तयोर्दक्षिणोत्तरतीर्थकराभिषेकः॥ (इति मेरुः)

गजदन्ताकृतयो विदिचु मेरोः चत्वारो वक्षस्कारपर्वताः सौम-

---

* Var V पाण्डकवने वनाग्रे वा (पाठः)।

नसविद्युत्प्रभगन्धमादनमाल्यवन्तः प्राग्दक्षिणक्रमात् रजततपनीयकनकवैडूर्यमयाः सप्तनवसप्तनवकूटाः बहिश्चतुःशतोच्चाः पञ्चशतविस्तृताः माचार्दृष्ट्वा मेरुसमीपे पञ्चशतोच्चा विस्तारहान्याङ्कुलासङ्ख्येयभागविस्तारा अश्वस्कन्धाकृतयः त्रिंशत्सहस्रद्विशतनवोत्तरषट्कलायामाः सर्वे ऽत्र हिमवत्तुल्यसिद्धायतनकूटाः । तत्र प्रथमे सौमनसभद्रशालापातिदेवकुरुविमलकाञ्चनविशिष्टानि । विमलकाञ्चनयोस्तोयधारावित्रिचे देवते । द्वितीये विद्युत्प्रभ-देवकुरु-पद्म-कनकस्वस्तिक-शीतोदा-सदाजल-हरिकूटानि । कनकस्वस्तिकयोः पुष्पमाला अनन्दिता । ततो गन्धमादनगन्धेलावदुत्तरकुरुस्फाटिकलोहितानन्दानि । स्फाटिकलोहितयोर्भोगंकरा भोगवती । ततो माल्यवदुत्तरकुरुकच्छसागररजतशीतापूर्णभद्रहरित्सहानि पञ्चमषष्ठयोर्भोगाभोगमालिन्यौ । हरिहरित्सहकूटे बलतुल्ये ।

(इति वक्षस्काराः ।)

मन्दरनीलयोरुत्तरदक्षिणा गन्धमादनमाल्यवतोर्मध्ये **उत्तराः कुरवः** एकादशयोजनसहस्रद्विशतचत्वारिंशाष्टशतसद्विकलाविस्तृताः समरम्यमणिहृणविभूषितभुवो वापीपुष्करिणीपर्वतकगृहमण्डपकसुखस्पर्शदृश्यशिलापट्टकमण्डिता विविध*गुल्मपुष्पवनकृतार्चाश्चित्रवृक्षलताशोभिता नानाकृतिवनराजयः । तत्र वृक्षाः मद्राङ्गा मधुप्रसन्नासवारिष्टादिफलरसस्यन्दिनो भृङ्गाः कर्करीस्थालमणिभाजनादियुक्ताः तूर्याङ्गा विस्रसापरिणामादिचित्रवादित्रशब्दवन्तः दीपशिखादीपविशेषज्वालिनः ज्योतिषः सर्वरत्नकल्पाः चित्राङ्गाः प्रेक्षामण्डपाकार-

* विविध ।

विचित्रकल्पितमाल्यवन्तः चित्ररसाः स्वादुभोजनस्वाद्यकसंपन्ना मणिङ्गा यथाभिप्रेतभूषणवन्तो गेहाकारा एकग्रामादिगृहविन्यासिनो अनग्णा (अनाढ्या) वस्त्रसंपन्नाः। स्त्रियो लक्षणवत्यः परमरूपाः शृङ्गारादिकलावेदिन्यो जराव्याधिदौर्भाग्यशोकाद्यनिष्टरहितास्तथा पुरुषाः सुरभिनिश्वासा अस्वेदमलरजसः मच्छायादीप्रवज्रर्षभनाराचसंहननाः समचतुरस्रास्त्रिगव्यूतोच्चाः* किंचिदूनाः स्त्रियः षट्पञ्चाग्रद्विशतपृष्ठा भद्राः संतुष्टा यथाभिरुचितस्थाना मिथुनधर्माणस्त्रिपल्योपमायुषो अष्टमभक्तपृथिवीपुष्पफलाशनाः प्रधाना आबाधाविषाहादिरहिता एकोनपञ्चाशद्रात्रिंदिवापत्यपालकाः सुखयुग्ममृत्यवो देवगतयः।

सीतापूर्वापरगौ नीलाश्चतुस्त्रिंशाष्टशतसचतुःसप्तभागदक्षिणौ **यमकपर्वतौ** योजनसहस्रोच्चौ तावदधोविस्तृतौ तदर्धमुपरि कनकमयौ। तथा प्रासादौ यमकयोर्हिमवद्वत्। तावति दक्षिणेन नीलाह्वा ह्रदा वज्रत्रिसोपानतोरणाः पद्मह्रदवत्स्वनामदेवताधिवासाः। तेषां प्रागपरस्था दशदशकाञ्चनकगाः शतोच्चास्तदर्धमूलोपरिविस्तारः काञ्चनदेवताधिवासा दशयोजनावाधस्थानाः॥

उत्तरकुरुपूर्वार्धमध्ये जाम्बूनदमयं **जम्बूपीठं** पञ्चशताधामविस्तारं मध्ये द्वादश पृथु अन्ते क्रोशद्वयं चतुर्दिग्द्वारम्। तदुपरि वैडूर्यपर्णस्तपनीयवृन्तो जाम्बूनदः सुकुमारः रक्तपल्लवप्रवालाङ्कुरधरो विचित्रमणिरत्नसुरभिपुष्पो जम्बूवृक्षः तदमृतरसषड्दशफलं। प्राच्ये शाखे भवनं दृतरेषु प्रासादाः मध्ये सिद्धायतनं सर्वाणि विजयार्धमानानि। तत्परिवारो ऽष्टशतं तदर्धमानं जम्बूनां प्रत्येकं षट्-

* त्रिगव्यूतोच्चास्त्रिक्रोशोच्चाः।

कटकमानवेदिकावृतम् । अनादृतदेववासः तत्परिवारदेवसङ्घावासनवृत्तबहिर्वृतः श्रीपद्मवद्बहिः शतयोजनमानत्रिवनखण्डवृतः । योजनपञ्चाशतमवगाह्य प्रथमवनखण्डे चतुर्दिक्षानि भवनानि । विदिक्षु चतुश्चतुःपुष्करिणीमध्ये प्रासादाः । पुष्करिण्यः क्रोशार्धक्रोशपञ्चधनुःशतायामविष्कम्भावगाहा नन्दावग्निष्ठाः । भवनप्रासादमध्येऽष्टौ कूटानि जाम्बूनदानि योजनाष्टकोच्चानि तावन्मूलविस्ताराणि तदर्धमुपरि । तत्रायतनानि जिनानाम् । शालेषु वनपूर्वोत्तरे प्रासादे सिंहासनानि ॥

(इति उत्तरकुरुसंक्षेपः)

मन्दरदक्षिणास्तथा **देवकुरवः**। निषधोत्तरौ चित्रविचित्रकूटौ यमकवत्। तथा ह्रदा निषधादयः। तदपरार्धे शाल्मलीवृक्षो गरुडावासो जम्बूवत्पीठकूटानि राजतानीति विशेषः ॥

(इति देवकुरुसंक्षेपः)

विदेहयोर्द्वात्रिंशद्विजयाः। उत्तरा विजयाश्च गङ्गासिन्धुविभक्ताः दक्षिणा रक्तारक्तोदाभ्यां भरतवत् । षोडशयोजनसहस्रद्विनवतपञ्चशतद्विकलायामा द्वियोजनसहस्रसप्तशतोद्विशतकिंचिदूनविस्तारा निजविस्तारायामद्वितीयाष्टमखविजयदक्षिणोत्तरार्धाख्यकूटपञ्चपञ्चाशन्नगरविजयार्धाः । उदग्विजयार्धाभियोग्यश्रेण्यौ शक्रस्य लोकपालानाम् । निषधनीलवन्तवर्षधरकूटाः तन्नितम्बकुण्डनदीप्रवहाः । विजयनामचक्रवर्तिनः सीतासीतोदातीर्थाः। कच्छसुकच्छमहाकच्छकच्छवदावर्तलाङ्गलावर्त्तपुष्करपुष्करवन्तः प्राग्विदेहोत्तराः वत्ससुवत्समहावत्सवत्सवद्रम्यरम्यकरमणीयमङ्गलवन्तः पद्म-

सुपद्म-महापद्म-पद्मवच्छङ्ख-कुमुद-नलिन-सलिलवन्तो दक्षिणाः वप्र-सुवप्र-महावप्र-वप्रवद्वल्गु-सुवल्गु-गन्धिलगन्धिलवन्तः मान्यवच्छैलासन्नप्रदेशात् प्रभृति प्रादक्षिण्येनानुक्रमेण । गिरिनदीविभक्ताः । चत्वारो गिरयः तिस्रो नद्यः । अर्धे ऽर्धे गिरयो वक्षस्काराकृतयस्तद्विस्तारोच्छ्राया मूलविस्तारसर्वसमा ऋजवः सर्वरत्नमयाः सिद्धसनामपूर्वापरानन्तरविजयाख्यचतुःकूटाः नद्यासन्नसिद्धकूटाश्चित्रपद्मनलिनैकशैलाः चित्रकूटवैश्रवणसुदर्शनाञ्जना अङ्कपद्मवदाशीविषसुखावहाः चन्द्रसूर्यनागदेवगिरयः । राजधान्यो द्वादशनवयोजनायामविस्ताराः क्षेमा-क्षेमपुरारिष्टा-रिष्टपुरा-खड्गा-मञ्जूषौषधी-पौण्डरीकिण्यः सुसीमा-कुण्डलापराजिता-प्रभाकराङ्कवती-पद्मावती-शुभा-रत्नसंचयाः अश्वसिंहमहाविजयपुरा-राज्या-विराज्या अशोका-वीतशोका-विजया-विजयन्ता-जयन्तापराजिता-चक्रखड्गपुरा-वध्यायोध्या । नद्यो विजयच्छेदिन्यो रोहितावत्कुण्डद्वीपाः स्वनामदेवीवासाष्टाविंशतिनदीसहस्रानुगाः प्रत्येकं सर्वसमाः पञ्चविंशशतविस्तृताः अर्धचतीययोजनावगाहा ग्राहह्रदपद्मवत्यस्तप्तमत्तोन्मत्तजलाः क्षीरोदासिंहस्रोतान्तर्वाहिण्य ऊर्मिफेनगभीरमालिन्यः । प्राक्पश्चात्सीतासीतोदामुखवने देवोद्याने दक्षिणोत्तरे विभागे गिरिसमीपे कलाविस्तृते इतरपार्श्वद्वियोजनसहस्रद्वाविंशनवशते ॥

जघन्येन चत्वारस्तीर्थकृतो जम्बूद्वीपे तथा चक्रवर्तिबलदेववासुदेवा उत्कर्षेण चतुस्त्रिंशज्जिनचित्तीशाः ॥

(इति विजयाः) ।

इति द्वितीयमाह्निकम् ॥

अथ तृतीयमाह्निकम् ।

जम्बूद्वीपद्विगुणद्विगुणमाना द्वीपसमुद्राः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः सर्वशुभवर्णादिनामानो ऽर्धतृतीयोद्धारसागरोपमसमयसङ्ख्या वेदिकावद्वैवक्रीडोपभोग्यविचित्ररम्यभूमिभागा मानुषोत्तरबाह्याः ॥

तत्र **लवणोदधिः** सहस्रावगाढो मात्रया सप्तनवतोच्छ्रितगोतीर्थपथेन पञ्चनवतिसहस्रः षोडशसहस्रशिखः । स दशविस्तृता अभ्यन्तरतो बाह्यतश्च । तदुपरि द्वौ कालौ न्यूनार्धयोजनं ह्रासवृद्धिः । तत्र मध्ये लाक्षाश्वतुर्दिक्षु पाताला वडवामुखकेयूपयूपकेश्वराख्याः साहस्रा वज्रमयकुड्या दशसहस्राण्यधोमुखे च कालमहाकालवेलम्बप्रभञ्जनावासा वायुधृतत्रिभागजला महालिंजराकृतयः । क्षुल्लकाश्चान्ये साहस्रा अधोमुखे च शत्याः दशकुड्याः वायून्नामितमध्यमिश्रोपरिजलाः सप्तसहस्रचतुरशीताष्टशतसर्वाग्रसङ्ख्याः । द्विचत्वारिंशद्विसप्ततिषष्टिसहस्रसङ्ख्याः तत्रान्तर्बाह्यवेलाशिखाधारिणो नागाः । गोस्तूपोदकाभासशङ्खोदकसीमानो वेलाधारीन्द्रगिरयः कनकाङ्करजतस्फटिकमया गोस्तूपशिवकशङ्खमनोहृदवासा द्विचत्वारिंशत्सहस्रेषु दिश्या एकविंशसप्तदशशतोच्चा अधो द्वाविंशत्यधिकसहस्रविस्तारा उपरि चतुर्विंशचतुःशताः । तदुपरि प्रासादा हिमवदत् । कर्कोटककार्दमकैलासारुणप्रभानुवेलाधारीन्द्रगिरयः सर्वरत्नमयाः । द्वादशसु सहस्रेषु प्राक्चन्द्रद्वीपौ तावद्विस्तारायामौ तावत्परेण सविचोस्तथागौतमद्वीपः सुस्थितावासः तावति तथान्तर्बाह्यलावणकचन्द्रसूर्याणाम् ॥

तथा शेषद्वीपेषु पञ्चानाम् । खद्वीपेषु सर्वेषु प्रासादा हिमवद्वत् तद्राजधान्यश्च प्राक्पश्चात् ॥

लवणवर्ज्याः समा अक्षुभितोदका उदधयः ॥

हिमवतः प्राक्पश्चादिदिक्षु आदिषु नवान्तेषु योजनशतेषु उदधाववगाह्य तावद्विस्तारायामाः सप्तसप्तान्तरद्वीपाश्चतुश्चतुः प्रागुत्तरक्रमात् एकोरुकाभाषिकलाङ्गूलिकवैषाणिका हयकर्णगजकर्णगोकर्णशष्कुलीकर्णा आदर्शमुखमेषमुखहयमुखगजमुखा अश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखा अश्वकर्णसिंहकर्णहस्तिकर्णकर्णप्रावरणा उल्कामुखविद्युज्जिह्वमेघमुखविद्युद्दन्ताः घनदन्तगूढदन्तविशिष्टदन्तशुद्धदन्ताख्याः । तेषु हैमवतवद्युग्मपुरुषाः तदाख्याः अष्टधनुःशतोच्चाः पल्योपमासङ्ख्येयभागायुषः । तथा शिखरिणोऽपि ॥

(इति लवणोदधिसमासः)

धातकीखण्डदक्षिणोत्तराविष्वाकारनगौ सहस्रविस्तृतौ तदर्धोच्चौ चेचायामौ पुष्करार्धे च तुल्यावगाहोच्छ्रायाभ्याम् । स्वपरिधिद्विगुणविस्तारा गजदन्ताकृतयो वक्षारा द्विमेखलाश्च पूर्वसूत्रगाः वंशधराश्चतुर्गुणाः परस्परतः सर्वसमाश्च ह्रदनदीकुण्डद्वीपकाश्चनयमकचित्रविचित्रवर्षभकूटवृत्तविजयार्धाः स्वायामतश्च दीर्घशैलमुखवनायामाः क्षेत्रतो ऽनुमेयाः नदीनामवगाहश्च स्वविस्तारात् । योजनत्रिलक्षषट्पञ्चाशत्सहस्रसप्तविंशद्विशतायामौ विद्युत्प्रभगन्धमादनौ पञ्चलक्षैकाशीतिसहस्रैकाशषष्टिशतायामौ माल्यवत्सौमनसौ षोडशलक्षषड्विंशतिसहस्रषोडशोत्तरशतायामौ विद्युत्प्रभगन्धमादनौ विंशतिलक्षचित्वारिंशत्सहस्रैकाशविंशतायामौ माल्य-

वक्षौमनस्यौ । वंशधरेष्वाकाररहितो मुखमध्यबहिःक्षेत्रपरिधि-रिषुगुणो द्वादशाधिकद्विशतविभक्तः क्षेत्रविष्कम्भस्तथा भरतादिषु । तत्र द्वे द्वे क्षेत्रे चतुर्गुणचतुर्गुणे । लक्षाष्टसप्ततिसहस्रद्विचत्वारिंशा-ष्टशतराशौ द्विसहस्रोने स्वगुणकारगुणे चतुरशीतिविभक्ते लब्धं धातकीखण्डगिरिव्यासः । बहिर्मन्दराश्चतुरशीतिसहस्रोच्चाश्चत्वारो ऽधश्चतुर्नवतिशतविस्तारा अर्धषट्पञ्चाशाष्टाविंशतिसहस्रोपरिवन-विभिष्टाः । तत्र च विजयादीनि कच्छादीनि वक्षाराश्चित्रादयो विद्युत्प्रभाद्यश्च नद्यो गङ्गाद्या मेरुह्रदकाञ्चनाद्यश्च धातकीखण्डे द्वीपे द्वयोरप्यर्धयोरीषद्वनतान्ताः स्युः ॥

(इति धातकीखण्डः)

अथ कालोदश्चक्रवालतो ऽष्टलक्षरुद्रः सहस्रोण्डः एकोनविंश-लक्षशूचीको विजयादिचतुर्द्वारः ॥

(इति कालोदधिः)

मानुषोत्तरेणार्धविभक्तः पुष्कराधों धातकीखण्डवत् तद्विगुण-क्षेत्रादिविभागः स्वतश्चतुर्गुणः चतुर्गुणक्षेत्रवर्षधरः । स्वपरिधिद्विगुण-विस्तारा गजदन्ताकृतयो वक्षारा द्विमेखलाश्च पूर्वसूत्रगाः वंश-धराश्चतुर्गुणाः परस्परतः सर्वसमाश्च ह्रदनदीकुण्डद्वीपकाञ्चनयमक-चित्रविचित्रवर्षभकूटवृत्तविजयार्धाः स्वायामतश्च दीर्घशैलमुखवना-यामाः क्षेत्रतो ऽनुमेयाः नदीनामवगाहश्च स्वविस्तारात् । वंशधरे-ष्वाकाररहितो मुखमध्यबहिःक्षेत्रपरिधिरिषुगुणो द्वादशाधिक-द्विशतविभक्तः क्षेत्रविष्कम्भस्तथाभरतादिषु । वर्षविहीनक्षेत्रराशौ द्विसहस्रोने स्वगुणकारगुणे चतुरशीतिविभक्ते लब्धं पुष्करार्ध-

गिरिव्यासः। बहिर्मन्दराश्चतुरशीतिसहस्रोच्चाश्चत्वारो ऽधश्चतुर्नवति-
शतविस्तारा अर्धार्धषट्पञ्चाशदष्टाविंशतिसहस्रोपरिवनविभिष्टाः।

(इति पुष्करार्धः)

मानुषोत्तरो वेलाधारिमानो हैमोऽर्धपल्यवदुभयतो वेदिका-
वनखण्डवान् अन्तरूपरिबहिर्मनुष्यसुवर्णदेवावासो मानुषगतिच्छेदी
अन्यत्र देवक्रियाविद्याधरादिभ्यः। न तत्परा बादराग्निमेघविद्युन्नदी-
कालपरिवेषादयः। मानुषोत्तरवत्कुण्डलरुचकौ।

कालोदपुष्करस्वयम्भूरमणा उदकरसा लवणोदो लवणरसो
वारुणोदश्चित्रपानकवत् खण्डादिचित्रचतुर्विभागगोक्षीरवत् क्षीरोदः
सुक्वथितसद्योविस्यंन्दितगोघृतवत् घृतोदः शेषाश्चतुर्जातकवदूर्ध्वभाग-
त्रिभागच्छिन्नेक्षुरसवज्जलाः समुद्राः॥

लवणकालोदस्वयम्भूरमणा बहुमत्स्यकच्छपा नेतरे।

वरुणक्षीरघृतेक्षुरसद्वीपोदधिबहिर्**नन्दीश्वरो** विविधविन्यासो
द्यानवान् देवलोकप्रतिस्पर्धी जिनेन्द्रपूजाव्यापृतदेवसंपाताभिरुचिरः
स्वेच्छाविविधक्रियादेवसंभोगरम्यः। तत्र पञ्चविंशतिकक्षेत्रविभाग-
मध्ये चतुर्दिक्षु चत्वारो **ऽञ्जनगिरयो** बहिर्मेरुच्छ्या दशसहस्राति-
रिक्तविस्तारा मूले उपरि साहस्राः। तेषु जिनायतनानि योज-
नशतायामानि तदर्धविस्तारणि द्विसप्ततियोजनोच्चानि षोड-
शाष्टाष्टोच्छ्रयविस्तारप्रवेशस्वनामामरावासदेवासुरनागसुवर्णरूप्यपृथक्-
पृथक्चतुर्द्वाराणि। तन्मध्ये मणिपीठिकाः षोडशायामविस्तारा
अष्टोत्सेधाः। तदुपरि देवच्छन्दकाः साधिकायामोच्चाः सर्वरत्न-
मयाः। तेषु प्रत्येकं जिनप्रतिमाष्टशतं जिनमानं ताः स्वपरिवार-

वृताः । दामघण्टालम्बूषघण्टिकाष्टमङ्गलतोरणध्वजवन्ति तपनीय-रुचिररजोवालुकाप्रस्तृतानि षोडशपूर्णकलशादिभूषितानि आयतन-मानमुखमण्डपप्रेक्षामण्डपाक्षपाटकमणिपीठिकास्तूपप्रतिमाचैत्यवृ-क्षेन्द्रध्वजपुष्करिणीक्रमरचनानि नानामणिमयानि । तेभ्यः प्रत्येकं चतुर्दिक्षु लक्षमानाः पुष्करिण्यो नन्दिषेणामोघागोस्तूपासुदर्शनान-न्दोत्तरानन्दासुनन्दानन्दिवर्धनाभद्राविशालाकुमुदापुण्डरीकिणी-विजयावैजयन्तीजयन्तापराजिताः प्राक्क्रमात् । तन्मध्ये स्फाटिका **दधिमुखा** ललामवेदिकोद्यानादिलाञ्छनाश्चतुःषष्टिसहस्रोच्चाः दशावगाधो विस्तृताः तावदुपरि । तेष्वञ्जनवदायतनानि । द्वीपविदिक्षु **रतिकरकाश्चत्वारो** दशसहस्रायामविष्कम्भाः सहस्रोच्चाः सर्वरत्नमयाः झल्लर्याकृतयः । तत्र दक्षिणयोरिन्द्रस्योत्तरयोरीशानस्याष्टाष्टानां महादेवीनां योजनशतसहस्रावाधास्थाना राजधान्यो दिक्षु सुजाता सौमनसा अर्चिर्मालिनी प्रभाकरा पद्मा शिवा शुचिः अञ्जना भूता भूतावतंसा गोस्तूपा सुदर्शना अमला अप्सरा रोहिणी नवमी नाम रत्ना रत्नोच्चया सर्वरत्ना रत्नसंचया वसुर्वसुमित्रा वसुभागा वसुंधरा नन्दोत्तरा नन्दा उत्तरकुरुर्देवकुरुः कृष्णा कृष्णराजी रामा राम-रक्षिता नाम प्राग्दक्षिणक्रमात् । तत्र देवाः सर्वसंपदन्वाः स्वपरिवा-रानुगताः निजपरिकरपरिवृताः पुण्यतिथिषु सुरासुरविद्याधरादि-पूजितानां जिनानामायतनेष्वाष्टाह्निकीपूजाः कुर्वन्ति प्रमुदित-मनसः ॥

(इति नन्दीश्वरद्वीपः)

इति तृतीयमाह्निकं समाप्तम् ॥

अथ चतुर्थमाह्निकम् ।

विष्कम्भवर्गदशगुणकरणी वृत्तचेचपरिधिः । विष्कम्भः पादाभ्यस्तः स गणितं । विष्कम्भो ऽवगाहोनस्तद्गुणचतुर्गुणस्तन्मूलं ज्या । दृषुवर्गः षड्गुणो ज्यावर्गे विशुद्धस्तन्मूलं धनुःपृष्ठम् । चतुर्गुणेषुवर्गयुक्तविभक्तो ज्यावर्गो विष्कम्भः । धनुर्वर्गज्यावर्गविशेषषड्भागमूलमिषुः । क्षुद्रधनुःपृष्ठापनीतबृहद्धनुःपृष्ठार्धं बाहा ॥

सर्वे गिरि-श्रेणि-शिखरतल-कूट-कुण्ड-वन-नदीमुखवन-नदीह्रद-शिला-वाप्यादयो वेदिकावनखण्डवृताः । वापीकुण्डह्रदा दशावगाहाः । पद्मगिरिद्वीपा जलाद्विक्रोशोच्छ्रयाः । मन्दराञ्जनदधिमुखकुण्डलरुचकनगाः सहस्रावगाहाः । शेषा उच्छ्रयपादाः । रूपादिद्विगुणराशिगुणो द्वीपव्यासो नवतिशतविभक्तो भरतादिषु विष्कम्भः । सर्वा नद्यः प्रवहद्दशगुणा मुखे । विस्तारपञ्चाशद्भागावगाहाः । ह्रदविस्तारो ऽशीतिविभक्तः प्रवहो दक्षिणानाम् । उत्तरासां चत्वारिंशता । मेरूत्तरासु विपर्ययः । प्रवहमुखविस्तारविशेषार्धपञ्चचत्वारिंशत्सहस्रविभक्तिलब्धं द्विगुणोभयवृद्धिः सरिताम् । लक्षाष्टसप्ततिसहस्रद्विचत्वारिंशाष्टशतराशौ द्विसहस्रोने स्वगुणकारगुणे चतुरशीतिविभक्तलब्धं धातकीखण्डगिरिव्यासः । स द्विगुणः पुष्करार्धे । व्यासार्धक्षुद्रविस्तारोनं गिरिणा नदीगतिः । त्र्यधिकत्रिशतोत्तरैकाञ्चविंशतिसहस्रगिरिमस्तकमाप्राग्गङ्गापरेण सिन्धुः रक्तारक्तोदे च । तद्विगुणाध्वगाः पुष्करार्धे । सर्वा नद्यः पूर्वपूर्वनदीद्विगुणसहिताः । मुखवनपर्वतनदीमेरुव्यासभद्रशालायामरहित -

द्वीपव्यासषोडशभागो विजयव्यासः । तथान्येषां पूर्ववत् स्यादिति ॥

(इति करणाधिकारः)

जम्बूद्वीपलवणधातकीखण्डकालोदपुष्करवरुणक्षीरघृतेक्षुरसनन्दीश्वरारुणारुणवरारुणाभासकुण्डलरुचकारुणवस्त्रगन्धोत्पलतिलकपृथिवीनिधानरत्नवर्षधराह्रदनदीविजयवक्षारकल्पेन्द्रपुरमन्दरावासकूटनक्षत्रचन्द्रसूर्यसूर्यवरसूर्याभासदेवनागयक्षभूतस्वयम्भूरमणपर्यन्ता द्वीपसमुद्राः ॥

इति जम्बूद्वीपसमासे चतुर्थमाङ्किकं समाप्तम् ॥

कृतिः सिताम्बराचार्यस्य महाकवेरुमास्वातिवाचकस्य इति ॥

जम्बूद्वीपसमास सटीक मू० उमास्वाति टी० विजयसिंह टी० आ०

॥ ए ऐं ॥

नमो वीतरागाय ।

श्रीसङ्घपार्श्वप्रभुपादपद्म-
मानम्य वाचामधिदेवतां च ।
द्वीपोदधिक्षेत्रसमासमस्मि
श्रीवाचकीयं विवृणोमि किंचित् ॥ १ ॥

क्व वाचकवचोवाच्यं क्व वाक्क्षुद्रः किलेदृशः ।
यत्सत्यं चुलुकेनास्मि मोहान्मित्तुर्महोदधिम् ॥ २ ॥

यदि वा किमेतया चिन्तयापि मे । यतः ।

मुदितकौशिकसन्मुनिनायकः
कुवलयप्रतिबोधविधायकः ।
मम निरस्ततमा जिनचन्द्रमा
वितनुते वदतां द्युतिमान्द्रमाम् ॥ ३ ॥

वाक्यं क्वचापि जैवाभिगममनुसरन् क्वापि तद्वृत्तिवाचम्
जम्बूद्वीपज्ञप्तां च क्वचिदथ करणीं क्वचिच्चानुकुर्वन् ।
तुल्यार्थं जैनभद्रं विवृतिपदयुतं शास्त्रमुदीच्यमाणः
प्रायो ऽन्यग्रन्थदृष्ट्या विवृतिमहमिमां प्रस्तुवे मुग्धबुद्धिः ॥ ४ ॥

किं च ।

यद्दुर्बोधमतीव तद्विजहति व्यक्तार्थमित्युक्तितो
व्यक्तार्थं तु विवृण्वते हि बहुधा रूपप्रसिद्ध्यादिभिः ।

नेयार्थैरतिफल्गुभिश्च वचनैः किं च भ्रमं कुर्वते
मिथ्याणामिति शास्त्रविप्लवकराः प्रायः कुटीकाङ्कतः ॥५॥

संत्यज्य विस्तरमपास्य तथालजाल-
मत्यर्थमर्थमवगम्य यथावबोधम् ।
आतश्च वाचकवचो विवृतिर्मयेय-
मास्तन्यते ऽबुधजनप्रतिबोधनार्थम् ॥ ६ ॥

दृह च ।

धृतार्यचर्याचरणोरुचातुरीं
निर्विघ्नविघ्नौघविघातसुन्दरीम् ।
नमस्क्रियामाहितमंगलक्रियां
श्रीमानुमास्वातिरुवाच वाचकः ॥ ७ ॥

यथा ।

मू० आ० ।

सर्वजननयनकान्तं नखलेखाविसृतदीधितिवितानम् ।
पादयुगचन्द्रमण्डलमभिरक्षतु नः सदा जैनम् ॥ १ ॥

मू० च ।

इति जम्बूद्वीपसमासे चतुर्थमाह्निकं समाप्तम् ॥

कृतिः सिताम्बराचार्यस्य महाकवेरुमास्वातिवाचकस्येति ।

टी० च ।

कृतिः क्रिया प्रस्तावाज्जम्बूद्वीपसमासप्रकरणरूपा श्वेताम्बराचार्यस्य श्वेताम्बरगुरोर्महाकवेरनेकतत्त्वार्थप्रग्रथरत्यादिप्रवचनसङ्ग्रहकारस्य यदूचिरे विपश्चिच्चिचयनिश्चितांचितचरणाः श्रीचौलुक्यचूडाचन्द्रार्चितचरणाः श्रीहेमचन्द्रसूरयः श्रीसिद्धहेमचन्द्रनाम्नि स्वोपज्ञशब्दानुशासने "उपोमास्वाति संग्रहौतारः' (II. 2. 39) इति तथा महावैयाकरणस्य उमास्वातिवाचकस्येति सान्वयसुग्रहीतनामधेयस्य तथा चास्य संग्रहकारस्योमा माता स्वातिः पिता तत्सम्बन्धादुमास्वातिः वाचकः पूर्वधरः यत्प्रज्ञापनाटीका वाचकाः पूर्ववित्दः । इत्याचार्यश्रीविजयसिंहविहिता विनेयजनहिता जम्बूद्वीपसमासटीका समाप्ता ॥

जम्बूद्वीपसमासटीका समाप्ता ॥

क्वचिज्जम्बूद्वीपप्रज्ञप्तिमथ कुत्रापि करणीं
क्वचिज्जीवाभिजं (!) क्वचिदपि च ग्रास्त्रार्थमपरम् ।
क्वचिदाचां वृत्तिं क्वचिदपि वचो वाच्यविदुषां
समास्थाय व्याख्यामहमिह महार्थं ऽप्यकरवम् ॥ १ ॥
अविस्पष्टा सूत्रप्रतिकृतिरियं मन्मतिरपि
स्वयं-ग्राम्यो वासो ऽप्यहह कथमास्थेयमपि मे ।
क्रियासिद्धौ हेतुः प्रणयिजनताकल्पलतिका
प्रग्रस्तिः श्रीपार्श्वप्रभुचरणयोः किन्तु वितता ॥ २ ॥
श्रीविक्रमतः क्रमतः समासु तीतासु तिथिरविसमासु (1215)।
विहिता साहारग्रहे ग्ररदोयं चारु पल्लिपुरि ॥ ३ ॥

यच्चेहानाभोगान्मतिमान्द्याद्धीतरथा लिखितमास्ते ।
तत्परिमृजन्तु सुजनाः परोपकारैकबद्धतमनसः ॥ ४ ॥
तुङ्गः क्षमाभृदुदिताद्भुतभूरिसत्त्वः
श्रेणीं स्थितिं शुचिमचिन्त्यरुचिं विधानः ।
उद्दामधाममहिमा भुवि वन्द्यपादः
श्रीचन्द्रगच्छ उदयाद्रिरिवास्ति श्रस्तः ॥ १ ॥
आच्छन्नमौनकेतुस्तमसामवसायहेतुरभ्युदितः ।
रविरिव निस्तारकरुचिरेतस्मिन्नभयदेवविभुः ॥ २ ॥
जगतीह दक्षिणाग्राजुषापि विहितोत्तरोदयेन श्रृगम् ।
वादमहार्णवमुत्तीर्य विश्वमाविष्कृतं येन ॥ ३ ॥
सज्ज्ञातीतगुणौघभास्वदुदयोल्लासी कवीनां मुदे
तन्वानः सदलं स्वरूपममलं दोषागमस्य द्विषन् ।
तच्छिष्यस्तु धनेश्वरप्रभुरभूद्भव्यालिभिः सेवितो
लोके ऽस्मिन्नयरागसंगसुभगः पद्मायमानो ऽपि यः ॥ ४॥
जातावज्ञेः पुरस्तादनु विहितहसेरन्वगात्तैरुडंकैः
पश्चाद्दत्तावधानैः पुनरुभयविधानाद्मुखत्वं दधानैः ।
आग्रङ्काः श्रङ्कुवद्भिस्तदनु च परतो विस्मयस्मेरितारव्वेः
यद्वाचो वादिवृन्दैरथ नृपतिसमैः काङ्क्षिताः श्रिचिताश्च ॥ ५ ॥ (!)

यस्याहरत्यांसमभ्रङ्गुजिक्रिया
मोचन्तु गुल्फद्वयसं शरीरे ।
गीर्वाणवृन्दोतितवर्णवादः
ततः स जातो ऽजितसिंहसूरिः ॥ ६ ॥ (!)

श्रीवर्धमानमुनिपतिरथ चन्द्रप्रभविभुस्तदनु जज्ञे
भूयः श्रीभद्रसूरिःसुरगुरुरिवानन्तसुरभिगुणः ॥ ७ ॥
एकाहत्वपणेन पथ्यपि भुजि दीपोत्सवोत्सर्पणा
याचा श्रीवटपद्रके रथगिरस्यूडामणेर्विश्रुता । (!)
तीर्थस्योद्धृतिरुज्जयन्तवसतेः श्रीमज्जिनोपज्ञये-
त्येवं यस्य यशांसि दिक्षु विलसन्त्यद्यापि हि स्वेच्छया ॥ ८ ॥
अभवन्मदनाधृष्याः शिष्याः श्रीवर्धमानसूरीणाम् ।
तन्मान्या वितमिश्राः पण्डितजिनचन्द्रगणिमिश्राः ॥ ९ ॥
सुचरितकुसुमानि स्वैरमुचित्य नित्यं
प्रकटितबहुवर्णां सर्वदामोदपूर्णाम् ।
गुरुतरगुणनद्धां ग्रन्थदक्षो विशुद्धां
विरचयति यदीयां नूतनां नूतिमालाम् ॥ १० ॥
श्रीसर्वदेवसूरिः प्रद्युम्नविभुप्रभुर्यशोदेवः
इति यतिपतयो येषां विनेयतामावहन्तितराम् ॥ ११ ॥
श्रीभद्रेश्वरसूरिग्रिष्यहरिभद्राचार्यतः सद्गुरोः
प्राप्तश्रीजिनचन्द्रपूज्यचरणान्तेवासितामाश्रितः ।
सूरिः श्रीविजयक्षिमां व्यरचयत्कल्याणमालाजुषां
शैचस्याभयचन्द्रको लिखितवानुद्दामदाक्ष्यः पुरा ॥ १२ ॥

इति जम्बूद्वीपसमासटीका समाप्ता ॥

Appendix D.

Certain passages occurring in other works, attributed to our author Umâsvati but not found in the extant works, thus strengthening the tradition that our author has written 500 works.

i उक्तं च वाचकमुख्यैरुमास्वातिपादैः । स्थानाङ्गवृत्तिः

कृपणे ऽनाथदरिद्रे व्यसनप्राप्ते च रोगशोकहते ।
यद्दीयते कृपार्थादनुकम्पा तद्भवेद्दानम् ॥१॥
अभ्युदये व्यसने वा यत्किंचिद्दीयते सहायार्थम् ।
तत्खङ्गहतो ऽभिमतं मुनिभिर्दानं न मोक्षाय ॥२॥
राजारक्षपुरोहितमधुमुखमावल्लदण्डपाशिषु च ।
यद्दीयते भयार्थं तद्भयदानं बुधैर्ज्ञेयम् ॥३॥
अभ्यर्थितः परेण तु यद्दानं जनसमूहमध्यगतः ।
परचित्तरक्षणार्थं लज्जायास्तद्भवेद्दानम् ॥४॥
नटनर्तमुष्टिकेभ्यो दानं संबन्धिबन्धुमित्रेभ्यः ।
यद्दीयते यशोर्थं गर्वेण तु तद्भवेद्दानम् ॥५॥
हिंसानृतचौर्याद्यतपरदारपरिग्रहप्रसक्तेभ्यः ॥
यद्दीयते हि तेषां तज्ज्ञानीयाद्धर्माय ॥६॥
समतृणमणिमुक्तेभ्यो यद्दानं दीयते सुपात्रेभ्यः ।
अक्षयमतुलमनन्तं तद्दानं भवति धर्माय ॥७॥
गतप्रः कृतोपकारो दत्तं च सहस्रगो ममानेन ।
अहमपि ददामि किंचित् प्रत्युपकाराय तद्दानम् ॥८॥

ii पञ्चाशकटीका by अभयदेवसूरिः
"उमास्वातिवाचकेनाप्यस्य समर्थितत्वात् तथाहि तेनोक्तं 'सम्यग्दर्शनसम्पन्नः षड्विधावश्यकनिरतश्च श्रावको भवति' इति"

iii धर्मसङ्ग्रह by मानविजयोपाध्याय and read over by यशोविजयमहाराज. Similarly in मुनिचन्द्रसूरि's टीका on धर्मबिन्दु. "उमास्वातिविरचितश्रावकप्रज्ञप्तौ तु अतिथिशब्देन साध्वादयश्चत्वारो गृहीताः ततस्तेषां संविभागः कार्य इत्युक्तं तथा च तत्पाठः, अतिथिसंविभागो नाम अतिथयः साधवः साध्व्यः श्रावकाः श्राविकाश्चैतेषु गृहमुपागतेषु भक्त्याभ्युत्थानासन (प्रदान!) पादप्रमार्जननमस्कारादिभिरर्चयित्वा यथाविभवशक्ति अन्नपानवस्त्रौषधालयादिप्रदानेन संविभागः कार्यः इति" ॥

Appendix E.

प्रशमरतिप्रकरणम् ।

CONTENTS.

नम्बर ।	विषयः ।	पङ्क्ति ।
१	शास्त्रस्य पीठबन्धः	१—२३
२	कषायः	२४—३०
३	रागादि	३१—३३
४	कर्म	३४—३८
५—६	करणार्थाः	३९—८०
७	अष्टौ च मदस्थानानि	८१—१११
८	आचारः	११२—१४८
९	भावनाः	१४९—१६६
१०	धर्मः	१६७—१८१
११	तदनुकथा	१८२—१८८
१२–१५	जीवाद्या उपयोगा भावः षड्विधश्चत्यम्	१८९—२२७
१६	चरणम्	२२८—२४२
१७	शीलाङ्गानि	२४३—२४५
१८	ध्यानम्	२४६—२५४
१९	श्रेणी	२५५—२७१
२०	समुद्घातः	२७२—२७६
२१	योगनिरोधः क्रमशः	२७७—२८२
२२	शिवगमनविधानमन्तफलम् ...	२८३—३११

Appendix E.

॥ अथ प्रशमरतिः प्रारभ्यते ॥



नाभेयाद्याः सिद्धार्थराजसूनुचरमास्वरमदेहाः ।
पञ्च नव दश च[1] दशविधधर्मविधिविदो जयन्ति जिनाः ॥१॥
जिनसिद्धाचार्योपाध्यायान् प्रणिपत्य सर्वसाधूंश्च ।
प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात्किंचित् ॥२॥
यद्यप्यनन्तगमपर्यायार्थहेतुनयशब्दरत्नाढ्यम् ।
सर्वज्ञशासनपुरं प्रवेष्टुमबुधश्रुतैर्दुःखम् ॥३॥
श्रुतबुद्धिविभवपरिहीणकस्तथाप्यहमशक्तिमविचिन्त्य ।
द्रुमकदुवावयवोऽल्पकमन्वेष्टुं तत्प्रवेशेषुः ॥४॥
बहुभिर्जिनवचनार्णवपारगतैः कविवृषैर्महामतिभिः ।
पूर्वमनेकाः प्रथिताः प्रशमजननशास्त्रपद्धतयः ॥५॥
ताभ्यो विसृताः श्रुतवाक्पुष्पाकिकाः प्रवचनाश्रिताः काश्चित् ।
पारंपर्यादुच्छेषिकाः कृपणकेन संहृत्य ॥६॥
तद्भक्तिबलार्पितया मयाप्यविमलाल्पया स्वमतिशक्त्या ।
प्रशमेष्टतयानुसृता विरागमार्गैकपद्धिकेयम् ॥७॥
यद्यप्यवगीतार्था न वा कठोरप्रकृष्टभावार्था ।
सद्भिस्तथापि मय्यनुकम्पैकरसैरनुग्राह्यम् ॥८॥

---

१ P. omits.

को ऽत्र निमित्तं वक्ष्यति निसर्गमतिसुनिपुणो ऽपि वाद्यन्यत्* ।
दोषमलिने ऽपि सन्तो यद्गुणसारग्रहणदक्षाः ॥९॥
सद्भिः सुपरिगृहीतं यत्किंचिदपि प्रकाशतां याति ।
मलिनो ऽपि यथा हरिणः प्रकाशते पूर्णचन्द्रस्थः ॥१०॥
बालस्य यथा वचनं काहलमपि शोभते पितृसकाशे ।
तद्वत्सज्जनमध्ये प्रलपितमपि सिद्धिमुपयाति ॥११॥
ये तीर्थकृत्प्रणीता भावास्तदनन्तरैश्च परिकथिताः ।
तेषां बहुशो ऽप्यनुकीर्तनं भवति पुष्टिकरमेव ॥१२॥
यद्द्विषघातार्थं मन्त्रपदे न पुनरुक्तदोषो ऽस्ति ।
तद्द्वागविषघ्नं पुनरुक्तमदुष्टमर्थपदम् ॥१३॥[1]
यद्वदुपयुक्तपूर्वमपि भैषजं सेव्यते ऽर्त्तिनाशाय ।
तद्वद्रागार्त्तिहरं बहुशो ऽप्यनुयोज्यमर्थपदम् ॥१४॥
वृत्त्यर्थं कर्म यथा तदेव लोकः पुनः पुनः कुरुते ।
एवं विरागवार्ताहेतुरपि पुनः पुनश्चिन्त्यः ॥१५॥
दृढतामुपैति वैराग्यभावना येन येन भावेन ।
तस्मिँस्तस्मिन् कार्यः कायमनोवाग्भिरभ्यासः ॥१६॥
माध्यस्थ्यं वैराग्यं विरागता शान्तिरुपशमः प्रशमः ।
दोषचयः कषायविजयश्च वैराग्यपर्यायाः ॥१७॥
इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः ।
अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥१८॥

* Var. H. वा च्चन्यत्.

१ A. Interchanges.

ईर्ष्या रोषो दोषो द्वेषः परिवादमत्सरासूयाः ।
वैरप्रचण्डनाद्या नैके द्वेषस्य पर्यायाः ॥१९॥
रागद्वेषपरिगतो मिथ्यात्वोपहतकलुषया दृष्ट्या ।
पञ्चास्रवमलबद्धश्चतुरार्त्तरौद्रतीव्राभिसंधानः ॥२०॥
कार्याकार्यविनिश्चयसंक्लेशविशुद्धिलक्षणैर्मूढः ।
आहारभयपरिग्रहमैथुनसंज्ञाकलिग्रस्तः ॥२१॥
क्लिष्टाष्टकर्मबन्धनबद्धनिकाचितगुरुर्गतिग्रतेषु ।
जन्ममरणैरजस्रं बहुविधपरिवर्तनाभ्रान्तः ॥२२॥
दुःखसहस्रनिरन्तरगुरुभाराक्रान्तकर्षितः करुणः ।
विषयसुखानुगतदृषः कषायवक्रव्यतामेति ॥२३॥
स क्रोधमानमायालोभैरतिदुर्जयैः परामृष्टः ।
प्राप्नोति यानानर्थान् कस्तानुद्देष्टुमपि शक्तः ॥२४॥
क्रोधात्प्रीतिविनाशं मानाद्विनयोपघातमाप्नोति ।
शाठ्यात्प्रत्ययहानिं सर्वगुणविनाशनं लोभात् ॥२५॥
क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः ।
वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता ॥२६॥
श्रुतशीलविनयसंदूषणस्य धर्मार्थकामविघ्नस्य ।
मानस्य को ऽवकाशं मुहूर्तमपि पण्डितो दद्यात् ॥२७॥
मायाशीलः पुरुषो यद्यपि न करोति किंचिदपराधम् ।
सर्पं इवाविश्वास्यो भवति तथाप्यात्मदोषहतः ॥२८॥
सर्वविनाशाश्रयिणः सर्वव्यसनैकराजमार्गस्य ।
लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात् ॥२९॥

एवं क्रोधो मानो माया लोभश्च दुःखहेतुत्वात् ।
सत्त्वानां भवसंसारदुर्गमार्गप्रणेतारः ॥ २० ॥

ममकाराहंकारावेषां मूलं पदद्वयं भवति ।
रागद्वेषावित्यपि तच्चैवान्यस्तु पर्यायः ॥ २१ ॥
मायालोभकषायश्चेत्येतद्रागसंज्ञितं द्वंद्वम् ।
क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥ २२ ॥
मिथ्यादृष्ट्यविरमणप्रमादयोगास्त्रयोर्बलं दृष्टम् ।
तदुपश्लेषौ तावष्टविधकर्मबन्धस्य हेतू तौ ॥ २३ ॥

स ज्ञानदर्शनावरणवेद्यमोहायुषां तथा नाम्नः ।
गोत्रान्तराययोश्चेति कर्मबन्धो ऽष्टधा मौलः ॥ २४ ॥
पञ्चनवद्व्यष्टाविंशतिकचतुःषट्कषण्णवतिभेदः ।
द्विकपञ्चभेद इति सप्तनवतिभेदास्तथोत्तरतः ॥ २५ ॥
प्रकृतिरियमनेकविधा स्थित्यनुभावप्रदेशतस्तस्याः ।
तीव्रो मन्दो मध्य इति भवति बन्धोदयविशेषः ॥ २६ ॥
तत्र प्रदेशबन्धो योगात्तद्ग्रहणं कषायवशात् ।
स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण ॥ २७ ॥
ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः ।
श्वेत इव वर्णबन्धस्य कर्मबन्धस्थितिविधाढ्याः ॥ २८ ॥

कर्मोदयाद्भवगतिर्भवगतिमूला शरीरनिर्वृत्तिः ।
देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे ॥ २९ ॥
दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः ।
यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥ ४० ॥

कलरिभितमधुरगांधर्वतूर्यनीविद्विभूषणरवादैः ।
ओचावबद्धहृदयो हरिण इव विनाशमुपयाति ॥४१॥
गतिविभ्रमेङ्गिताकारहास्यलीलाकटाक्षविक्षिप्तः ।
रूपावेशितचक्षुः शलभ इव विपद्यते विवशः ॥४२॥
स्नानाङ्गरागवर्त्तिकवर्णकधूपाधिवासपटवासैः ।
गन्धभ्रमितमनस्को मधुकर इव नाशमुपयाति ॥४३॥
मिष्टान्नपानमांसौदनादिमधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशबद्धो मीन इव विनाशमुपयाति ॥४४॥
श्रयनासनसंबाधन[1]सुरतस्नानानुलेपनाक्षक्तः ।
स्पर्शव्याकुलितमतिर्गजेन्द्र इव बध्यते मूढः ॥४५॥
एवमनेके दोषाः प्रणष्टशिष्टेष्टदृष्टि[2]चेष्टानाम् ।
दुर्नियमितेन्द्रियाणां भवन्ति बाधाकारा बहवः ॥४६॥
एकैकविषयसङ्गाद्रागद्वेषातुरा विनष्टास्ते ।
किं पुनरनियमितात्मा जीवः पञ्चेन्द्रियवशार्त्तः ॥४७॥
न हि सो ऽस्तीन्द्रियविषयो येनाभ्यस्तेन नित्यसेवितेन ।
तृप्तिं प्राप्नुयुरचाप्यनेकमार्गप्रलीनानि ॥४८॥
कश्चिच्छुभो ऽपि विषयः परिणामवशात्पुनर्भवत्यशुभः ।
कश्चिदशुभो ऽपि भूत्वा कालेन पुनः शुभीभवति ॥४९॥
कारणवशेन यद्यत् प्रयोजनं जायते यथा यच्च ।
तेन तथा तं विषयं शुभमशुभं वा प्रकल्पयति ॥५०॥

---

१ संवाहनं=अंगमर्दनम् संबाधनं=विश्रामणा.

२ Var. H. दृष्ट.

अन्येषां यो विषयः स्वाभिप्रायेण भवति पुष्टिकरः* ।
स्वमतिविकल्पाभिरतास्तमेव भूयो द्विषन्त्यन्ये ॥५१॥
तानेवार्थान्द्विषतस्तानेवार्थान्प्रलीयमानस्य ।
निश्चयतो ऽस्यानिष्टं न विद्यते किंचिदिष्टं वा ॥५२॥
रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य ।
नान्यः स्वल्पो ऽपि गुणो ऽस्ति यः परत्रेह च श्रेयान् ॥५३॥
यस्मिन्निन्द्रियविषये शुभमशुभं वा निवेशयति भावम् ।
रक्तो वा द्विष्टो वा स बन्धहेतुर्भवति तस्य ॥५४॥
स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् ।
रागद्वेषाक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥५५॥
एवं रागद्वेषौ[१] मोहो मिथ्यात्वमविरतिश्चैव ।
एभिः प्रमादयोगानुगैः समादीयते कर्म ॥५६॥
कर्ममयः संसारः संसारनिमित्तकं पुनर्दुःखम् ।
तस्माद्रागद्वेषादयस्तु भवसंततेर्मूलम् ॥५७॥
एतद्दोषमहासंचयजालं शक्यमप्रमत्तेन ।
प्रशमस्थितेन घनमप्युद्देष्टयितुं निरवशेषम् ॥५८॥
अस्य तु मूलनिबन्धं ज्ञात्वा तच्छेदनोद्यमपरस्य ।
दर्शनचारित्रतपःस्वाध्यायध्यानयुक्तस्य ॥५९॥
प्राणवधानृतभाषणपरधनमैथुनममत्वविरतस्य ।
नवकोट्युद्गमशुद्धोञ्छमाचयाचाधिकारस्य ॥६०॥

* Var. H. तुष्टिकरः.

१ H. रागो द्वेषो.

जिनभाषितार्थसद्भावभाविनो विदितलोकतत्त्वस्य ।
अष्टादशशीलसहस्रधारणकृतप्रतिज्ञस्य ॥ ६ १ ॥
परिणाममपूर्वमुपागतस्य शुभभावनाध्यवसितस्य ।
अन्योन्यमुत्तरोत्तरविशेषमभिपश्यतः समये ॥ ६ २ ॥
वैराग्यमार्गसंप्रस्थितस्य संसारवासचकितस्य ।
स्वहितार्थाभिरतमतेः शुभेयमुत्पद्यते चिन्ता ॥ ६ ३ ॥
भवकोटीभिरसुलभं मानुष्यं प्राप्य कः प्रमादो मे ।
न च गतमायुर्भूयः प्रत्येत्यपि देवराजस्य ॥ ६ ४ ॥
आरोग्यायुर्बलसमुदयाश्चला वीर्यमनियतं धर्मे ।
तल्लब्धा हितकार्ये मयोद्यमः सर्वथा कार्यः ॥ ६ ५ ॥
शास्त्रागमादृते न हितमस्ति न च शास्त्रमस्ति विनयमृते ।
तस्माच्छास्त्रागमलिप्सुना विनीतेन भवितव्यम् ॥ ६ ६ ॥
कुलरूपवचनयौवनधनमित्रैश्वर्यसंपदपि पुंसाम् ।
विनयप्रशमविहीना न शोभते निर्जलेव नदी ॥ ६ ७ ॥
न तथा सुमहार्घैरपि वस्त्राभरणैरलंकृतो भाति ।
श्रुतशीलमूलनिकषो विनीतविनयो यथा भाति ॥ ६ ८ ॥
गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वे ऽपि ।
तस्माद्गुर्वाराधनपरेण हितकांक्षिणा भाव्यम् ॥ ६ ९ ॥
धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी ।
गुरुवदनमलयनिसृतो वचनसरसचन्दनस्पर्शः ॥ ७ ० ॥
दुःप्रतिकारौ मातापितरौ स्वामी गुरुश्च लोके ऽस्मिन् ।
तत्र गुरुरिहामुत्र च सुदुष्करतरप्रतीकारः ॥ ७ १ ॥

विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरतिर्विरतिफलं चास्रवनिरोधः ॥७२॥
संवरफलं तपोबलमथ तपसो निर्जरा फलं दृष्टम् ।
तस्मात्क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥७३॥
योगनिरोधाद्भवसंततिक्षयः संततिक्षयान्मोक्षः ।
तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥७४॥
विनयव्यपेतमनसो गुरुविद्वत्साधुपरिभवनशीलाः ।
त्रुटिमात्रविषयसङ्गाद्जरामरवन्निरुद्विग्नाः ॥७५॥
केचित्सातर्द्धिरसातिगौरवात्सांप्रतेक्षिणः पुरुषाः ।
मोहात्समुद्रवायसवदामिषपरा विनश्यन्ति ॥७६॥
ते जात्यहेतुदृष्टान्तसिद्धमविरुद्धमजरमभयकरम् ।
सर्वज्ञवाग्रसायनमुपनीतं नाभिनन्दन्ति ॥७७॥
यद्यत्किञ्चित् क्षीरं मधुशर्करया सुसंस्कृतं हृद्यम् ।
पित्तार्दितेन्द्रियत्वाद्वितथमतिर्मन्यते कटुकम् ॥७८॥
तद्वन्निश्चयमधुरमनुकम्पया सद्भिरभिहितं पथ्यम् ।
तथ्यमवमन्यमाना रागद्वेषोदयोद्धताः ॥७९॥
जातिकुलरूपबललाभबुद्धिवाल्लभ्यकश्रुतमदान्धाः ।
क्लीबाः परत्र चेह च हितमप्यर्थं न पश्यन्ति ॥८०॥

ज्ञात्वा भवपरिवर्तं जातीनां कोटीशतसहस्रेषु ।
हीनोत्तममध्यत्वं को जातिमदं बुधः कुर्यात् ॥८१॥
नैकाज्जातिविशेषानिन्द्रियनिर्वृत्तिपूर्वकान्सत्त्वाः ।
कर्मवशाद्गच्छन्त्यत्र कस्य का शाश्वती जातिः ॥८२॥

रूपबलश्रुतमतिशीलविभवपरिवर्जितांस्तथा दृष्ट्वा ।
विपुलकुलोत्पन्नानपि मनु कुलमानः परित्याज्यः ॥८१॥
यस्याशुद्धं शीलं प्रयोजनं तस्य किं कुलमदेन ।
स्वगुणाभ्यलंकृतस्य हि किं शीलवतः कुलमदेन ॥८४॥
कः शुक्रशोणितसमुद्भवस्य सततं क्षयापचयिकस्य ।
रोगजरापाश्रयिणो मदावकाशो ऽस्ति रूपस्य ॥८५॥
नित्यं परिशीलनीये[1] लक्ष्मांसाच्छादिते कलुषपूर्णे ।
निश्चयविनाशधर्मिणि रूपे मदकारणं किं स्यात् ॥८६॥
बलसमुदितो ऽपि यस्माच्चरः क्षणेन विबलत्वमुपयाति ।
बलहीनो ऽपि च बलवान् संस्कारवशात्पुनर्भवति ॥८७॥
तस्माद्नियतभावं बलस्य सम्यग्विभाव्य बुद्धिबलात् ।
मृत्युबले चाबलतां मदं न कुर्याद्बलेनापि ॥८८॥
उदयोपशमनिमित्तौ लाभालाभावनित्यकौ मत्वा ।
नालाभे वैक्लव्यं न च लाभे विस्मयः कार्यः ॥८९॥
परशक्त्यभिप्रसादात्मकेन किंचिदुपयोग[2]योग्येन ।
विपुलेनापि यतिवृषा लाभेन मदं न गच्छन्ति ॥९०॥
ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥९१॥
पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा सांप्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ॥९२॥
द्रुमकैरिव चटुकर्मकमुपकारनिमित्तकं परजनस्य ।

---

१ H. नित्यपरिशीलनीये. २ A. उपभोग.

ज्ञात्वा यद्वाल्लभ्यकमवाप्यते को मदस्तेन ॥९ ३॥
गर्वं परप्रसादात्मकेन वाल्लभ्यकेन यः कुर्यात् ।
तं वाल्लभ्यकविगमे शोकसमुदयः पराभवति ॥९ ४॥
माषतुषोपाख्यानं श्रुतपर्यायप्ररूपणां चैव ।
श्रुत्वातिविस्मयकरं च विकरणं स्थूलभद्रमुनेः ॥९ ५॥
संपर्कोद्यमसुलभं चरणकरणसाधकं श्रुतज्ञानम् ।
लब्ध्वा सर्वमदहरं तेनैव मदः कथं कार्यः ॥९ ६॥
एतेषु मदस्थानेषु निश्चये न च गुणोऽस्ति कश्चिदपि ।
केवलमुन्मादः खद्दृदयस्य संसारवृद्धिश्च ॥९ ७॥
जात्यादिमदोन्मत्तः पिशाचवद्भवति दुःखितश्चेह ।
जात्यादिहीनतां परभवे च निःसंशयं लभते ॥९ ८॥
सर्वमदस्थानानां मूलोद्घातार्थिना सदा यतिना ।
आत्मगुणैरुत्कर्षः परपरिवादश्च संत्याज्यः ॥९ ९॥
परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्रं प्रतिभव[1]मनेकभवकोटिदुर्मोचम् ॥१ ० ०॥
कर्मोदयनिर्वृत्तं हीनोत्तममध्यमं मनुष्याणाम् ।
तद्विधमेव तिरश्चां योनिविशेषान्तरविभक्तम् ॥१ ० १॥
देशकुलदेहविज्ञानायुर्बलभोगभूतिवैषम्यम् ।
दृष्ट्वा कथमिह विदुषां भवसंसारे रतिर्भवति ॥१ ० २॥
अपरिगणितगुणदोषः स्वपरोभयबाधको भवति यस्मात् ।
पञ्चेन्द्रियबलविबलो रागद्वेषोदयनिबद्धः ॥१ ० ३॥

---

१ A. प्रतिभयं.

तस्माद्रागद्वेषत्यागे पञ्चेन्द्रियप्रशमने च ।
शुभपरिणामावस्थितिहेतोर्यत्नेन घटितव्यम् ॥१०४॥
तत्कथमनिष्टविषयाभिकांक्षिणा भोगिना[1] वियोगो वै ।
सुव्याकुलहृदयेनापि निश्चयेनागमः कार्यः ॥१०५॥
आदावत्यभुदया मध्ये प्रङ्गारहास्यदीप्तरसाः ।
निकषे विषया बीभत्सकरुणखञ्जाभयप्राया: ॥१०६॥
यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः ।
किंपाकफलादनवद्भवन्ति पश्चादतिदुरन्ताः ॥१०७॥
यदृच्छाकाष्टादग्नमन्नं बुभुक्षाभक्ष्यपेयवत्स्वादु ।
विषसंयुक्तं भुक्तं विपाककाले विनाशयति ॥१०८॥
तद्वदुपचारसंभृतरम्यकरागरससेविता विषयाः ।
भवशतपरम्पराखपि दुःखविपाकानुबन्धकराः ॥१०९॥
अपि पश्यतां समक्षं नियतमनियतं पदे पदे मरणम् ।
येषां विषयेषु रतिर्भवति न तान्मानुषान्गणयेत् ॥११०॥
विषयपरिणामनियमो मनोनुकूलविषयेष्वनुप्रेक्ष्यः ।
द्विगुणोऽपि च नित्यमनुग्रहो ऽनवद्यश्च संचिन्त्यः ॥१११॥
इति गुणदोषविपर्यासदर्शनाद्विषयमूर्छितो ह्यात्मा ।
भवपरिवर्तनभीरुभिराचारमवेक्ष्य परिरक्ष्यः ॥११२॥
सम्यक्त्वज्ञानचारित्रतपोवीर्यात्मको जिनैः प्रोक्तः ।
पञ्चविधो ऽयं विधिवत्पाध्याचारः समनुगम्यः[2] ॥११३॥
षड्जीवकायायतना लौकिकसन्तानगौरवत्यागः ।

---

१ Var. H. कांक्षिणां भोगिनां. — २ H. समधिगम्यः.

शीतोष्णादिपरीषहविजयः सम्यक्क्रमविकम्प्यम् ॥११४॥
संसारादुद्वेगः क्षपणोपायश्च कर्मणां निपुणः।
वैयावृत्त्योद्योगस्तपोविधिर्दोषितां त्यागः ॥११५॥
विधिना भैक्ष्यग्रहणं स्त्रीपशुपण्डकविवर्जिता शय्या।
ईर्याभाषाम्बरभाजनैषणावग्रहाः शुद्धाः ॥११६॥
स्थाननिषद्याव्युत्सर्गशब्दरूपक्रियाः परान्योन्याः[1]।
पञ्चमहाव्रतदार्ढ्यं विमुक्तता सर्वसङ्गेभ्यः ॥११७॥
साध्वाचारः खल्वयमष्टादशपदसहस्रपरिपठितः।
सम्यगनुपाल्यमानो रागादीन्मूलतो हन्ति ॥११८॥
आचाराध्ययनोक्तार्थभावनाचरणगुप्तहृदयस्य।
न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् ॥११९॥
पैशाचिकमाख्यानं श्रुत्वा गोपायनं च कुलवध्वाः।
संयमयोगैरात्मा निरन्तरं व्याप्तः कार्यः ॥१२०॥
क्षणविपरिणामधर्मा मर्त्यानामृद्धिसमुदयाः सर्वे।
सर्वे च शोकजनकाः संयोगा विप्रयोगान्ताः ॥१२१॥
भोगसुखैः किमनित्यैर्भयबहुलैः कांक्षितैः परायत्तैः।
नित्यमभयमात्मस्थं प्रशमसुखं तत्र यतितव्यम् ॥१२२॥
यावत्स्वविषयलिप्सोरक्षसमूहस्य चेष्यते तुष्टौ।
तावत्तस्यैव जये वरतरमग्रं कुतो यत्नः ॥१२३॥
यत्सर्वविषयकांक्षोद्भवं सुखं प्राप्यते सरागेण।
तदनन्तकोटिगुणितं मुधैव लभते विगतरागः ॥१२४॥

---

१ परक्रिया अन्योन्यक्रिया.

दृष्टवियोगाप्रियसंप्रयोगकांक्षासमुद्भवं दुःखम् ।
प्राप्नोति यत्सरागो न संस्पृशति तद्विगतरागः ॥१२५॥
प्रशमितवेदकषायस्य हास्यरत्यरतिशोकनिभृतस्य ।
भयकुत्सानिरभिभवस्य यत्सुखं तत्कुतो ऽन्येषाम् ॥१२६॥
सम्यग्दृष्टिर्ज्ञानी ध्यानतपोबलयुतो ऽप्यनुपशान्तः ।
तं लभते न[1] गुणं यं प्रशमगुणमुपाश्रितो[2] लभते ॥१२७॥
नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य ।
यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥१२८॥
संत्यज्य लोकचिन्तामात्मपरिज्ञानचिन्तने ऽभिरतः ।
जितलोभरोषमदनः सुखमास्ते निर्जरः साधुः ॥१२९॥
या चेह लोकवार्ता शरीरवार्ता तपस्विनां या च ।
सद्धर्मचरणवार्तानिमित्तकं तद्वयमपीष्टम् ॥१३०॥
लोकः खल्वाधारः सर्वेषां ब्रह्मचारिणां[3] यस्मात् ।
तस्माल्लोकविरुद्धं धर्मविरुद्धं च संत्याज्यम् ॥१३१॥
देहो नासाधनको लोकाधीनानि साधनान्यस्य ।
सद्धर्मानुपरोधात्तस्माल्लोको ऽभिगमनीयः ॥१३२॥
दोषेणानुपकारी भवति परो येन येन विद्विष्टः[4] ।
स्वयमपि तद्दोषपदं सदा प्रयत्नेन परिहार्यम् ॥१३३॥
पिण्डैषणानिरुक्तः कल्पाकल्पस्य[5] यो विधिः सूत्रे ।
ग्रहणोपभोगनियतस्य तेन नैवामयभयं स्यात् ॥१३४॥

---

१ H. न लभते. २ A. उपाश्रितो. ३ H. धर्मचारिणां.
४ A. विद्वेष्टि = क्रध्यति ५ A. कल्प्य. for कल्प here & hereafter.

व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमाचयाचार्थम् ।
पक्षग इवाभ्यवहरेदाहारं पुत्रपक्षवच्च ॥ १ २ ५॥
गुणवदमूर्छितमनसा तद्विपरीतमपि चाप्रदुष्टेन ।
दारूपमधृतिना भवति कल्पमाखाद्यमाखाद्यम् ॥ १ २ ६॥
काक्षं क्षेत्रं माचां खात्म्यं[1] द्रव्यगुरुलाघवं खबलम् ।
ज्ञात्वा यो ऽभ्यवहार्यं भुंक्ते किं भेषजैस्तस्य ॥ १ २ ७॥
पिण्डः शय्या वस्त्रैषणादि पात्रैषणादि यच्चान्यत् ।
कल्पाकल्पं सद्धर्मदेहरक्षानिमित्तोक्तम् ॥ १ २ ८॥
कल्पाकल्पविधिज्ञः संविग्नसहायको विनीतात्मा ।
दोषमलिने ऽपि लोके प्रविहरति मुनिर्निरुपलेपः ॥ १ २ ९॥
यद्वत्पङ्काधारमपि पङ्कजं नोपलिप्यते तेन ।
धर्मोपकरणधृतवपुरपि साधुरलेपकस्तद्वत् ॥ १ ४ ०॥
यद्वत्तुरगः सत्खप्याभरणविभूषणेष्वनभिषक्तः ।
तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः ॥ १ ४ १॥
ग्रन्थः कर्माष्टविधं मिथ्यात्वाविरतिदुष्टयोगाश्च ।
तज्जयहेतोरग्रठं संयतते यः स निर्ग्रन्थः ॥ १ ४ २॥
यज्ज्ञानग्लौलतपसामुपग्रहं निग्रहं च दोषाणाम् ।
कल्पयति निश्चये यत्तत्कल्पमकल्पमवशेषम् ॥ १ ४ ३॥
यत्पुनरुपघातकरं सम्यक्क्रज्ञानग्लौलयोगानाम् ।
तत्कल्पमप्यकल्पं प्रवचनकुत्साकरं यच्च ॥ १ ४ ४॥
किंचिच्छुद्धं कल्प्यमकल्प्यं स्यात्स्याद्कल्प्यमपि कल्प्यम् ।

---

१ A. सात्म्यं.

पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥१४५॥
देशं कालं पुरुषमवस्थामुपयोगशुद्धिपरिणामान् ।
प्रसमीक्ष्य भवति कल्पं नैकान्तात्कल्पते कल्पम् ॥१४६॥
तच्चिन्त्यं तद्ग्राह्यं तत्कार्यं भवति सर्वथा यतिना ।
नात्मपरोभयबाधकमिह यत्परतश्च सर्वाङ्गम् ॥१४७॥
सर्वार्थेष्विन्द्रियसंगतेषु वैराग्यमार्गविघ्नेषु ।
परिसङ्ख्यानं कार्यं कार्यं परमिच्छता नियतम् ॥१४८॥
भावयितव्यमनित्यत्वमशरणत्वं तथैकतान्यत्वे ।
अशुचित्वं संसारः कर्मास्रवसंवरविधिश्च ॥१४९॥
निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च ।
बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ॥१५०॥
दृष्टजनसंप्रयोगर्द्धिविषयसुखसंपदस्तथारोग्यम् ।
देहस्य यौवनं जीवितं च सर्वाण्यनित्यानि ॥१५१॥
जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यच्च नास्ति शरणं क्वचिल्लोके ॥१५२॥
एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते ।
तस्मादाकालिकहितमेकेनैवात्मनः कार्यम् ॥१५३॥
अन्यो ऽहं स्वजनात्परिजनाच्च विभवाच्छरीरकाच्चेति ।
यस्य नियता मतिरियं न बाधते तं हि शोककलिः ॥१५४॥
अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचित्वाच्च ।
देहस्याशुचिभावः स्थाने स्थाने भवति चिन्त्यः ॥१५५॥

---

१ Var. H. उपघात.

माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रातृतां पुनः श्वशुरतां चैव ॥१५६॥
मिथ्यादृष्टिरविरतः प्रमादवान् यः कषायदण्डरुचिः ।
तस्य तथास्रवकर्मणि यतेत तन्निग्रहे तस्मात् ॥१५७॥
या पुण्यपापयोरग्रहणे वाक्कायमानसी वृत्तिः[1] ।
सुसमाहितो हितः संवरो वरद्देशितस्त्रिजन्यः ॥१५८॥
यद्वद्विशोषणाद्[2]पचितो ऽपि यत्नेन जीर्यते दोषः ।
तद्वत्कर्मोपचितं निर्जरयति संवृतस्तपसा ॥१५९॥
लोकस्याधस्तिर्यग्वि[3]चिन्तयेदूर्ध्वमपि च बाहुल्यम् ।
सर्वत्र जन्ममरणे रूचिद्रव्योपयोगांश्च ॥१६०॥
धर्मो ऽयं स्वाख्यातो जगद्धितार्थं जिनैर्जितारिगणैः ।
ये ऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ॥१६१॥
मानुष्यकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ ।
श्रद्धाकथकश्रवणेषु सत्स्वपि सुदुर्लभा बोधिः ॥१६२॥
तां दुर्लभां भवग्रतैर्लब्ध्वाप्यतिदुर्लभा पुनर्विरतिः ।
मोहाद्रागात्कापथविलोकनाद्गौरववशाच्च ॥१६३॥
तत्प्राप्य विरतिरत्नं विरागमार्गविजयो दुरधिगम्यः ।
दुरिन्द्रियकषायगौरवपरीषहसपत्नविधुरेण ॥१६४॥
तस्मात्परीषहेन्द्रियगौरवगणनायकान्कषायरिपून् ।
क्षान्तिबलमार्दवार्जवसंतोषैः साधयेद्वीरः ॥१६५॥

---

१ Var. H. गुप्तिः. २ A. विशेषणात्.
३ A. तिर्यक्त्वं.

संचिन्त्य कषायाणामुदयनिमित्तमुपशान्तिहेतुं च ।
चिकरणशुद्धमपि तयोः परिहारासेवने कार्ये ॥१६६॥
सेव्यः क्षान्तिर्मार्दवमार्जवशौचे च संयमत्यागौ ।
सत्यतपोब्रह्माकिञ्चन्यानीत्येष धर्मविधिः ॥१६७॥
धर्मस्य दया मूलं न क्षात्रमावान्द्यां समादत्ते ।
तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्मम् ॥१६८॥
विनयायत्ताश्च गुणाः सर्वे विनयश्च मार्दवायत्तः ।
यस्मिन्मार्दवमखिलं स सर्वगुणभाक्त्वमाप्नोति ॥१६९॥
नानार्जवो विशुध्यति न धर्ममाराधयत्यशुद्धात्मा ।
धर्मादृते न मोक्षो मोक्षात्परमं सुखं नान्यत् ॥१७०॥
यद्द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।
तद्भवति भावशौचानुपरोधाद्यत्नतः कार्यम् ॥१७१॥
पञ्चास्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥१७२॥
बांधवधनेन्द्रियसुखत्यागात्त्यक्तभयविग्रहः साधुः ।
त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहंकारममकारः ॥१७३॥
अविसंवादनयोगः कायमनोवाग्जिह्मता चैव ।
सत्यं चतुर्विधं तच्च जिनवरमते ऽस्ति नान्यत्र ॥१७४॥
अनशनमूनोदरता वृत्तेः संक्षेपणं रसत्यागः ।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥१७५॥
प्रायश्चित्तध्याने वैयावृत्यविनयावथोत्सर्गः[१] ।

---

१ H. विनयात्तथोत्सर्गः.

स्वाध्याय इति तपः षट्प्रकारमभ्यन्तरं भवति ॥१७६॥
दिव्यात्कामरतिसुखाच्चिविधेन विरतिरिति नवकं।
औदारिकादपि तथा तद्वद्भाष्टादशविकल्पम् ॥१७७॥
अध्यात्मविदो मूर्छां परिग्रहं वर्णयन्ति निश्चयतः।
तस्मादैराग्येणोराकिञ्चन्यं परो धर्मः ॥१७८॥
दशविधधर्मानुष्ठायिनः सदा रागद्वेषमोहानाम्।
दृढ़रूढ़घनानामपि भवत्युपशमो ऽल्पकालेन ॥१७९॥
ममकाराहंकारत्यागादतिदुर्जयोद्भूतप्रबलान्।
हन्ति परीषहगौरवकषायदण्डेन्द्रियव्यूहान् ॥१८०॥
प्रवचनभक्तिः श्रुतसंपदुद्यमो व्यतिकरश्च संविग्नैः।
वैराग्यमार्गसद्भावभावधौरेयजनकानि ॥१८१॥
आक्षेपणिविक्षेपणि[1] विमार्गबाधनसमर्थविन्यासाम्।
श्रोतृजनश्रोत्रमनःप्रसादजननीं यथा जननीम्[2] ॥१८२॥
संवेदनीं[3] च निर्वेदनीं च धर्म्यां कथां सदा कुर्यात्।
स्त्रीभक्तचौरजनपदकथाश्च दूरात्परित्याज्याः ॥१८३॥
यावत्परगुणदोषपरिकीर्तने व्याप्तं मनो भवति।
तावद्वरं विशुद्धे ध्याने व्यग्रं मनः कर्तुम् ॥१८४॥
शास्त्राध्ययने चाध्यापने च संचिन्तने तथात्मनि च।
धर्मकथने च सततं यत्नः सर्वात्मना कार्यः ॥१८५॥

---

१ अत्र समाहारद्वंद्वः औणादिकोऽणिप्रत्ययः प्रत्यासत्यचया ख्या.
२ Var. H. अन्ये त्वार्यार्यां चलार्यपि पदानि प्रथमाविभक्त्यन्तानि व्याख्यान्ति.
३ H. संवेजनीं.

शास्तिति वाग्विधिर्द्विधातुः पापयते ऽनुशिष्यर्थः ।
चेष्टिति च पालनार्थे विनिश्चितः सर्वशब्दविदाम् ॥१८६॥
यस्माद्रागद्वेषोद्भूतचित्तान्समनुशास्ति सद्धर्मैः ।
संजायते च दुःखाच्छास्त्रमिति निरुच्यते सद्भिः ॥१८७॥
शासनसामर्थ्येन तु संज्ञाबलेन चानवद्येन ।
युक्तं यत्तच्छास्त्रं तच्चैतत्सर्वविद्वचनम् ॥१८८॥

जीवाजीवाः पुण्यं पापास्रवसंवराः सनिर्जरणाः ।
बन्धो मोक्षश्चैते सम्यक्त्व चिन्त्या नवपदार्थाः ॥१८९॥
जीवा मुक्ताः संसारिणश्च संसारिणस्त्वनेकविधाः ।
लक्षणतो विज्ञेया द्विचित्वःपञ्चषड्भेदाः ॥१९०॥
द्विविधाश्चराचराख्यास्त्रिविधाः स्त्रीपुंनपुंसका ज्ञेयाः ।
नारकतिर्यग्मानुषदेवाश्चतुर्विधाः प्रोक्ताः ॥१९१॥
पञ्चविधास्त्वेकद्विचित्वःपञ्चेन्द्रियास्तु निर्दिष्टाः ।
क्षित्यम्बुवह्निपवनतरवस्त्रसाश्चेति[1] षड्भेदाः ॥१९२॥
एवमनेकविधानामेकैको विधिरनन्तपर्यायः ।
प्रोक्तः स्थित्यवगाहज्ञानदर्शनादिपर्यायैः ॥१९३॥
सामान्यं खलु लक्षणमुपयोगो भवति सर्वजीवानाम् ।
साकारो ऽनाकारश्च सो ऽष्टभेदश्चतुर्धा च ॥१९४॥
ज्ञानाज्ञाने पञ्चत्रिविकल्पे सो ऽष्टधा तु साकारः ।
चक्षुरचक्षुरवधिकेवलदृग्विषयस्त्वनाकारः ॥१९५॥
भावा भवन्ति जीवस्यौदयिकः पारिणामिकश्चैव ।

---

[1] A. omits. इति.

औपशमिकः क्षयोत्थः क्षयोपशमजश्च पञ्चैते ॥१९६॥
ते चैकविंशतित्रिद्विनवाष्टादशविधाश्च विज्ञेयाः ।
षष्ठश्च सान्निपातिक इत्यन्यः पञ्चदशभेदः ॥१९७॥
एभिर्भावैः स्थानं गतिमिन्द्रियसंपदः[1] सुखं दुःखम् ।
संप्राप्नोतीत्यात्मा सो ऽष्टविकल्पः समासेन ॥१९८॥
द्रव्यं कषाययोगावुपयोगो ज्ञानदर्शने चेति[2] ।
चारित्रं वीर्यं चेत्यष्टविधा मार्गणा तस्य ॥१९९॥
जीवाजीवानां द्रव्यात्मा सकषायिणां कषायात्मा ।
योगः सयोगिनां पुनरुपयोगः सर्वजीवानाम् ॥२००॥
ज्ञानं सम्यग्दृष्टेर्दर्शनमथ भवति सर्वजीवानाम् ।
चारित्रं विरतानां तु सर्वसंसारिणां वीर्यम् ॥२०१॥
द्रव्यात्मेत्युपचारः सर्वद्रव्येषु नयविशेषेण ।
आत्मादेशादात्मा भवत्यनात्मा परादेशात् ॥२०२॥
एवं संयोगाल्पबहुत्वाद्यैर्नैकशः स परिमृग्यः ।
जीवस्यैतत्सर्वं स्वतत्त्वमिह लक्षणैर्दृष्टम् ॥२०३॥
उत्पादविगमनित्यत्वलक्षणं यत्तदस्ति सर्वमपि ।
सदसद्वा भवतीत्यन्यथार्पितानर्पितविशेषात् ॥२०४॥
यो ऽर्थो यस्मिन्नाभूत् साम्प्रतकाले च दृश्यते तत्र ।
तेनोत्पादस्तस्य विगमस्तु तस्मादिपर्यासः ॥२०५॥
साम्प्रतकाले चानागते च यो यस्य भवति सम्बन्धी ।
तेनाविगमस्तस्येति स नित्यस्तेन भावेन ॥२०६॥

---

१ Var. A. संपद्. २ H. चैव.

धर्माधर्माकाशानि पुद्गलाः काल एव चाजीवाः ।
पुद्गलवर्जमरूपं तु रूपिणः पुद्गलाः प्रोक्ताः ॥२०७॥
द्व्यादिप्रदेशवन्तो यावदनन्तप्रदेशकाः[1] स्कन्धाः ।
परमाणुरप्रदेशो वर्णादिगुणेषु भजनीयः ॥२०८॥
भावे धर्माधर्माम्बरकालाः पारिणामिके ज्ञेयाः ।
उदयपरिणामि रूपं तु सर्वभावानुगा जीवाः ॥२०९॥
जीवाजीवा द्रव्यमिति षड्विधं भवति लोकपुरुषोऽयम् ।
वैशाखस्थानस्थः पुरुष इव कटिस्थकरयुग्मः ॥२१०॥
तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम् ।
स्थालमिव च तिर्यग्लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥२११॥
सप्तविधोऽधोलोकस्तिर्यग्लोको भवत्यनेकविधः ।
पञ्चदशविधानः पुनरूर्ध्वलोकः समासेन ॥२१२॥
लोकालोकव्यापकमाकाशं मर्त्यलौकिकः[2] कालः ।
लोकव्यापि चतुष्टयमवशेषं लेकजीवो वा ॥२१३॥
धर्माधर्माकाशान्येकैकमतः परं चिकमनन्तम् ।
कालं विनास्तिकाया जीवमृते चाप्यकर्तृणि ॥२१४॥
धर्मो गतिस्थितिमतां द्रव्याणां गत्युपग्रहविधाता ।
स्थित्युपकर्ताधर्मो[3]ऽवकाशदानोपकृद्गगनम् ॥२१५॥
स्पर्शरसगन्धवर्णाः शब्दो बन्धश्च[4] सूक्ष्मता स्थौल्यम् ।
संस्थानं भेदतमश्छायोद्योतातपश्चेति ॥२१६॥

---

१ H. प्रदेशिकाः. २ H. मार्त्यलौकिकः.
३ A. स्थित्यपकृच्चाधर्मो + ४ H. बन्धो ऽथ.

कर्मशरीरमनोवाग्विचेष्टितोच्छ्वासदुःखसुखदाः स्युः ।
जीवितमरणोपग्रहकराश्च संसारिणः स्कन्धाः ॥२१७॥
परिणामवर्तनाविधिपरापरत्वगुणलक्षणः कालः ।
सम्यक्त्वज्ञानचारित्रवीर्यस्निग्धागुणा जीवाः ॥२१८॥
पुद्गलकर्म शुभं यत्तत्पुण्यमिति जिनशासने दृष्टम् ।
यदशुभमथ तत्पापमिति भवति सर्वज्ञनिर्दिष्टम् ॥२१९॥
योगः शुद्धः पुण्यास्रवस्तु पापस्य तद्विपर्यासः ।
वाक्कायमनोगुप्तिर्निरास्रवः संवरस्तेषाम् ॥२२०॥
संवृततपउपधानात्तु[1] निर्जरा कर्मसन्ततिर्बन्धः ।
बन्धवियोगो मोक्षस्त्रिति संक्षेपात्त्रवपदार्थाः ॥२२१॥
एतेष्वध्यवसायो यो ऽर्थेषु विनिश्चयेन तत्त्वमिति ।
सम्यग्दर्शनमेतत्तु तन्निसर्गादधिगमाद्वा ॥२२२॥
स्निग्धागमोपदेशश्रवणान्येकार्थिकान्यधिगमस्य ।
एकार्थः परिणामो भवति निसर्गः स्वभावश्च ॥२२३॥
एतत्सम्यग्दर्शनमनधिगमविपर्ययौ तु[2] मिथ्यात्वम् ।
ज्ञानमथ पञ्चभेदं तत्प्रत्यक्षं परोक्षं च ॥२२४॥
तच्च परोक्षं द्विविधं श्रुतमाभिनिबोधिकं च विज्ञेयम् ।
प्रत्यक्षं त्ववधिमनःपर्यायौ केवलं चेति ॥२२५॥
एषामुत्तरभेदविषयादिभिर्भवति विस्तराधिगमः ।
एकादीन्येकस्मिन् भाज्यानि त्वा चतुर्भ्य इति ॥२२६॥
सम्यग्दृष्टेर्ज्ञानं सम्यग्ज्ञानमिति नियमतः सिद्धम् ।

---

१ Var H. तप उपधानं तु. २ H. तुशब्दात् संशयश्च.

आद्यचयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम् ॥२२७॥
समाधिकमित्याद्यं छेदोपस्थापनं द्वितीयं तु ।
परिहारविशुद्धिः सूक्ष्मसंपरायं यथाख्यातम् ॥२२८॥
इत्येतत्पञ्चविधं चारित्रं मोक्षसाधनं प्रवरम्[1] ।
नैकैरनुयोगनयप्रमाणमार्गैः समनुगम्यम् ॥२२९॥
सम्यक्त्वज्ञानचारित्रसंपदः साधनानि मोक्षस्य ।
तास्वेकतराभावे ऽपि मोक्षमार्गो ऽप्यसिद्धिकरः ॥२३०॥
पूर्वद्वयसम्यद्यपि तेषां भजनीयमुत्तरं भवति ।
पूर्वद्वयलाभः पुनरुत्तरलाभे भवति सिद्धः ॥२३१॥
धर्मावश्यकयोगेषु भावितात्मा प्रमादपरिवर्जी ।
सम्यक्त्वज्ञानचारित्राणामाराधको भवति ॥२३२॥
आराधनास्तु तेषां तिस्रस्तु जघन्यमध्यमोत्कृष्टाः ।
जन्मभिरष्टत्र्यैकैः सिध्यन्त्याराधकास्तासाम् ॥२३३॥
तासामाराधनतत्परेण तेष्वेव भवति यतितव्यम् ।
यतिना तत्परजिनभक्त्युपग्रहसमाधिकरणेन ॥२३४॥
स्वगुणाभ्यासरतमतेः परवृत्तान्तान्धमूकबधिरस्य ।
मदमदनमोहमत्सररोषविषादैरधृष्यस्य ॥२३५॥
प्रशमाव्याबाधसुखाभिकांक्षिणः सुस्थितस्य सद्धर्मे ।
तस्य किमौपम्यं स्यात् सदेवमनुजे ऽपि लोके ऽस्मिन् ॥२३६॥
स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।
प्रत्यक्षं प्रशमसुखं न परवशं च न व्ययप्राप्तम् ॥२३७॥

---

१ A. परमं.

निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम् ।
विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥२३८॥
शब्दादिविषयपरिणाममनित्यं दुःखमेव च ज्ञात्वा ।
ज्ञात्वा च रागदोषात्मकानि दुःखानि संसारे ॥२३९॥
स्वशरीरे ऽपि न रज्यति शत्रावपि न प्रदोषमुपयाति ।
रोगजरामरणभयैरव्यथितो यः स नित्यसुखी ॥२४०॥
धर्मध्यानाभिरतस्त्रिदण्डविरतस्त्रिगुप्तिगुप्तात्मा ।
सुखमास्ते निर्द्वंद्वो जितेंद्रियपरीषहकषायः ॥२४१॥
विषयसुखनिरभिलाषः प्रशमगुणगणाभ्यलंकृतः साधुः ।
द्योतयति यथा न तथा सर्वाण्यादित्यतेजांसि[1] ॥२४२॥
(सम्यग्दृष्टिर्ज्ञानी विरतितपोबलयुतो ऽप्यनुपशान्तः ।
तं न लभते गुणं यं प्रशमगुणमुपाश्रितो लभते)[2] ॥

सम्यग्दृष्टिर्ज्ञानी विरतितपोध्यानभावनायोगैः ।
शीलाङ्गसहस्राष्टादशकमयत्नेन साधयति ॥२४३॥
धर्माद्भूम्यादीन्द्रियसंज्ञाभ्यः करणतश्च योगाच ।
शीलाङ्गसहस्राणामष्टादशकस्य निष्पत्तिः ॥२४४॥
शीलार्णवस्य पारं गत्वा संविग्नसुगममार्गस्थ[3] ।
धर्मध्यानमुपगतो वैराग्यं प्राप्नुयाद्योग्यम् ॥२४५॥

आज्ञाविचयमपायविचयं च सद्ध्यानयोगमुपसृत्य ।
तस्माद्विपाकविचयमुपयाति संस्थानविचयं च ॥२४६॥

---

१ A. द्योतयति यथा सर्वाण्यादित्यः सर्वतेजांसि.

२ A. adds this verse and cf. 127. ३ Var. H. पारस्य.

आप्तवचनं प्रवचनं चाज्ञा विचयस्त[1]दर्थनिर्णयनम् ।
आस्रवविकथागौरवपरीषहाद्यैरपायस्तु[2] ॥२४७॥
अशुभशुभकर्मपाकानुचिन्तनार्थो विपाकविचयः स्यात् ।
द्रव्यक्षेत्रादित्यनुगमनं संस्थानविचयस्तु ॥२४८॥
जिनवरवचनगुणगणं संचिन्तयतो वधाद्यपायांश्च ।
कर्मविपाकान् विविधान् संस्थानविधीननेकांश्च ॥२४९॥
नित्योद्विग्नस्यैवं क्षमाप्रधानस्य निरभिमानस्य ।
धुतमायाकलम[3]लनिर्मलस्य जितसर्वतृष्णस्य ॥२५०॥
तुल्यारण्यकुलाकुलविविक्तबन्धुजनगुरुवर्गस्य ।
समवामीचन्दनकल्पनप्रदेहादिदेहस्य ॥२५१॥
आत्मारामस्य सतः समतृणमणिमुक्तलेष्टुकनकस्य ।
स्वाध्यायध्यानपरायणस्य दृढमप्रमत्तस्य ॥२५२॥
अध्यवसायविशुद्धेः प्रशस्त[4]योगैर्विशुध्यमानस्य ।
चारित्रशुद्धिमभ्यामवाप्य लेश्याविशुद्धिं च ॥२५३॥
तस्यापूर्वकरणमथ घातिकर्मक्षयैकदेशोत्थम् ।
ऋद्धिप्रवेकविभववदुपजातं जातभद्रस्य ॥२५४॥
सातर्द्धिरसेष्वगुरुः प्राप्य[5]र्द्धिविभूतिमसुलभामन्यैः ।
सक्तः प्रशमरतिसुखे न भजति तस्यां मुनिः सङ्गम् ॥२५५॥
या सर्वसुरवरर्द्धिर्विस्मयनीयापि सानगारर्द्धेः ।
नार्घति सहस्रभागं कोटिशतसहस्रगुणितापि ॥२५६॥

---

१ A. त्वाज्ञाविजयः. २ A. परीषहादेरुपायस्तु. ३ A. कल्मिल.
४ A. प्रमत्त. ५ A. संप्राप्य.

तज्जयमवाप्य जितविघ्नरिपुर्भवशतसहस्रदुःप्रापम् ।
चारित्रमथाख्यातं संप्राप्नस्तीर्थकृत्तुल्यम् ॥२५७॥
शुक्लध्यानाद्यद्वयमवाप्य कर्माष्टकप्रणेतारम् ।
संसारमूलबीजं मूलादुन्मूलयति मोहम् ॥२५८॥
पूर्वं करोत्यनन्तानुबन्धिनाम्नां क्षयं कषायाणाम् ।
मिथ्यात्वमोहगहनं क्षपयति सम्यक्त्वमिथ्यात्वम् ॥२५९॥
सम्यक्त्वमोहनीयं क्षपयत्यष्टावतः कषायांश्च ।
क्षपयति ततो नपुंसकवेदं स्त्रीवेदमथ तस्मात् ॥२६०॥
हास्यादि ततः षट्कं क्षपयति तस्माच्च पुरुषवेदमपि ।
संज्वलनानपि हत्वा प्राप्नोत्यथ वीतरागत्वम् ॥२६१॥
सर्वोद्घातितमोहो निहतक्लेशो यथा हि सर्वज्ञः ।
भात्यनुपलक्ष्यराङ्कुशोन्मुक्तः पूर्णचन्द्र इव ॥२६२॥
सर्वेन्धनैकराशीकृतसंदीप्तो ह्यनन्तगुणतेजाः ।
ध्यानानलस्तपःप्रशमसंवरहविर्विवृद्धबलः ॥२६३॥
क्षपकश्रेणिपरिगतः[1] स समर्थः सर्वकर्मिणां कर्म ।
क्षपयितुमेको यदि कर्मसंक्रमः स्यात्परकृतस्य ॥२६४॥
परकृतकर्मणि यस्मान्नाक्रामति संक्रमो विभागो वा ।
तस्मात्स्वानां कर्म यस्य यत्तेन तद्वेद्यम् ॥२६५॥
मस्तकसूचिविनाशात्तालस्य यथा ध्रुवो भवति नाशः ।
तद्वत्कर्मविनाशो हि मोहनीयक्षये नित्यम् ॥२६६॥
छद्मस्थवीतरागः कालं सोऽन्तर्मुहूर्तमथ भूत्वा ।

---

१ A. श्रेणिमुपगतः.

युगपद्विविधावरणान्तरायकर्मक्षयमवाप्य ॥२६७॥
शाश्वतमनन्तमनतिशयमनुपममनुत्तरं निरवशेषम् ।
संपूर्णमप्रतिहतं संप्राप्तः केवलं ज्ञानम् ॥२६८॥
कृत्स्नं[1] लोकालोके व्यतीतषाश्रतभविष्यतः कालात्[2] ।
द्रव्यगुणपर्यायाणां ज्ञाता द्रष्टा च सर्वार्थैः ॥२६९॥
क्षीणचतुःकर्मांशो वेद्यायुर्नामगोत्रवेदयिता ।
विहरति मुहूर्तकालं देशोनां पूर्वकोटिं वा ॥२७०॥
तेनाभिन्नं चरमभवायुर्दुर्भेदमनपवर्तित्वात् ।
तदुपग्रहं च वेद्यं तत्तुल्ये नामगोत्रे च ॥२७१॥
यस्य पुनः केवलिनः कर्म भवत्यायुषो ऽतिरिक्ततरम् ।
स समुद्घातं भगवानथ गच्छति तत्समीकर्तुम् ॥२७२॥
दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये ।
मन्थानमथ तृतीये लोकव्यापि चतुर्थे तु ॥२७३॥
संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।
सप्तमके तु कपाटं संहरति ततो ऽष्टमे दण्डम् ॥२७४॥
औदारिकप्रयोक्ता प्रथमाष्टमसमयथोरसाविष्टः ।
मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु ॥२७५॥
कार्मणशरीरयोगी चतुर्थके पञ्चके तृतीये च ।
समयत्रये ऽपि तस्मिन् भवत्यनाहारको नियमात् ॥२७६॥
स समुद्घातनिवृत्तो ऽथ[3] मनोवाक्कायथयोगवान् भगवान् ।

---

१ A. कात्स्न्यांलोकालोके. २ A. कालान्.
३ H. अथानन्तरं.

यतियोग्ययोगयोक्ता[1] योगनिरोधं मुनिरुपैति ॥२७७॥
पञ्चेन्द्रियो ऽथ संज्ञी यः पर्याप्तो जघन्ययोगी स्यात् ।
निरुणद्धि मनोयोगं ततो ऽप्यसंख्येयगुणहीनम् ॥२७८॥
द्वीन्द्रियसाधारणयोर्वागुच्छ्वासावधो जयति तद्वत्[1]
पनकस्य काययोगं जघन्यपर्याप्तकस्याधः ॥२७९॥
सूक्ष्मक्रियमप्रतिपाति काययोगोपगस्ततो ध्यात्वा[2] ।
विगतक्रियमनिवर्तिलमुत्तरं ध्यायति परेण ॥२८०॥
चरमभवे संस्थानं यादृग्यस्योच्छ्रयप्रमाणं च ।
तस्मात् त्रिभागहीनावगाहसंस्थानपरिणाहः ॥२८१॥
सो ऽथ मनोवागुच्छ्वासकाययोगक्रियार्थविनिवृत्तः ।
अपरिमितनिर्जरात्मा संसारमहार्णवोत्तीर्णः ॥२८२॥
ईषद्ध्रस्वाचरपञ्चकोद्गिरणमात्रतुल्यकालीयाम् ।
संयमवीर्याप्तबलः शैलेशीमेति गतलेश्यः ॥२८३॥
पूर्वरचितं च तस्यां समयश्रेण्यामथ प्रकृतिशेषम् ।
समये समये क्षपयत्यसंख्यगुणमुत्तरोत्तरतः ॥२८४॥
चरमे समये सङ्घातीतान्विनिहत्य[3] चरमकर्मांशान् ।
क्षपयति युगपत् कृत्स्नं वेदायुर्नामगोत्रगणम् ॥२८५॥
सर्वगतियोग्यसंसारमूलकरणानि सर्वभावानि[4] ।
औदारिकतैजसकार्मणानि सर्वात्मना त्यक्त्वा ॥२८६॥
देहत्रयनिर्मुक्तः प्राप्यर्जुश्रेणिवीतिमस्पर्शाम् ।

---

१ H. युक्ता.
२ A. यागोपयोगतो ध्यात्वा.
३ H. विनिहन्ति.
४ Var. H. सर्वेभावीनि.

समयेनैकेनाविग्रहेण गत्वोर्ध्वगतिमप्रतिघः ॥२८७॥
सिद्धिक्षेत्रे विमले जन्मजरामरणरोगनिर्मुक्तः ।
लोकाग्रगतः सिध्यति साकारेणोपयोगेन ॥२८८॥
सादिकमनन्तमनुपममव्याबाधसुखमुत्तमं प्राप्तः ।
केवलसम्यक्त्वज्ञानदर्शनात्मा भवति मुक्तः ॥२८९॥
मुक्तः सन्नाभावः खालक्षण्यात्खतो ऽर्थसिद्धेश्च ।
भावान्तरसंक्रान्तेः सर्वज्ञाज्ञोपदेशाच्च ॥२९०॥
त्यक्त्वा शरीरबन्धनमिहैव कर्माष्टकक्षयं कृत्वा ।
न स तिष्ठत्यनिबन्धा[1]दनाश्रयाद्प्रयोगाच्च ॥२९१॥
नाधो गौरवविगमाद्शक्त्यभावाच्च गच्छति विमुक्तः ।
लोकान्तादपि न परं ज्ञेयक दूवोपग्रहाभावात् ॥२९२॥
योगप्रयोगयोश्चाभावात्तिर्यग् न तस्य गतिरस्ति ।
सिद्धस्योर्ध्वं मुक्तस्यालोकान्ताद्गतिर्भवति ॥२९३॥
पूर्वप्रयोगसिद्धेर्बन्धच्छेदात्सङ्गभावाच्च ।
गतिपरिणामाच्च तथा सिद्धस्योर्ध्वं गतिः सिद्धा ॥२९४॥
देहमनोवृत्तिभ्यां भवतः शरीरमानसे दुःखे ।
तदभावस्तदभावे सिद्धं सिद्धस्य सिद्धिसुखम् ॥२९५॥
यस्तु यतिर्घटमानः सम्यक्त्वज्ञानशीलसंपन्नः ।
वीर्यमनिगूहमानः शक्त्यनुरूपं प्रयत्नेन[2] ॥२९६॥
संहननायुर्बलकालवीर्यसंपत्समाधिवैकल्यात्
कर्मातिगौरवाद्वा स्वार्थमहत्वोपरममेति ॥२९७॥

---

१ A. अनुबन्धात्. २ A. असङ्ग. ३ A. अनुरूपप्रयत्नेन.

सौधर्मादिष्वन्यतमकेषु सर्वार्थसिद्धिचरमेषु ।
स भवति देवो वैमानिको महर्द्धिद्युतिवपुष्कः ॥१९८॥
तत्र सुरलोकसौख्यं चिरमनुभूय स्थितिक्षयात्तस्मात् ।
पुनरपि मनुष्यलोके गुणवत्सु मनुष्यसङ्घेषु ॥१९९॥
जन्म समवाप्य कुलबन्धुविभवरूपबलबुद्धिसंपन्नः ।
श्रद्धासम्यक्त्वज्ञानसंवरतपोबलसमग्रः ॥२००॥
पूर्वोक्तभावनाभावितान्तरात्मा विधूतसंसारः ।
सेत्स्यति ततः परं वा स्वर्गान्तरितस्त्रिभवभावात् ॥२०१॥

यश्चेह जिनवरमते गृहाश्रमी निश्चितः सुविदितार्थः ।
दर्शनशीलव्रतभावनाभिरभिरञ्जितमनस्कः ॥२०२॥
स्थूलवधानृतचौर्यपरस्त्रीरत्यरतिवर्जितः सततम् ।
दिग्व्रतमूर्ध्वं देशावकाशिकमनर्थविरतिं च ॥२०३॥
सामायिकं च कृत्वा पौषधमुपभोगपरिमाणं* च ।
न्यायागतं च कल्पं विधिवत्पात्रेषु विनियोज्यम् ॥२०४॥
चैत्यायतनप्रस्थापनानि च कृत्वा[२] भक्तितः प्रयतः ।
पूजाश्च गन्धमाल्याधिवासधूपप्रदीपाद्याः ॥२०५॥
प्रशमरतिनित्यहर्षितो जिनगुरुसाधुजनवन्दनाभिरतः ।
संलेखनां च काले योगेनाराध्य सुविशुद्धाम् ॥२०६॥
प्राप्तः कल्पेष्विन्द्रत्वं वा सामानिकत्वमन्यद्वा ।
स्थानमुदारं तत्रानुभूय च सुखं तदनुरूपम् ॥२०७॥
नरलोकमेत्य सर्वगुणसंपदं दुर्लभां पुनर्लब्ध्वा ।

---

१ H. adds च. * A. परिमाणं. २ A. विधिना.

शुद्धः स सिद्धिमेष्यति भवाष्टकाभ्यन्तरे नियमात् ॥३०८॥
इत्येवं प्रशमरतेः फलमिह स्वर्गापवर्गयोश्च शुभम् ।
संप्राप्यते ऽनगारैरगारिभिश्चोत्तरगुणाढ्यैः ॥३०९॥
जिनशासनार्णवादाकृष्टां धर्मकथिकामिमां श्रुत्वा ।
रत्नाकरादिव जरत्कपर्दिकामुद्धृतां भक्त्या ॥३१०॥
सद्भिर्गुणदोषज्ञैर्दोषानुत्सृज्य गुणलवा ग्राह्याः ।
सर्वात्मना च सततं प्रशमसुखार्थैव यतितव्यम् ॥३११॥
यच्चासमंजसमिह च्छन्दःशब्दसमयार्थतो ऽभिहितम् ।
पुत्रापराधवन्मम मर्षयितव्यं बुधैः सर्वम् ॥३१२॥
सर्वसुखमूलबीजं सर्वार्थविनिश्चयप्रकाशकरम् ।
सर्वगुणसिद्धिसाधनधनमर्हच्छासनं जयति ॥३१३॥

॥ प्रशमरतिप्रकरणं समाप्तमिति ॥

Peterson's First Report Appendix I. P. 15.
Contrast Third Report, P. 48.

24 प्रशमरतिप्रकरणम् Ends—

धर्मकथिका प्रशमरतिरार्याशतत्रयं द्वादशोत्तरं परिसमाप्तमिति । प्रशमरतिप्रकरणं समाप्तमिति ॥ मंगलं ॥

A begins—

प्रशमस्थेन येनेयं कृता वैराग्यपद्धतिः ॥
तस्मै वाचकमुख्याय नमो भूतार्थभाषिणे ॥१॥

प्रशमरतिप्रकरणारंभे मंगलाभिधानं विवक्षितप्रकरणार्थस्याप्रत्यूहेन परिसमाप्त्यर्थमित्याह च नाभेयाद्याः ॥

H. begins— ॥ श्री प्रवचनाये ॥

उदयस्थितमरुणकरं दिनकरमिव केवलालोकम् ।
विनिहतजडतादोषं महत्तं वीरमानम्य ॥
वक्ष्यामि प्रशमरतेर्विवरणमिह वृत्तितः किंचित् ।
जडमतिरप्यकठोरं स्वस्मृत्यर्थं यथाबोधम् ॥
यद्यपि मदीयवृत्तेः साफल्यं नास्ति तादृशं किमपि ।
सुगमत्वलघुत्वाभ्यां तथापि तत्संभवत्येव ॥

दृहाचार्यः श्रीमानुमास्वातिपुरस्कृतकुतर्कजनितवितर्कसंपर्कप्रपञ्चः पञ्चशतप्रकरणप्रबन्धप्रणेता वाचकमुख्यः समस्तश्वेताम्बरकुलतिलकः प्रशमरतिप्रकरणकरणे प्रवर्तमानः प्रथमत एव मङ्गलादिप्रतिपादकमिदमार्याद्वितयमुपन्यस्तवान् ॥ नाभेयाद्याः &c And ends. यतः ।

यत्पालये मन्दगुरूपशोभे सन्मङ्गले सद्वुधराजहंसे ।
तारापथे वा सुकविप्रचारे श्रीमानदेवाभिधसूरिगच्छे ॥१॥
भव्या बभूवुः शुभसस्य शिष्या अध्यापकाः श्रीजिनदेवसंज्ञाः ।
तेषां विनेयैर्बहुभक्तियुक्तैः प्रज्ञाविहीनैरपि शास्त्ररागात् ॥२॥
श्रीहरिभद्राचार्यैः रचितं प्रशमरतिविवरणं किंचित् ।
परिभाव्य वृद्धटीकाः सुखबोधार्थं समासेन ॥३॥
अणहिलपाटकनगरे श्रीमज्जयसिंहदेवनृपराज्ये ।
बाणवसुरुद्र (1185) संख्ये विक्रमतो वत्सरे व्रजति ॥४॥

श्रीधवलभाण्डागारिकपुत्रचयगोनागनायकवितीर्णे ।
मदुपाश्रये स्थितैस्तैः समर्थितं शोधितं चेति ॥५॥
यदिहाशुद्धं किंचिच्छद्मस्थतेन लिखितमस्माभिः ।
तच्छोध्यं धीमद्भिः सम्यक् संचित्य समयज्ञैः ॥६॥
शास्त्रस्य पीठबन्धः कषायरागादिकर्मकरणार्घाः ।
अष्टौ च मदस्थानान्याचारो भावना धर्मः ॥७॥
तदनुकथा जीवाद्या उपयोगा भावषड्विधद्रव्यम् ।
चरणं शीलांगानि च ध्यानश्रेणीसमुद्घाताः ॥८॥
योगनिरोधः क्रमशः शिवगमनविधानमन्तफलमस्याः ।
द्वाविंशत्यधिकारा मुख्या इह धर्मकथिकायाम् ॥९॥
व्याख्याने तस्य शास्त्रस्य कृत्वा पुण्यं यदर्जितम् ।
तेन भव्यो जनः सर्वो लभतां शमसुत्तमम् ॥१०॥
धात्री धात्रीधरा यावद्यावच्चन्द्रदिवाकरौ ।
तावद्ज्ञानविध्वंसाच्चन्द्यादेषा सुवृत्तिका ॥११॥
ग्रन्थाग्रमत्र जातं प्रत्यक्षरगणनतः समूचायाः ।
सहस्रैरष्टाद्श शतानि सच्छ्लोकमानेन ॥१२॥

॥ ग्रन्थाग्रमङ्कतः १८०० ॥

॥ इति श्रीबृहद्गच्छीयश्रीहरिभद्रसूरिविरचिता प्रशमरतिवृत्तिः समाप्ता ॥

Padumawati, Fasc. 1-4 @ 2/	Rs. 8	0
Pariçiṣṭa Parvan, (Text) Fasc. 1-5 @ /6/ each	1	14
Prākṛita-Paingalam, Fasc. 1-7 @ /6/ each	2	14
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each	1	12
Ditto (English) Part II, Fasc. 1	0	18
Prākṛta Lakṣaṇam, (Text) Fasc. 1	1	0
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8 Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each	1	8
Ditto (English) Fasc. 1-3 @ /12/ each	2	4
Sraddha Kriya Kaumudi, Fasc. 1-6	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14-45 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each	7	2
Trantra Vartika (English) Fasc. 1-3 @ /12/	2	4
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /6/ each	14	4
Tattvarthadhigama Sutrom, Fasc. 1-2	0	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-3 @ /6/	1	2
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-7 @ /6/ each ...	2	10
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/	4	8
Vallala Carita, Fasc. 1	0	6
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc. 1-6 @ /6/	2	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each	4	8
Vidhano Parigata, Fasc. 1-6	2	4
Viṣṇu Smṛti, (Text) Fasc. 1-2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 2-6 @ /6/	1	14
Vṛhat Svayambhū Purāṇa, Fasc. 1-6	2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-6 @ 1/ each	14	0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each	37	0
Ditto English Vol. I, Fasc. 1-8; Vol. II, Fasc. 1 @ 1/ each ...	9	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts 1-2	2	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each	21	0
Farhang-i-Rashidī, (Text) Fasc. 1-14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each	3	0
Futūn-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngirī, (Text) Fasc. 1-3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12@ /6/ each	13	2
Maghazi of Wāqidī, (Text) Fasc. 1-5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6 each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1–19 @ /6/ each		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto Ditto (English) Fasc. 1–5		3	12
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngīrī (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vols. XIX and XX @ 10/ each	20	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) & 1901 (7), 1902 (9), 1903 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.		
	N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in th Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmiraçabdāmṛta, Parts I and II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal, by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir, by M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

12-12-04.

Books are supplied by V.-P.P.